	चोरयसि	चोरयथः	चोरयथ	म॰ पु॰
	चोरयामि	चोरयावः	चोरयामः	उ॰ पु॰
(लिट्)	चोरयामास	चोरयामासतुः	चोरयामासुः	प्र॰ पु॰
	चोरयामासिथ	चोरयामासथुः	चोरयामास	म॰ पु॰
	चोरयामास	चोरयामासिव	चोरयामासिम	उ॰ पु॰
(लुट्)	चोरयिता	चोरयितारौ	चोरयितारः	प्र॰ पु॰
	चोरयितासि	चोरयितास्थः	चोरयितास्थ	म॰ पु॰
	चोरयितास्मि	चोरयितास्वः	चोरयितास्मः	उ॰ पु॰
(लृट्)	चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति	प्र॰ पु॰
	चोरयिष्यसि	चोरयिष्यथः	चोरयिष्यथ	म॰ पु॰
	चोरयिष्यामि	चोरयिष्यावः	चरयिष्यामः	उ॰ पु॰
(लोट्)	चोरयतु-चोरयतात्	चोरयताम्	चोरयन्तु	प्र॰ पु॰
	चोरय-चोरयतात्	चोरयतम्	चोरयत	म॰ पु॰
	चोरयाणि	चोरयाव	चोरयाम	उ॰ पु॰
(लङ्)	अचोरयत्	अचोरयताम्	अचोरयन्	प्र॰ पु॰
	अचोरयः	अचोरयतम्	अचोरयत	म॰ पु॰
	अचोरयम्	अचोरयाव	अचोरयाम	उ॰ पु॰
विधिर्लिङ्	चोरयेत्	चोरयेताम्	चोरयेयुः	प्र॰ पु॰
	चोरयेः	चोरयेतम्	चोरयेत	म॰ पु॰
	चोरयेयम्	चोरयेव	चोरयेम	उ॰ पु॰
आशीर्लिङ्	चोर्यात्	चोर्यास्ताम्	चोर्यासुः	प्र॰ पु॰
	चोर्याः	चोर्यास्तम्	चोर्यास्त	म॰ पु॰
	चोर्यासम्	चोर्यास्व	चोर्यास्म	उ॰ पु॰
(लुङ्)	अचूचुरत्	अचूचुरताम्	अचूचुरन्	प्र॰ पु॰
	अचूचुरः	अचूचुरतम्	अचूचुरत	म॰ पु॰
	अचूचुरम्	अचूचुराव	अचूचुराम	उ॰ पु॰

(लृङ्)	अचोरयिष्यत्	अचोरयिष्यताम्	अचोरयिष्यन्	प्र० पु०
	अचोरयिष्यः	अचोरयिष्यतम्	अचोरयिष्यत	म० पु०
	अचोरयिष्यम्	अचोरयिष्याव	अचोरयिष्याम	उ० पु०

आत्मनेपदपक्षे

(लट्)	चोरयते	चोरयेते	चोरयन्ते	प्र० पु०
	चोरयसे	चोरयेथे	चोरयध्वे	म० पु०
	चोरये	चोरयावहे	चोरयामहे	उ० पु०
(लिट्)	चोरयाञ्चक्रे	चोरयाञ्चक्राते	चोरयाञ्चक्रिरे	प्र० पु०
	चोरयाञ्चकृषे	चोरयाञ्चक्राते	चोरयाञ्चकृ ढ्वे	म० पु०
	चोरयाञ्चक्रे	चोरयाञ्चकृवहे	चोरयाञ्चकृमहे	उ० पु०
(लुट्)	चोरयिता	चोरयितारौ	चोरयितारः	प्र० पु०
	चोरयितासे	चोरयितासाथे	चोरयिताध्वे	म० पु०
	चोरयिताहे	चोरयितास्वहे	चोरयितास्महे	उ० पु०
(लृट्)	चोरयिष्यते	चोरयिष्येते	चोरयिष्यन्ते	प्र० पु०
	चोरयिष्यसे	चोरयिष्येथे	चोरयिष्यध्वे	म० पु०
	चोरयिष्ये	चोरयिष्यावहे	चोरयिष्यामहे	उ० पु०
(लोट)	चोरयताम्	चोरयेताम्	चोरयन्ताम्	
	चोरयस्व	चोरयेथाम्	चोरयध्वम्	
	चोरयै	चोरयावहै	चोरयामहै	
(लङ्)	अचोरयत	अचोरयेताम्	अचोरयन्त	प्र० पु०
	अचोरयथाः	अचोरयेथाम्	अचोरयध्वम्	म० पु०
	अचोरये	अचोरयावहि	अचोरयामहि	उ० पु०
विधिलिङ्	चोरयेत	चोरयेयाताम्	चोरयेरन्	प्र० पु०
	चोरयेथाः	चोरयेयाथाम्	चोरयेध्वम्	म० पु०
	चोरयेय	चोरयेवहि	चोरयेमहि	उ० पु०
आशीर्लिङ्	चोरयिषीष्ट	चोरयिषीयास्ताम्	चोरयिषीरन्	प्र० पु०
	चोरयिषीष्ठाः	चोरयिषीयास्थाम्	चोरयिषीध्वम्	उ० पु०
	चोरयिषीय	चोरयिषीवहि	चोरयिषीमहि	उ० पु०
(लुङ्)	अचूचुरत	अचूचुरेताम्	अचूचुरन्त	प्र० पु०
	अचूचुरथाः	अचूचुरेथाम्	अचूचुरध्वम्	म० पु०

	अचूचुरे	अचूचुरावहि	अचूचुरामहि	उ॰ पु॰
(लृङ्)	अचोरयिष्यत	अचोरयिष्येताम्	अचोरयिष्यन्त	प्र॰ पु॰
	अचोरयिष्यथाः	अचोरयिष्येथाम्	अचोरयिष्यध्वम्	म॰ पु॰
	अचोरयिष्ये	अचोरयिष्यावहि	अचोरयिष्यामहि	उ॰ पु॰

(ग) समासचक्रम्

अथ प्रयोगविधिः

(१) षोढा समासः संक्षेपादष्टाविंशतिधा पुनः । नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा (२) तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः । सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा (३) द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः । तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् (४) चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः । यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः (५) कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः । कर्मकः कर्मशून्यः, कर्मद्वन्द्वो द्विकर्मकः ॥५॥

प्रयोगाः पञ्चविधाः । सकर्मकोऽकर्मकः कर्मणि भावे द्विकर्मकश्चेति भेदात् । सकर्मकप्रयोगो यथा-कृष्णो भक्तान् रक्षति । अकर्मकप्रयोगो यथा-कृष्णस्तिष्ठति । कर्मणि प्रयोगो यथा-विष्णुना प्रपञ्चः क्रियते । भावे प्रयोगो यथा-कृष्णेन स्थीयते । द्विकर्मकप्रयोगो यथा-धरामन्नं दुदोह ।

इति प्रयोगविधिः

अथ समासविधिः

समासाः षड्विधाः । तत्पुरुषः कर्मधारयो बहुव्रीहिर्द्विगुर्द्वन्द्वोऽव्ययीभावश्चेति भेदात् । तल्लक्षणानि तु-पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थ प्रधानस्तत्पुरुषः । उभयपदार्थप्रधानो द्वन्द्वः । अन्यपदार्थप्रधानो बहुव्रीहिः । द्विगुकर्मधारयौ तत्पुरषभेदौ । समासार्थावबोधकं वाक्यं विग्रह इति । तत्राष्टधा तत्पुरुषः-प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्तत्पुरुषश्चेति । तत्र प्रथमान्ततत्पुरुषोयथा अर्धं पिप्पल्याः अर्धपिम्पली । पूर्वं कायस्येति पूर्वकायः ॥ द्वितीया तत्पुरुषो कृष्णं श्रितः कृष्णश्रितः । ग्रामं गतो ग्रामगतः । कान्तारमतीतः कान्तारातीतः । तृतीयतत्पुरोषो यथा शङ्कुलया खण्डः शङ्कुला-खण्डः । मासेन पूर्वो मासपूर्वः । चतुर्थीतत्पुरुषः यथा-यूपाय दारु युपदारु । कुण्डलाय हिरण्यं कुण्डलहिरण्यम् । गुरवे दक्षिणा गुरुदक्षिणा । पञ्चमीतत्पुरुषो यथा-अर्थात् अपेतः अर्थापेतः । सिंहात् भयं सिंहभयम् । वृश्चिकात् भीः वृश्चिकभीः । षष्ठीतत्पुरुषो

यथाकृष्णस्य भक्तः कृष्णभक्तः । आम्रस्य फलम् आम्रफलम् । राज्ञः पुरुषो राजपुरुषः । सप्तमीतत्पुरुषो यथा-अक्षेषु शौण्डः अक्षशौण्डः । कर्मणि कुशलः कर्मकुशलः । विद्यायां निपुणः विद्यानिपुणः । नञ्तत्पुरुषो यथा-नब्राह्मणः अब्राह्मणः । न बृषभः अवृषभः । पापाभावः अपापम् । धर्मविरुद्धोऽधर्मः ।

अथ कर्मधारयः

(स च विशेषपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपदः सम्भावनापूर्वपदोऽवधारणापूर्वपदश्चेति भेदात्सप्तविधः तत्र (१) विशेषणपूर्वपदः कर्मधारयो यथा-कृष्णश्चासौ सर्पश्च कृष्णसर्प :।) कृष्णौ च तौ सर्पौ च कृष्णसर्पौ । कृष्णाश्च ते सर्पाश्च कृष्णसर्पाः । रक्ता चासौ लता च रक्तलता । रक्ते च ते लते च रक्तलते । रक्ताश्च ताः लताश्च रक्तलताः । नीलं च तत् उत्पलं च नीलोत्पलम् । नीले च ते उत्पले च नीलोत्पले । नीलानि च तानि उत्पलानि च नीलोत्पलानि । (२) विशेष्यपूर्वपद : कर्मधारयो यधा-वैयाकरणश्चसौ खसूचिश्च वैयाकरणखसूचिः । गोपालश्चाऽसौ बालश्च गोपालबालः । (३) विशेषणोभयपद : कर्मधारयो यथा-शीतं च तत् उष्णं च शीतोष्णम् । (४) उपमानपूर्वपद : कर्मधारयो यथा-मेघ इव श्यामो मेघश्यामः । कम्बुवत् ग्रीवा कम्बुग्रीवा । चन्द्रवत् मुखं चन्द्रमुखम् । (५) उपमानोत्तरपद : कर्मधारयो यथा-पुरुषः व्याध्र इव पुरुषव्याघ्रः । नरः सिंह इव नरसिंहः । (६) सम्भावनापूर्वपद : कर्मधारयो यथा-विद्यैव धनं विद्याधनम् । अविद्यैव शृङ्खला अविद्याशृङ्खला । (७) मध्यमपदलोपी समासो यथा-शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणः देवब्राह्मणः ।

इति कर्मधारयः ।

अथ बहुव्रींहिः

स च द्विपदो, बहुपदः, सहपूर्वपदः, संख्योत्तरपदः संख्योभयपदो, व्यतिहारलक्षणो, दिगन्तराललक्षणश्चेति भेदात्सप्तविधः । तत्र द्विपदबहुव्रीहिर्यथा चित्राः गावो यस्य सः चित्रगुः, गोपः । प्राप्तम् उदकं यं सः प्राप्तोदकः, ग्रामः । भुक्तम् ओदनं येन सः भुक्तोदनो, राजा । निर्जितः कामो येन सः निर्जितकामः, शिवः । विभक्तं धनं यैस्ते विभक्तधनाः बन्धवः । दत्तः सूपो यस्मै सः दत्तसूपो, ब्राह्मणः । उद्धृतं धनं यस्मात्तत् उद्धृतधनं, कुण्डम् । चक्रं पाणौ यस्य सः चक्रपाणिः हरिः । करे स्थितं धनं यस्य सः करस्थितधनो, वणिक् । पुष्पिताः द्रुमाः यस्मिन् सः पुष्पितद्रुमः, आरामः । बहवो यज्वानो यस्यां सा बहुयज्वा, शाला । पुष्पिताः द्रुमा तत् पुष्पितद्रुमं, वनम् ।

खरस्य मुखमिव मुखं यस्य सः खरमुखः, तुरंगः । उष्ट्रस्य मुखमिव मुखं यस्य सः उष्ट्रमुखो, यक्षः । उच्चैर्घटो यस्याः सा उच्चैर्घटा, नारी । अङ्गगात्रोदरस्तनकण्ठोष्ठ-दन्तमुखाक्षिकशाः स्त्रियां बहुब्रीहौ ईबन्ता भवन्ति । ते च यथा-सुन्दरम् अङ्गं यस्याः सा सुन्दराङ्गी । शोभनं गात्रं यस्याः सा सुगात्री । कृशम् उदरं यस्याः सा कृशोदरी । चारु स्तनौ यस्याः सा चारुस्तनी । इन्दीवरे इव अक्षिणी यस्याः सा इन्दीवराक्षी कम्बुरिव कण्ठो यस्याः सा कम्बुकण्ठी । कुटिलाः केशा यस्याः सा कुटिलकेशी । इतरेषाम् अङ्गादिवाचकानां स्त्रीत्वेऽपे आबन्तत्वमेव । चारुदेहा, विस्तृतालका, आवृतकुचा, कुन्ददशनेत्यादि । उरुपृथलघुबहुपटुऋजुस्वादुचारुमृदुशब्दानां स्त्रीलिङ्गविशेषणत्वे ईबन्तत्वमपि । यथा-मृद्वी शाटी, लघ्वी भाषेत्यादि । इति द्विपदबहुव्रीहिः । बहुपदो यथा-अधिकः उन्नतः अंसो यस्य सः अधिकोन्नतांसः । सहपूर्वपदो यथा-सह कृष्णेन वर्तत इति सकृष्णः । सह पुत्रेणेति सपुत्रः । रामेण सह वर्तत इति सरामः । संख्योत्तरपदो यथा-दसानां समीपे ये सन्ति ते उपदशाः, संख्यो भयपदो यथा-द्वौ वा त्रयो वा द्वित्राः । व्यतिहारलक्षणो यथा-केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति केशाकेशि युद्धम् । दण्डैर्दण्डैः कृत्वा इदं युद्ध प्रवृत्तम् इति दण्डादण्डि । दिगन्तराललक्षणो यथा-दक्षिणास्याः पूर्वस्याश्च दिशाऽन्तरालम् दक्षिणपूर्वा । इति बहुव्रीहिः ।

अथ द्विगुः

द्विगुसमासो द्विविधः- इतरेतरयोगसमाहारभेदात् । इतरेतरयोगद्वन्द्वो यथा-प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । रामश्च कृण्णश्च रामकृष्णौ । समाहारद्वन्द्वो यथा-हरिश्च हरश्च गुरुश्च एषा समाहारः हरिहरगुरवः । प्राणितूर्यसेनाङ्गानां द्वन्द्वैकवद्भावः प्राणी यथा पाणौ च पादौ च मुखं च पाणिपादमुखम् । तूर्याङ्गे यथा-मार्दङ्गिकश्च वैणविकश्च मार्दङ्गिकवैणविकम् । शङ्खश्च पटहश्च शङ्खपटहम् । सेनाङ्गे यथा-राजन्याश्च रथाश्च अश्वाश्च राजन्यरथाश्वम् ।

अथाऽव्ययीभ५ाव:

स यथा-तटं तटं प्रत्यनुतटम् । गिरिं गिरिं प्रत्यनुगिरि । क्रममनतिक्रम्य वर्तत इति यथाक्रमम् । वेलायामित्यधिवेलम् । कुम्भस्य समीपे वर्तत इत्युपकुम्भम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्य अत्ययः अतिहिमम् । अव्ययीभावस्याव्ययत्वात्त्रिषु लिङ्गेषु समानरूपम् । इति षट् समासा निर्णीताः ।

अथ अलुक्समासो लुक्समासश्च ।

लुक्समासो यथा-तनुरेव लता तनुलता । कृष्णा एव मेघाः कृष्णमेघाः ।

अलुक्समासो यथा-वने चरति वनेचरः । पङ्के रोहतीति पङ्केरुहम् । मत्वर्थीयो यथा बुद्धिरस्यास्तीति बुद्धिमान् । धनमस्यास्तीति धनवान् । धीरस्य भावो धीरता । जनानां समूहो जनता । घटस्य भावो घटत्वम् ।

वृक्षशाखा तत्पुरुषः । श्वेताश्वः कर्मधारयः । रक्तवस्त्रो बहुव्रीहिर्द्वन्द्वश्चन्द्र-दिवाकरौ ॥१॥ निर्देशे प्रथमा प्रोक्ता । सैव चामन्त्रणेष्वपि । द्वितीया कर्मणि प्रोक्ता तृतीयाऽनुक्तकर्त्तरि । करणे हेतावपि ज्ञानज्ञाप्येऽङ्गविकृतौ तथा ॥२॥ तादर्थ्ये सम्प्रदाने च चतुर्थी स्याच्च सर्वदा ॥३॥ हेत्वपादानयोः पञ्चमी, षष्ठी कर्तृकर्मणोः । अधिकरणनिमित्तत्त्वे सप्तमी विषयेऽपि च ॥४॥ प्रथमा कर्तरि यदा द्वितीया कर्मणि तदा तृतीया कर्तरि यदा कर्मणि प्रथमा तदा ॥५॥ विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरम् । कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणम् ॥६॥

प्रथमान्तस्तृतीयान्तः षष्ठयन्तः कर्ता । द्वितीयान्तं षष्ठ्यन्तं कर्म । तृतीयान्तं करणम् । चतुर्थ्यन्तं सम्प्रदानम् । पञ्चम्यन्तमपादानम् । षष्ठ्यर्थः सम्बन्धः । सप्तम्यन्तमधिकरणम् ।

(ઘ) લૌકિક સંસ્કૃત વ્યાકરણના ઉજ્જવલ પ્રણેતા શ્રીપાણિનિ :

સંસ્કૃતભાષાની શ્રેષ્ઠતા આજે પણ સિદ્ધ છે - પ્રસિદ્ધ છે. અત્યંત આધુનિક ગણાતી અંગ્રેજીભાષા પણ તેની અનિયતતાને લીધે, કૉમ્પ્યુટરનાં કોડ સૂત્રોમાં બહુ ઉપયોગી થતી નથી ! જ્યારે સંસ્કૃતભાષા આજે પણ તેટલી જ સક્ષમપણે ઉપયોગી અનુભવાય છે ! એમ વૈજ્ઞાનિકો કહે છે.

ભાષા-વાણિનો ઉદ્‌ગમ નાભિ થી થાય. ચાર પ્રકારની ભાષા-વાણિ કહેલી છે. પરા-પશ્યન્તિ-મધ્યમા અને વૈખરી ! નાભી-મૂલાધારથી ઉદ્‌ભવે તે પરાવાણી. હૃદયમાંથી ઉદ્‌ભવે તે પશ્યન્તિવાણી. કંઠમાંથી ઉદ્‌ભવે તે મધ્યમાવાણી અને મુખ દ્વારા-ઓષ્ઠથી પ્રગટ થતી વિશેષ સ્પષ્ટ વાણી તે વૈખરી !

મૂલ-પ્રાચીન-વૈદિક સંસ્કૃતભાષા હતી. કાલક્રમે તે દુર્બોધ થતી ગઈ. તેને લૌકિક વ્યાકરણ સંસ્કારથી પરિષ્કૃત કરી. તે લોક-પ્રસિદ્ધ સંસ્કૃત ભાષા થઈ. અનેક આચાર્યોએ તેમાં પોતાનું પ્રદાન કરેલું છે. ઈતિહાસમાં તે બધા પ્રસિદ્ધ છે. મુખ્ય મુનિત્રય ગણાય છે. (૧) પાણિનિ (૨) કાત્યાયન

(૩) પતંજલિ ! તેમાં પાણિનિની કથા લોક-પ્રરોચક અને પ્રેરક છે.

કોઈ અનુશ્રુતિ છે. પાણિનિ ગુરુકુલમાં ભણતા હતાં. ગુરુ-શિષ્યનાં પુષ્કળ પ્રયત્નો છતાં વિદ્યાલાભ ન થયો. વિદ્યા વગરતો જીવન વસમું લાગે. મરવાની ઈચ્છા થઈ. છોકરો હિમાલય તરફ ચાલ્યો. રસ્તે ગામડું આવ્યું. તરસ ખૂબ લાગેલી. કૂવાના થાળે પનિહારીઓ પાણી ભરે. કોઈ એક પાસે પાણી માંગ્યું. બાઈને દયા આવી. ખોબલામાં પાણી રેડવા માંડ્યું. વિકલ વિદ્યાર્થી તરસ છતાં પાણી પી શકતો ન હતો ! મરવાની મૂંઝવણ હતી ! બાઈએ કહી દીધું; "પાણી કાઢતાં મહેનત પડે છે, વેડફીશ નહિ !" આવાં ઉપાલંભથી વિદ્યાર્થીનું ઘવાયેલું હૃદય ઊભરાયું. રડી પડ્યો ! બાઈને દયા આવી, કારણ પૂછ્યું. સહાનુભૂતિ દર્શાવનાર મળતાં વિદ્યાર્થીએ પોતાની વ્યથા કહી,- "ભણતાં ન આવડ્યું, મરવા જાઉં છું !" ગામડાની ગમાર બાઈને કોઠાસૂઝ ઝાઝી ! તેણે કહ્યું - "આમ આવ !" કૂવા પર પથ્થરની છાટ મુકેલી તેનાં ઉપર દોરડું સરકાવીને કૂવામાંથી પાણી કાઢે, પથ્થરતો કઠોર, દોરડું તો કોમળ ! છતાં વારંવાર એક સ્થળે ઘસાવાથી પથ્થર પર કાપાં પડેલા બાઈએ તે બતાવ્યા. "પથ્થરમાં કાપા પડી શકે તો બુદ્ધિમાં કેમ નહિ ? વારંવાર ભણ્યા કરવાનું !" ગામડાંની બાઈ પાસેથી જાણે માર્ગદર્શન મળી ગયું. મરવાનો વિચાર માંડી વાળ્યો. છોકરો હિમાલયમાં આવ્યો. શિવજીનું આરાધન કર્યું. આશુતોષ શિવજી પ્રસન્ન થયા ! નૃત્ય કર્યું ! અંતે સનકાદિ સિદ્ધોનો ઉદ્ધાર કરવાની ઈચ્છાથી ચૌદ વાર ડમરું બજાવ્યું ! તેના વિચારમાંથી વ્યાકરણ સૂત્રો થયાં, જેને "માહેશ્વર સૂત્રો" કહે છે. ("પ્રત્યાહાર"માં તે ઉપયોગી છે.) તેમાંથી પાણિનિએ પોતાનું વ્યાકરણ શાસ્ત્ર રચ્યું. સનતકુમારોએ તે નાદમાંથી મોક્ષ જ્ઞાન મેળવ્યું. તે અર્થ "કાશિકા-વૃત્તિ"માં હોવાનું સંભળાય છે !

"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद् विमर्शे शिवसूत्रजालम् ॥"

—પ્રસિધ્ધ છે.

આ પાણિનિ ઈ.સ. પૂર્વે ૫૦૦ વર્ષ પહેલાં થયા હોવાનું જણાય છે. આ પાણિનિના બીજા નામ પણ મળે છે. પાણિન્-દાક્ષીપુત્ર-શાલંકિ-શાલાતુરીય-આહિક ! પાણિનિના પિતાનું નામ "શલંક" અને માતાનું નામ "દાક્ષી" જણાય છે ! "પાણિનિ" તેમનાં કુલનું નામ હતું ! "પાણિન્" ઋષિના પુત્ર પાણિનિ હતાં તેવો પણ મત છે ! "છંદઃશાસ્ત્ર"ના રચયિતા પિંગલ ઋષિ, પાણિનિના નાનાં ભાઈ હતાં. પાણિનિના ગુરુ "વર્ષ" હતાં તેમ જણાય છે.

(ઙ) માહેશ્વર સૂત્રો, પાણિનીય શિક્ષા અને વર્ણસ્વરૂપજ્ઞાન :

'અષ્ટાધ્યાયી'ના આરંભમાં જ 'अथ शब्दानुशासनम्' એવો સૂત્રાત્મક નિર્દેશ કરી પોતાના શાસ્ત્રના માંગલિક આરંભ માટે મંગલાચરણ સૂચક 'अथ' પદ અને શાસ્ત્રના વિષયનું નિર્દેશક 'शब्दानुशासनम्' એવું પદ પાણિનિએ પ્રયોજ્યું છે. એમાંના 'अथ' પદ દ્વારા નવા શાસ્ત્રનો અધિકાર, અર્થાત્ આરંભ અને એની પાછળનાં પ્રયોજનો પણ સૂચવાયાં છે, પાણિનિરચિત આ 'શબ્દાનુશાસન', અર્થાત્ અષ્ટાધ્યાયી-વ્યાકરણ, રચના પાછળ અભિપ્રેત પ્રયોજનો વિષે સ્પષ્ટતા કરતાં પતંજલિએ મહાભાષ્યના પ્રથમ 'પસ્પશ-આહ્નિક'માં સૂત્રાત્મક શૈલીએ 'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' એમ કહ્યું છે પછી આ ઉક્તિના પ્રથમ સામાસિક પદમાંના રક્ષા, ઊહ, આગમ, લઘુ અને અસંદેહ એ અંશોનું ક્રમાનુસાર વિવરણ કર્યું છે.

આ 'શબ્દાનુશાસન' નામનું શાસ્ત્ર છે. એમાં 'શબ્દ'નું અર્થાત્ વાક્યજનક પદોને લગતું, 'અનુશાસન' અર્થાત્ શાસ્ત્રીય વિશ્લેષણ વિષે વ્યવસ્થિત ઉપદેશ, કરવામાં આવ્યો છે. આ શાસ્ત્રમાં જેનું શાસ્ત્રીય વિશ્લેષણ કરવામાં આવ્યું છે. તે 'શબ્દ' લૌકિક અને વૈદિક બંને પ્રકારનો લેવામાં આવ્યો છે. અર્થાત્ આ અષ્ટાધ્યાયી-વ્યાકરણમાં પ્રશિષ્ટ સાહિત્યમાં પ્રયોજાયેલી લૌકિક સંસ્કૃત ભાષા અને સાથે સાથે વૈદિક સાહિત્યમાં પ્રયોજાયેલી વૈદિક સંસ્કૃત ભાષા, એ ઉભયવિધ 'શબ્દ'નું

શાસ્ત્રદષ્ટિએ વિવરણ છે. આ વિવરણ કરવા માટે 'શબ્દ'ના 'પ્રકૃતિ' અને 'પ્રત્યય' એમ બે વિભાગો પાડવાની પદ્ધતિ સ્વીકારવામાં આવી છે અને પછી એ બે વિભાગોને લગતા 'ઉત્સર્ગ' અર્થાત્ મુખ્ય નિયમો અને તેમાંના 'અપવાદ' અર્થાત્ એ નિયમ ન લાગુ પડે તેવા કિસ્સા, નિરૂપવાની શૈલી અપનાવવામાં આવી છે.

ગ્રંથારંભ સૂત્ર પછી પાણિનિએ માહેશ્વર, અર્થાત્ એક અતિ પ્રૌઢ પ્રાચીન વૈયાકરણની પરંપરામાંથી મળેલાં, ચૌદ 'પ્રત્યાહારસૂત્રો' અર્થાત્ 'પ્રત્યાહાર' બનાવવામાં ઉપયોગી સૂત્રો નિર્દેશ્યાં છે એવો પણ મત છે. આ સૂત્રોમાં સંસ્કૃત ભાષાના મૂળભૂત ધ્વનિઓનો સંક્ષેપમાં છતાં ખૂબ વ્યવસ્થિત અને પ્રયોજનાનુસારી ક્રમમાં નિર્દેશ કર્યો છે. આ સૂત્રોમાંનાં (૧) अइउण्, (૨) ऋलृक्‌એ બે માં अ, इ, उ, ऋ અને लृ એમ હ્રસ્વ સ્વર વર્ણોનો, (૩) एओङ्‌અને (૪) ऐऔच्‌ એ બે સૂત્રોમાં ए ओ ऐ અને औ એ મિશ્ર સ્વરવર્ણોનો, (૫) हयवरट् અને (૬) लण् એ બે સૂત્રોમાં વિસર્ગ (:) અને य, व, र અને ल એ અંતઃસ્થ વર્ણોનો, (૭) ञ म ङ ण न म् એ સૂત્રમાં વર્ગસ્થ પાંચમા વ્યંજનોનો, (૮) झभञ् અને (૯) એ બે घढधष् સૂત્રોમાં વર્ગસ્થ ચોથા વ્યંજનોનો, (૧૦) जबगडदश् એ સૂત્રમાં વર્ગસ્થ ત્રીજા વ્યંજનોનો (૧૧) खफछठथचटतव् અને (૧૨) कपय् એ બે સૂત્રોમાં અનુક્રમે વર્ગસ્થ બીજા અને પહેલા વ્યંજનો અને સૂત્ર (૧૩) शषसर् અને (૧૪) हल् માં ઉષ્મવ્યંજનોનો ક્રમ ગોઠવ્યો છે, અને આમાંના દરેક સૂત્રને અંતે અનુક્રમે ण्, क्, ङ्, च्, ट् વગેરે 'ઈત્'-સંજ્ઞક વર્ણો મૂક્યા છે. ઉપરોક્ત સૂત્રમાંના ગમે તે એક વર્ણની સાથે તે પછી આવતા કોઈપણ ઈત્-સંજ્ઞક વર્ણને જોડીને अच्, इण्, हल, झष्, जश्, खय् વગેરે એકાક્ષરી પ્રત્યાહારો બને છે અને એમની મદદથી એ વર્ણ તથા ઈત્-સંજ્ઞક વર્ણ સુધીના બધા જ વર્ણોનો નિર્દેશ કરવાની લાઘવભરી યુક્તિ પાણિનિએ સૂત્રોમાં પ્રયોજી છે. આ માટે અષ્ટાધ્યાયીમાં 'ઈત્' સંજ્ઞા પ્રકરણની રચના કરવામાં આવી છે.

અષ્ટાધ્યાયીમાંના માહેશ્વર સૂત્રોની રચના તો 'પ્રત્યાહાર' બનાવવા માટે જ કરવામાં આવી છે. છતાં પાણિનીય વ્યાકરણના સમ્યક્ જ્ઞાન અને લૌકિક સંસ્કૃત ભાષામાં વપરાતા પાયાના વર્ણોનું શુદ્ધ ઉચ્ચારણ શીખવા માટે 'પાણિનીય શિક્ષા' નામે ઓળખાતા ગ્રંથમાંથી સંસ્કૃત ધ્વનિવ્યવસ્થા વિષેની જરૂરી માહિતી સંક્ષેપમાં નીચે આપી છે :

વૈદિક અને લૌકિક સંસ્કૃતમાં મળીને કુલ વર્ણો, તેમની ઉત્પત્તિને અનુલક્ષીને, ત્રેસઠ કે ચોસઠ છે. એમાં અ, ઈ, ઉ, ઋ એમ ચાર સ્વરોના દરેકના હ્રસ્વ, દીર્ઘ અને પ્લુત મળીને બાર, એક હ્રસ્વ લૃ, અને એ, ઐ, ઓ, ઔ દરેકના દીર્ઘ અને પ્લુત મળીને આઠ ; આ રીતે કુલ એકવીસ સ્વરો થયા. ક, ખ, ગ, ઘ, ઙ, (=ક વર્ગ) ; ચ, છ, જ, ઝ, ઞ્ (=ચ વર્ગ) ; ટ, ઠ, ડ, ઢ, ણ (=ટ વર્ગ); ત, થ, દ, ધ, ન (=ત વર્ગ); પ, ફ, બ, ભ, મ (=પ વર્ગ); આમ પાંચ વર્ગીય વ્યંજનોરૂપ સ્પર્શ વર્ણો પચીસ છે. ય, ર, લ, વ, એ ચાર અંતઃસ્થ વર્ણો અને શ, ષ, સ, હ એ ચાર ઉષ્ણ વર્ણો, તથા કવર્ગીય પ્રથમ ચાર વ્યંજનોમાંના ગમે તે સ્પર્શવર્ણ પછી વર્ગીય પંચમ વર્ણ આવતાં પૂર્વ વર્ણ બેવડાય છે, જેમ કે 'पलिक्क्नीः', 'चख्ख्नतुः', 'अग्ग्निः', 'घ्घ्नन्ति', વગેરેમાં આ રીતે વધારાનો જે એક જોડીયો વર્ણ ઉમેરાય તેને 'યમ' કહે છે. આવા 'યમ' વર્ણો ચાર છે. પછી અનુસ્વાર (અક્ષરની ઉપર મીંડા કે ટપકા તરીકે મૂકવામાં આવતો), વિસર્ગ (:), જિહ્વામૂલીય (જીભના મૂળમાંથી ઉચ્ચારાતો ક) અને ઉપધ્માનીય (વધુ બળવાન પ્રયત્નથી ઉચ્ચારાતો પ) એ ચાર; અને ફ; આ રીતે કુલ મળીને ૨૧+૨૫+૪+૪ +૪+૪+૧=૬૩ વર્ણો થાય છે. એમાં કવચિત્ પ્લુત લૃ પણ ઉમેરીએ તો વર્ણસંખ્યા ૬૪ થશે.

આ વર્ણોને સ્વરભાર, ઉચ્ચારણકાળ, ઉચ્ચારણસ્થાન, આભ્યંતર ઉચ્ચારણ પ્રયત્ન અને બાહ્ય ઉચ્ચારણ પ્રયત્ન એમ પાંચ દૃષ્ટિબિંદુઓથી અલગ અલગ પાંચ વિભાગોમાં વહેંચવામાં આવે છે.

દરેક સ્વરનું અંગોના ખેંચાણપૂર્વક ઉચ્ચ રીતે, અંગોના શિથિલી-

કરણપૂર્વક નીચેથી, અને એ બંને પ્રક્રિયાના મિશ્રણથી એમ ત્રિવિધ રીતે ઉચ્ચારણ થઈ શકે છે અને તે અનુસાર તે સ્વરભારને અનુક્રમે ઉદાત્ત, અનુદાત્ત અને સ્વરિત કહેવામાં આવે છે. આ સ્વરભારને અનુસરીને વિભાજન છે.

દરેક સ્વરનું એકમાત્રિક, દ્વિમાત્રિક અને ત્રિમાત્રિક ઉચ્ચારણ થઈ શકે છે. જેને અનુક્રમે હ્રસ્વ, દીર્ઘ અને પ્લુત તરીકે ઓળખવામાં આવે છે. આ કાલાનુસારી વિભાજન થયું.

સંસ્કૃત ભાષામાં પ્રયોજાતા વર્ણોનાં ઉચ્ચારણસ્થાન છે. મૂર્ધા, દાંત, ઓઠ, જીવ્હામૂળ અને ઉપધ્મા. દરેક વર્ણનું તેની ઉત્પત્તિના સ્થાનને અનુલક્ષીને વર્ગીકરણ થઈ શકે છે. જેમકે, અ, કવર્ગ, હ, વિસર્ગ એ કંઠ્ય વર્ણો છે; ઈ, ચવર્ગ, ય અને શ એ તાલવ્ય વર્ણો છે; ઋ, ટવર્ગ, ર, ષ એ મૂર્ધન્ય વર્ણો છે, લૃ, તવર્ગ, લ, સ એ દંત્ય વર્ણો છે; ઉ, પવર્ગ, ઉપધ્માનીય એ ઓષ્ઠ્ય વર્ણો છે; ઙ, ઞ, ણ, ન, મ એ નાસિક્ય વર્ણો છે; વ એ દંતોષ્ઠ્ય વર્ણ છે, અનુસ્વાર એ અનુનાસિક વર્ણ છે. અને છેલ્લે જિહ્વામૂલીય વર્ણ છે. ≍ क ≍ ख

આભ્યંતર પ્રયત્નો પાંચ છે : સ્પૃષ્ટ, ઈષત્-સ્પૃષ્ટ, ઈષદ્-વિવૃત, વિવૃત અને સંવૃત. એને અનુસરીને વર્ગીય વ્યંજનોને ઈષદ્-વિવૃત વર્ણો અને સ્વરોને વિવૃત વર્ણો કહેવાય છે. પ્રત્યક્ષ ભાષામાં 'અ' એ સ્વર સંવૃત પ્રયત્ન વાળો ઉચ્ચારાય છે, પરંતુ વ્યાકરણશાસ્ત્રમાં કાર્યો માટે સગવડ રૂપે તેને વિવૃત જ ગણી લઈને નિયમોનું વિધાન કરવામાં આવ્યું છે.

બાહ્યપ્રયત્નો અગિયાર છે : વિવાર, સંવાર, શ્વાસ, નાદ, ઘોષ, અઘોષ, અલ્પપ્રાણ, મહાપ્રાણ, ઉદાત્ત, અનુદાત્ત, સ્વરિત. એને અનુસરીને વિભાજન કરતાં વર્ગીય વ્યંજનોમાંથી દરેક વર્ગના પહેલા અને બીજા સ્પર્શવર્ણો, તેમના યમવર્ણો, વિસર્ગ, શ, ષ, સ, જિહ્વામૂલીય

અને પ્રથમ દ્વિતીય સ્પર્શવર્ણોના યમ આટલા વર્ણોનો બાહ્ય પ્રયત્ન વિવાર, શ્વાસ અઘોષ છે. જ્યારે વર્ગીય વ્યંજનોમાંના ત્રીજા અને ચોથા, તેમના યમવર્ણો, અનુસ્વાર અને નાસિક્ય વર્ણોનો બાહ્ય પ્રયત્ન સંવાર, નાદ, ઘોષ છે.

દરેક વર્ગીય સ્પર્શવર્ણોમાંના પહેલા અને ત્રીજા તથા પાંચમા વર્ણોનો બાહ્ય પ્રયત્ન અલ્પપ્રાણ છે, જ્યારે બીજા અને ચોથા વર્ણોનો બાહ્ય પ્રયત્ન મહાપ્રાણ છે.

દરેક સ્વરનો બાહ્ય પ્રયત્ન ઉદાત્ત, અનુદાત્ત કે સ્વરિત હોઈ શકે છે. અને એ સ્વરની સાથે એક કે વધુ વ્યંજનો જોડાય તોપણ તે સ્વરને અનુસરીને જ બાહ્ય પ્રયત્ન ગણાય છે. દરેક સ્વરના હ્રસ્વ, દીર્ઘ, પ્લુત, ઉદાત્ત, અનુદાત્ત, સ્વરિત, અનુનાસિક, અનનુનાસિક એમ પરસ્પર મિશ્રણ દ્વારા પેટા પ્રકારો પડે છે.

ઉપર જણાવેલ વર્ગીકરણ પ્રથમ નજરે જ સ્પષ્ટ થઈ શકે તે રીતે નીચેનાં ત્રણ કોષ્ઠકોમાં જોઈ શકાશે :

૧. દરેક સ્વરના અઢાર પ્રકારોનું કોષ્ટક

અ ઈ ઉ ઋ લૃ	અ ઈ ઉ ઋ એ ઓ ઐ ઔ	અ ઈ ઉ ઋ એ ઓ ઐ ઔ
હ્રસ્વ પ્રકારો	દીર્ઘ પ્રકારો	પ્લુત પ્રકારો
૧ ઉદાત્ત-અનુનાસિક	૭ ઉદાત્ત-અનુનાસિક	૧૩ ઉદાત્ત-અનુનાસિક
૨ ઉદાત્ત-અનનુનાસિક	૮ ઉદાત્ત-અનનુનાસિક	૧૪ ઉદાત્ત-અનનુનાસિક
૩ ઉદાત્ત-અનુનાસિક	૯ અનુદાત્ત-અનુનાસિક	૧૫ અનુદાત્ત-અનુનાસિક
૪ અનુદાત્ત-અનનુનાસિક	૧૦ અનુદાત્ત-અનનુનાસિક	૧૬ અનુદાત્ત-અનનુનાસિક
૫ સ્વરિત-અનુનાસિક	૧૧ સ્વરિત-અનુનાસિક	૧૭ સ્વરિત-અનુનાસિક
૬ સ્વરિત-અનનુનાસિક	૧૨ સ્વરિત-અનનુનાસિક	૧૮ સ્વરિત-અનનુનાસિક

૨. આભ્યંતર અને બાહ્ય પ્રયત્નનું કોષ્ટક

આભ્યંતર પ્રયત્ન	સ્પષ્ટ	ઈષત્સ્પૃષ્ટ	ઈષદ્વિવૃત	વિવૃત	સંવૃત
સંજ્ઞા	સ્પર્શવર્ણો	અંતઃસ્થવર્ણો	ઉષ્મવર્ણો	ઉદાત્ત, અનુદાત્ત, સ્વરિત	
વ્યંજનો અને સ્વરો	ક ખ ગ ઙ ઘ પ ફ બ મ ભ ચ છ જ ઞ ઝ ટ ઠ ડ ણ ઢ ત થ દ ન ધ	ય વ ર લ	શ ષ સ હ	અ ઈ એ ઉ ઓ ઋ ઐ લૃ ઔ	અ હ્રસ્વ પ્રયોગમાં
બાહ્ય પ્રયત્નો	અલ્પ પ્રાણ મહા પ્રાણ અલ્પ પ્રાણ મહા પ્રાણ વિવાર સંવાર સંવાર શ્વાસ નાદ નાદ અઘોપ ઘોષ ઘોષ	અલ્પપ્રાણ સંવાર નાદ ઘોષ	મહાપ્રાણ વિવાર સંવાર શ્વાસ નાદ અઘોષ ઘોષ	અલ્પપ્રાણ સંવાર નાદ ઘોષ	અલ્પપ્રાણ સંવાર નાદ ઘોષ

૩. વર્ણોના ઉચ્ચારણસ્થાનનું કોષ્ટક :

કંઠ	તાલુ	મૂર્ધા	દંત	ઓઠ	નાસિકા	કંઠતાલ	કંઠોષ્ઠ	દંતોષ્ઠ	જિહ્વા મૂલ	નાસિકા
અ	ઈ	ઋ	લૃ	ઉ	મ					
ક	ચ	ટ	ન	પ	મ	એ	ઓ	વ	≍ક	—
ખ	છ	ઠ	થ	ફ	ઙ	ઐ	ઔ			
ગ	જ	ડ	દ	બ	ણ					
ઘ	ઝ	ઢ	ધ	ભ	ન					અનુ.
ઙ	ઞ	ણ	ન	મ						
હ	ય	ર	લ	≍પ						
:	શ	ષ	સ							

≍ક = જિહ્વામૂલીય વર્ણ; ≍પ= ઉપધ્માનીય વર્ણ

અષ્ટાધ્યાયીમાંના સંહિતા પ્રકરણને સમજવા માટે 'સવર્ણ' સંજ્ઞાની સમજણ જરૂરી થઈ પડે છે. અને 'સવર્ણ' સંજ્ઞાની સમજણ માટે વર્ણોના વર્ગીકરણને લગતી ઉપર દર્શાવેલી માહિતી જાણવી અનિવાર્ય થઈ પડે છે. ઉપરાંત આ માહિતીને આધારે અમુક વર્ણને સ્થાને સંધિમાં અમુક જ વર્ણ કેમ આવે છે તે સરળતાથી અને વૈજ્ઞાનિક રીતે સમજી શકાય છે.

(च) अथ संज्ञाप्रकरणम्

अइउण् १ । ऋलृक् २ । एओङ् ३ । ऐऔच् ४ । हयवरट् ५ । लण् ६ । अमङणनम् ७ । झभञ् ८ । घढधष् ९ । जबगडदश् १० । खफछठथचटतव् ११ । कपय् १२ । शषसर् १३ । हल् १४ । इति माहेश्वराणि सूत्राण्यणादिसंज्ञाऽर्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लणमध्ये त्वित्संज्ञकः ।

हलन्त्यम् १ । ३ । ३ ॥ उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ।

अदर्शनं लोपः १ । १ । ६० ॥ प्रसक्तस्याऽदर्शनं लोपसंज्ञं स्यात् ।

तस्य लोपः १ । ३ । ९ ॥ तस्येतो लोपः स्यात् । णादयोऽणाद्यर्थाः ।

आदिरन्त्येन सहिता १ । १ । ७१ ॥ अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथा-'अण्'-इति अइउवर्णानां संज्ञा । एवमच्हल्-अलित्यादयः ।

ऊकालोऽज्झ्रस्वदीर्घप्लुतः १ । २ । २७ ॥ उश्च[१] ऊश्च[२] ऊश्च[३] वः, वां कालो इव कालो यस्य सोंऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादि-भेदेन त्रिधा ।

उच्चैरुदात्तः १ । २ । २९ ॥ [ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽ-जुदात्तसंज्ञः स्यात् ।]

नीचैरनुदात्तः १ । २ । ३० ॥ [ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽ-जुदात्तसंज्ञः स्यात् ।]

समाहारः स्वरितः १ । २ । ३१ ॥ [उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् ।] स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा ।

मुखनासिकावचनोऽनुनासिकः १ । १ । ८ ॥ मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् । तदित्थम् - अ इ उ ऋ एषां वर्णानाप्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात् ।

तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ ॥ ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् । (ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्) । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य । यत्नो

द्विधा-आभ्यन्तरो, वाह्यश्च । आद्यः पञ्चधा-स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्ट प्रयत्नं-स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं-स्वराणाम् । ह्रस्वस्याऽवर्णस्य प्रयोगे-संवृतम् । प्रक्रियादशायां तु विवृतमेव । बाह्यप्रयत्नस्त्वेकादशधा । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो-विवाराः श्वासा अघोषाश्च । हशः-संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाऽल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तः स्थाः । शल ऊष्माणः । अचः स्वराः । ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः 'अं', 'अः' इत्यचः परावनुस्वारविसर्गौ ।

अणुवित्सवर्णस्य चाऽप्रत्ययः १ । १ । ६९ ॥ प्रतीयते-विधीयते-इति प्रत्ययः । अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रैवाऽण् परेण कारेण । कु चु टु तु पु एते उदिताः । तदेवम्-अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः एवम्-लृकारोऽपि । एचो द्वादशानाम् । अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेनाऽननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा ।

परः सन्निकर्षः संहिता १ । ४ । १०९ ॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

हलोऽनन्तराः संयोगः १ । १ । ७ ॥ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ।

(૭) સંહિતા, તેનું પ્રયોજન અને સન્ધિના પ્રકારો :

આપણે ભાષા બોલીએ ત્યારે વાક્યોમાંના શબ્દોનું સળંગ ઉચ્ચારણ કરીએ છીએ. વેદો, દર્શનો, ઈતિહાસપુરાણ, કથા, આખ્યાયિકા, મહાકાવ્ય, ખંડકાવ્ય, મુક્તક કાવ્ય, નાટકો, બાલનીતિ કથાઓ, વગેરે સર્વ પ્રકારના સંસ્કૃત ગ્રંથોમાં હંમેશાં સન્ધિ થયેલી જોવા મળે છે; આ સન્ધિ માત્ર પદો વચ્ચે જ નહીં બલકે વાક્યો વચ્ચે પણ થયેલી હોવાનું પ્રાચીન હસ્તલિખિત ગ્રંથોમાં જોવા મળે છે. આ કારણે 'સંહિતા', અર્થાત્ સન્ધિ, એ સંસ્કૃતભાષામાં ખૂબ અગત્યનો વિષય ઠરે છે; અને એની જાણકારી વગર સંસ્કૃતભાષા સમજવામાં ખૂબ મોટું વિઘ્ન આવી પડે છે.

પાણિનિએ અષ્ટાધ્યાયીમાં 'સંહિતા' સંજ્ઞા પર સંનિકર્ષ અર્થાત્ 'વર્ણોનું એકબીજા સાથે અતિશય સામીપ્ય' એ અર્થમાં પ્રયોજી છે. દા.ત.

क् ऋ ष् ण् अः એ વર્ણો એકબીજા સાથે અતિશય સામીપ્ય રહીને ઉચ્ચારાય ત્યારે વર્ણોની 'સંહિતા' થઈને कृष्णः એમ શબ્દ બને છે. વર્ણો આ રીતે એક બીજા સાથે આવવાથી તેમનામાં જે ફેરફારો થાય છે તેમને આપણે 'સન્ધિ' નામે ઓળખીએ છીએ; પાણિનિએ 'સંહિતા' શબ્દમાં સન્ધિનો સમાવેશ કરી લીધો છે. આ ઉપરાંત પાણિનિએ વચમાં સ્વરના વ્યવધાન વગર એકબીજાની ખૂબ નજીક આવેલા વ્યંજનો માટે 'સંયોગ' શબ્દ વાપર્યો છે. જેમ કે, ष् + ण् + अ = ष्ण, त् + स् + न् + य् + अ = त्सन्य વગેરેમાં. આ 'સંયોગ'ની પરિસ્થિતિને લીધે વ્યંજનોમાં જે ફેરફારો થાય તે પણ 'સન્ધિ' જ છે અને 'સંહિતા'માં તેનો પણ સમાવેશ થઈ જાય છે.

પ્રાચીન વ્યવહારને બાજુમાં રાખીને વ્યાકરણ દૃષ્ટિએ સન્ધિ કયા સંજોગોમાં જરૂરી છે અને ક્યાં સ્વૈચ્છિક છે તે દર્શાવતી વૈયાકરણોની નીચેની કારિકા ખૂબ પ્રચલિત છે :

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

આ કારિકા જણાવે છે કે દરેક અખંડપદની અંતર્ગત સન્ધિ કાયમ થયેલી હોવી જોઈએ. અર્થાત્ પ્રાતિપદિક કે ધાતુને વિભક્તિના કે પુરુષ, કાળ વગેરેના પ્રત્યયો લાગે ત્યારે તેમની વચ્ચે સન્ધિ થવી જ જોઈએ. ધાતુની પૂર્વે ઉપસર્ગ આવે તો તે બંને વચ્ચે પણ સન્ધિ અવશ્ય થવી જોઈએ. બે કે વધુ પદો સમાસ રૂપે જોડાઈને એક પદરૂપ બને ત્યારે તે પદો વચ્ચે પણ સન્ધિ થવી અનિવાર્યપણે જરૂરી છે. પરંતુ વાક્યમાંના પદો વચ્ચે સન્ધિ કરવી કે ન કરવી એ વક્તાની ઈચ્છા ઉપર નિર્ભર છે; વક્તા પોતે ઈચ્છે ત્યાં વાક્યમાં જોઈએ તે રીતે વિરામ કરી શકે છે. અને એવો વિરામ થાય ત્યારે પદો વચ્ચે સંહિતા, અર્થાત્ સન્ધિ, નહીં થાય. સામાન્યતઃ વક્તા વાક્યમાં ક્લિષ્ટતા કે અસ્પષ્ટતા નિવારવા જ વિરામ કરતો હોય છે અને આવા વિરામ સામાન્યતઃ બે ત્રણ સ્થાને જ આવી શકે છે. શ્લોકમાં બીજા અને

ચોથા પાદ પછી વિરામ આવે છે. જ્યાં જ્યાં વિરામ આવે ત્યાં સન્ધિ નથી થતી. વાક્યભેદ થવા છતાં પણ સન્ધિ થતી હોવાના દાખલા ઉપનિષદોમાં જોવા મળે છે. જેમ કે सोऽहं भगवते सहस्त्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति (બૃ.ઉપ. ૪.૩.૧૫). ઉપનિષદોની મધુર સરલ રચના ગુરુશિષ્ય સંવાદ રૂપે તે જમાનાની બોલચાલની જીવંત સંસ્કૃતભાષામાં હોવાથી તેમાં કોઈ જ પંક્તિ સન્ધિ રહિત નથી જોવા મળતી. આ રીતે સન્ધિ એ સ્વાભાવિક અને સહજ પ્રવૃત્તિ છે. વૈકલ્પિક કે કૃત્રિમ નથી.

સંસ્કૃત ભાષામાં, કે કોઈપણ બોલચાલની ભાષામાં સાધારણતઃ બે સ્વરો પાસે પાસે આવી જાય ત્યારે કુદરતી રીતે જ તેમના ઉચ્ચારણમાં સન્ધિ થઈ જ જાય છે. આ પ્રકારે જે રીતની સન્ધિ છેક વેદકાળથી પાણિનિના જમાના સુધી સંસ્કૃત ભાષાના ઉચ્ચારણમાં થતી જોવા મળતી હતી તેના સર્વે નમૂનાનો સંગ્રહ અષ્ટાધ્યાયીમાં કરી લેવામાં આવ્યો છે અને તેને લગતાં સૂત્રો સંહિતાધિકારની અંતર્ગત વણી લેવામાં આવ્યાં છે. 'સંહિતા' કુદરતી છે, જ્યારે વ્યાકરણદૃષ્ટિએ એનું વિશ્લેષણ કરીને તેમાંના વર્ણોના ફેરફારને સમજવો તેને 'વિગ્રહ' કહે છે.

કયા વર્ણ પછી કયો વર્ણ આવે છે તેને આધારે સન્ધિનું સ્વરૂપ નક્કી થાય છે. સન્ધિ થવા માટે મુખ્યતઃ વર્ણોચ્ચાર માટે ઉચ્ચારણ-અવયવોની અમુક મર્યાદાઓ જવાબદાર હોય છે. કંઠ્ય પછી સીધા જ તાલવ્યનું ઉચ્ચારણ કરવામાં જીભને જે કષ્ટ પડે તેના બચાવમાં જીભ એ બે છેડા વચ્ચે સમન્વય સાધવા અમુક બાંધછોડની તરકીબ અજમાવે છે. 'ઉચ્ચારણશુદ્ધિ'ની કડક તાલીમ લીધેલ વ્યક્તિની જીભ કેળવાઈ જાય ત્યારે આ કષ્ટ ઓછું થઈ જાય છે. બાકી સામાન્ય રીતે તો ગુજરાતી ભાષાભાષી જનને ત્રણ પ્રકારના ઉષ્મ વ્યંજનો વચ્ચેનો ભેદ ઉચ્ચારણમાં પાડવો મુશ્કેલ થઈ પડે છે. એ જ રીતે 'ર', 'લ' અને 'ળ'નું ઉચ્ચારણ પણ સામાન્યજનને માટે સેળભેળિયું થઈ જાય છે. કુદરતી રીતે તો જીભ મોટે ભાગે સરળતા સાધવાનું વલણ ધરાવે છે. જે પ્રવૃત્તિ ભાષાના

પરિવર્તન માટે જવાબદાર છે તે જ સન્ધિ માટે પણ વત્તે-ઓછે અંશે જવાબદાર છે.

સંસ્કૃત વ્યાકરણમાં સન્ધિના મુખ્ય પ્રકાર તો બે જ છે : (૧) અચ્-સન્ધિ, અર્થાત્ સ્વરસન્ધિ, અર્થાત્ બે સ્વરવર્ણો એકબીજાને લગોલગ આવી જતાં તેમનામાં જે ફેરફાર થાય તે; (૨) હલ્-સન્ધિ, અર્થાત્ વ્યંજનસન્ધિ, અર્થાત્ બે વ્યંજનો એકબીજાની લગોલગ આવી સંયોગ પામતાં જે ફેરફાર થાય તે; વ્યંજનવર્ણ પછી સ્વરવર્ણ આવવાથી વ્યંજનવર્ણમાં ફેરફાર થાય તો તેને પણ હલ્-સન્ધિ જ કહેવામાં આવે છે.

અચ્-સન્ધિમાં પણ પેટાપ્રકારો પડે છે. બે સ્વરો લગોલગ આવીને તેમનો દીર્ઘ બની જાય ત્યારે તેને 'દીર્ઘાદેશ', 'દીર્ઘીભાવ' કે 'દીર્ઘીકરણ' કહે છે. બંનેને બદલે સ્થાને સંયુક્ત સ્વર આવી જાય ત્યારે 'ગુણભાવ' કે 'વૃદ્ધિભાવ' કહેવાય છે. બંનેમાંથી એકને બદલે અંતઃસ્થ વર્ણ આવી જાય ત્યારે 'યણ્ભાવ' કહેવાય છે. અંતઃસ્થને બદલે સ્વર આવી જાય ત્યારે 'સંપ્રસારણ' થયું કહેવાય છે. બેમાંથી પહેલો જ રહે ત્યારે 'પૂર્વરૂપ-એકાદેશ' અને પછીનો જ રહે તો 'પરરૂપ-એકાદેશ' કહેવાય છે. અને સન્ધિ થવાના સંજોગો હોવા છતાં સન્ધિ ન થાય અને પદો પોતાના મૂળ સ્વરૂપે અકબંધ રહે તો તેને 'પ્રકૃતિભાવ' કહેવાય છે.

હલ્-સન્ધિમાં પણ ચવર્ગના વર્ણને બદલે કવર્ગનો વર્ણ આવી જાય તો કુત્વ, કવર્ગના વર્ણને બદલે ચવર્ગનો વર્ણ આવે તો ચુત્વ, તવર્ગના વર્ણને બદલે ટવર્ગનો વર્ણ આવે તો 'મૂર્ધન્ય-આદેશ', સ્ કે શ્નો ષ્ થાય તો 'ષત્વ', ન્ નો ણ્ થઈ જાય તો 'ણત્વ', સ્ ને બદલે ર્ થઈ જાય તો 'ર્ત્વ' કહે છે સ્ કે ર્ નો વિસર્ગ થઈ જાય. વિસર્ગનો સ્ કે ર્ થઈ જાય, કે વિસર્ગ અકબંધ રહે તો આ બધા ફેરફારોને 'વિસર્ગસન્ધિ' તરીકે ઓળખવામાં આવે છે. **વિસર્ગસન્ધિ** વાસ્તવમાં તો વ્યંજન-સન્ધિ જ છે, પણ માહેશ્વર સૂત્રોમાં વિસર્ગનો સમાવેશ થયો નથી તેથી તેને 'હલ્-સન્ધિ' કહેવું શાસ્ત્રીય દૃષ્ટિએ ઉચિત નથી ગણાતું. આ કારણે કૌમુદી વગેરે

ગ્રન્થોમાં તેને અલગ પ્રકાર ગણાવ્યો છે સમાસમાં પણ પદોની વચ્ચે સન્ધિ થાય છે તેને 'સમાસસન્ધિ' તરીકે ઓળખવામાં આવે છે. એ જ રીતે પ્રતિપાદિક કે ધાતુ પછી પ્રત્યય, આગમ, આદેશ વગેરે થતાં આંતરિક સન્ધિ થાય છે જ, તેને 'સ્વાદિસન્ધિ' કે 'અપદાન્તસન્ધિ' તરીકે ઓળખવામાં આવે છે. આ બધામાં સન્ધિ તો છેવટે સ્વરો કે વ્યંજનો વચ્ચે જ થતી હોય છે એ ભૂલવાનું નથી.

ભાષા તો હંમેશાં ઉચ્ચારિત જ હોય. લિખિત સ્વરૂપ એ તો કેવળ એ ઉચ્ચરિત સ્વરૂપનું લિપિ-આધારિત પ્રતીક છે. તેથી સન્ધિ મૂલતઃ ઉચ્ચારણ પ્રક્રિયા ઉપર જ આધારિત છે. અને ભાષાનું વિશ્લેષણ કરવા વ્યાકરણ જ્યારે તેનું વાક્યો, પદો અને વર્ણોમાં કલ્પિત વિભાજન કરીને તેને સુવ્યવસ્થિત માળખા દ્વારા સમજવા પ્રયત્ન કરે ત્યારે લિપિનો આશરો લેવો જ પડે. અને વિશ્લેષણ કર્યા પછી એ વર્ણો, શબ્દો અને વાક્યરૂપમાં પરિણમે ત્યારે કઈ કઈ પરિવર્તન પ્રક્રિયામાંથી પસાર થયાં છે એ બતાવવાની અને એ માટે પણ લિપિનો આધાર લેવાની ફરજ પડે છે. સંસ્કૃત ભાષા પ્રાચીનકાળે બ્રાહ્મી લિપિમાં લખાતી અને પછી તેમાંથી દેવનાગરી લિપિમાં લખાવા લાગી. આ ભાષામાં સ્વતંત્ર સ્વરવર્ણો માટે અલગ પ્રતીકો છે અને એ સ્વરવર્ણો વ્યંજનો સાથે જોડાય ત્યારે વ્યંજન+સ્વર એ બંનેને સંયુક્ત દર્શાવવા માટે સ્વરનાં પ્રતીકો જરા બદલાઈ જાય છે. દા.ત. अ, इ, उ, ऋ, ए, ओ વગેરે સ્વરવર્ણો સ્વતંત્ર હોય ત્યારે આ રીતે જ લખાય છે; પરંતુ વ્યંજન સાથે જોડાતાં કેવળ क्+ा=क, क+ि=कि, क्+ ु=कु, क+ ू=कू, क+ ृ=कृ, क+ े=के, क+ ै=कै, क+ो=को, क+ौ=कौ इत्यादि દ્વારા દર્શાવાય છે. સન્ધિનો વિચાર કરતી વખતે આ લિપિવિષયક હકીકત ખાસ ધ્યાનમાં રાખવાની છે, કેમકે ઉચ્ચરિત વર્ણો, શબ્દો કે વાક્યો લિપિ દ્વારા જ ચાક્ષુષ પ્રત્યક્ષ રૂપ ધારણ કરીને આપણી સામે ખડા થવાના છે. કોઈ પણ શબ્દ રૂપની સિદ્ધિ કરતી વખતે તેમાંના અંગભૂત વર્ણો કઈ રીતે પરસ્પર જોડાય છે અને એમાં

પાણિનીય વ્યાકરણના કયા નિયમો લાગુ પડે છે એ દર્શાવવું તેને "સિદ્ધિ પ્રક્રિયા" કહે છે. પાણિનીય વ્યાકરણના નિયમો સૂત્રરૂપે હોવાથી તે તે નિયમ સૂત્રનિર્દેશ દ્વારા દર્શાવવામાં આવે છે. કયા રૂપની સિદ્ધિ માટે ક્યાં ક્યાં સૂત્રો કયા ક્રમે ક્યારે કામ કરે છે તેનું માળખું લક્ષમાં રાખીને જ ભટ્ટોજી દીક્ષિતે પોતાની 'સિદ્ધાન્તકૌમુદી'માંના પ્રકરણોની યોજના માંડી છે. શબ્દ રૂપની સિદ્ધિમાં વિશ્લેષિત શબ્દાવયવોના સંયોજનની પાકી સમજ આવે તે માટે 'સન્ધિ' એ ખૂબ આવશ્યક પ્રાથમિક જરૂરિયાત હોવાથી રૂપસિદ્ધિની પ્રક્રિયાઓ આરંભ કરતાં પહેલાં સન્ધિની પૂરી સમજ આપવા અચ્-સન્ધિ, હલ્-સન્ધિ, વિસર્ગ સન્ધિ, સ્વાદિ-સન્ધિ એવાં પ્રકરણો પાડી તેમાં તે તે સન્ધિવિષયક સર્વે સૂત્રોની સમજ કૌમુદીકારે આપી દીધી છે. આ સમજ સંસ્કૃતભાષાના માધ્યમ દ્વારા અને ખૂબ સંક્ષેપમાં આપી હોવાથી શિખાઉ જ્ઞાનાર્થીને 'કૌમુદી' પણ શીતળતાને બદલે તાપનો અનુભવ કરાવી દે છે.

પંડિત ચારુદેવ શાસ્ત્રીએ પોતાના 'વ્યાકરણચંદ્રોદય' ગ્રંથમાં સન્ધિ વખતે વર્ણોમાં મહત્વના ફેરફારોને ખૂબ વિશદતાપૂર્વક દર્શાવતાં કહ્યું છે કે સંસ્કૃત ભાષાનો સ્વભાવ જ એવો છે કે, થોડાક અપવાદો બાદ કરતાં, એક પછી બીજાનું તરત ઉચ્ચારણ કરવાનું આવે ત્યારે સ્વરવર્ણો પોતાના મૂળ સ્વરૂપમાં ટકી રહેતા નથી. એક સ્વરવર્ણ પછી તરત જ બીજો સ્વરવર્ણ આવવા લાગે કે તરત જ એ બેના સ્થાને કાં તો એવો જ એક દીર્ઘસ્વર ઉચ્ચારાઈ જાય છે, કાં તો એમાંનો એક વ્યંજન રૂપે પરિણમે છે, કાં તો એ બેના સ્થાને પૂર્વવર્ણ અથવા પરવર્ણ એ બેમાંથી એક જ બચે છે. બે સ્વરો અલગ રહે તો સંક્ષેપ, પ્રવાહ અને ભાષાસૌંદર્ય હણાઈ જાય.

એ જ રીતે અઘોષ વ્યંજન તથા ઘોષ વ્યંજન એકબીજા પછી આવે તો તેમનું ઉચ્ચારણ ક્લિષ્ટ બની જાય છે. આવા સંજોગોમાં પ્રથમ અઘોષ પણ ઘોષ બની જાય છે. અથવા પ્રથમ ઘોષ વર્ણ તેની પછીના અઘોષવર્ણના પ્રભાવને લીધે જાતે જ અઘોષ બની જાય છે. આ એક

પ્રકારનું સમીકરણ કે સરલીકરણ છે. તવર્ગના વર્ણ પછી ચવર્ગનો વર્ણ ઉચ્ચારવાની સંભાવના ખડી થતાં જ તવર્ગનો વર્ણ ચવર્ગના વર્ણમાં પલટાઈ જાય છે. એ જ રીતે ટવર્ગના વર્ણનું ઉચ્ચારણ કરવાની સંભાવના ઉપસ્થિત થતાં તે ટવર્ગના વર્ણમાં ફેરવાઈ જાય છે. આ એક પ્રકારનું એકવર્ગીકરણ કે સમીકરણ છે. એ જ રીતે અનુનાસિકતારહિત અનનુનાસિક-વર્ણ પછી અનુનાસિક વર્ણ ઉચ્ચારવાની જરૂર ઊભી થતાં એ પૂર્વવર્ણ પણ અનુનાસિક જ ઉચ્ચારાઈ જાય છે. આ પણ સમીકરણ છે. તવર્ણ પછી લવર્ણ આવતો હોય તો એ તવર્ણ પણ લકાર રૂપે પલટાઈ જાય છે, જેને 'લત્વાપત્તિ' કહે છે. આમાં પણ સમીકરણપ્રક્રિયા જવાબદાર છે. મનુષ્યનાં મુખમાંના ઉચ્ચારણ-અવયવો વર્ણપરુષતાને ટાળીને ધ્વનિસૌકર્ય માટે સ્થાન-પ્રયત્નની એકતા સાધવા કુદરતી રીતે જ પ્રયત્નશીલ રહે છે; આ કુદરતી પરિસ્થિતિ જ સમીકરણ પ્રક્રિયાને જન્મ આપે છે. આમાં જ સન્ધિપ્રક્રિયાનાં બીજ છુપાયાં છે.

રૂપસિદ્ધિની દૃષ્ટિએ રૂપસિદ્ધિમાં સન્ધિપ્રક્રિયાનું જ્ઞાન અનિવાર્યપણે આવશ્યક હોવાથી આ પ્રકારોને લક્ષમાં રાખીને સન્ધિ વિષેનાં મહત્વનાં પાણિનીય સૂત્રો વિષે પરિચય મેળવી લઈશું. સન્ધિના ચાર પ્રકાર પડે છે. પદાન્તસન્ધિ, અપદાન્તસન્ધિ, સમાસસન્ધિ અને ઉપસર્ગસન્ધિ.

अथ अच्सन्धिः ।

इको यणचि ६ । १ । ७७ ॥ इकः स्थाने यण् स्यादचि संहितायां विषये । 'सुधी उपास्यः' इति स्थिते ।

तस्मिन्निति निर्दिष्टे पूर्वस्य १ । १ । ६६ ॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाऽव्यवहितस्य पूर्वस्य बोध्यम् ।

स्थानेऽन्तरतमः १ । १ । ५० ॥ प्रसङ्गे सति सदृशतम आदेशः स्यात् । सुध्य् उपास्य इति जाते ।

अनचि च ८ । ४ । ४७ ॥ अचः परस्य यरो द्वे वा स्तो, न त्वचि । इति धकारस्य द्वित्वम् ।

झलां जश् झशि ८ । ४ । ५३ ॥ स्पष्टम् । इति पूर्वधकारस्य दकारः ।

संयोगान्तस्य लोपः ८ । २ । २३ ॥ संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् ।

अलोऽन्तस्य १ । १ । ५२ ॥ षष्ठीनिर्दिष्टोऽन्त्यस्याऽल आदेशः स्यात् । इति यलोपे प्राप्ते । (यणः प्रतिषेधो वाच्यः) सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ।

एचोऽयवायावः ६ । १ । ७८ ॥ एचः क्रमादय् अव् आय् आय् एते स्युरचि ।

यथासंख्यमनुदेशः समानाम् १ । ३ । १० ॥ समसम्बन्धी विधिर्यथासंख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः ।

वान्तो यि प्रत्यये ६ । १ । ७९ ॥ यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः । गव्यम् । नाव्यम् । (अध्वपरिमाणे च) गव्यूतिः ।

अदेङ्गुणः १ । १ । २ ॥ अत् एङ् च गुणसंज्ञः स्यात् ।

तपरस्तत्कालस्य १ । १ । ७० ॥ तः परो यस्मात्स च तात्परश्चोच्चार्यर्णमाणः समकालस्यैव संज्ञा स्यात् ।

आद् गुणः ६ । १ । ८७ ॥ अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् । उपेन्द्र । गङ्गोदकम् ।

उपदेशेऽजनुनासिक इत् १ । ३ । २ ॥ उपदेशेऽनुनासिकोऽजित्संञ्ज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण्सूत्रस्थाऽवर्णन सहोच्चार्यमाणो रेफो रलयोः संज्ञ ।

उरण् रपरः १ । १ । ५१ ॥ 'ऋ' इति त्रिशतः सञ्ज्ञत्युक्तम् । तत्थाने योऽण् स रपरः सन्नेव प्रवर्तते । कृष्णर्द्धिः । तवल्कारः ।

लोपः शाकल्यस्य ८ । ३ । १९ ॥ अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे ।

पूर्वत्रासिद्धम् ८ । २ । २ ॥ सपादसप्ताध्यार्यीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् । हर इह । हरयिह । विष्ण इह । विष्णविह ।

वृद्धिरादैच् १ । १ । १ ॥ आदैच्च वृद्धिसञ्ज्ञः स्यात् ।

वृद्धिरेचि ६ । १ । ८८ ॥ आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः कृष्णैकत्वम् । गङ्गौघः देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ।

एत्येधत्यूठ्सु ६ । १ । ८९ ॥ अवर्णादेजाद्योरेत्येषत्योरूठि च परे वृद्धिरेकादेशः स्यात् । उपैति । उपैधते प्रष्ठौहः । एजाद्योः किम् ? उपेतः । मा भवान्प्रेदिधत् । **अक्षा-**

दूहिन्यामुपसंख्यानम् । अक्षौहिणी सेना । **प्रादूहोढोढ्येषैष्येषु** । प्रौहः प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः **ऋते च तृतीगासमासे** । सुखेन ऋतः सुखार्तः । तृतीयेति । किम्? परमर्तः ।

प्र-वत्सतर कम्बल-वसना र्ण-दशानामृणे । प्रार्णम् । वत्सतरार्णम् इत्यादि ।

उपसर्गाः क्रियायोगे १ । ४ । ५९ ॥ प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप-एते **प्रादयः** ।

भूवादयो धातवः १ । ३ । १ ॥ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

उपसर्गादृति धातौ ६ । १ । ९१ ॥ अवर्णान्तादुपसर्गदुकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ।

एङिपररूपम् ६ । १ । ९४ ॥ आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ।

अचोऽन्त्यादि टि । १ । १ । ६४ ॥ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् । शकन्ध्वादिषु पररूपं वाच्यम् । तच्च टेः । शकन्धुः । कर्कन्धुः । मनीषा । आकृतिगणोऽयम् । मार्त्तण्डः ।

ओमाङोश्च ६ । १ । ९५ ॥ ओमि आङि चाऽत्परे पररूपमेकादेशः स्यात् शिवायो नमः शिव-एहि ।

अन्तादिवच्च ६ । १ । ८५ ॥ योऽयमेकादेशः स पूर्वस्याऽन्तवत्परस्यादिवत्स्यात् । शिवेहि ।

अकः सवर्णे दीर्घः ६ । १ । १०१ ॥ अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतॄकारः ।

एङः पदान्तादति ६ । १ । १०९ ॥ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ।

सर्वत्र विभाषा गोः ६ । १ । १२२ ॥ लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते । गो अग्रम् । एङन्तस्य किम् ? चित्रग्वग्रम् । पदान्ते किम् ? गोः ।

अनेकाल् शित्सर्वस्य १ । १ । ५५ ॥ [अनेकाल् य आदेशः शिदादेशश्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने स्यात्]-इति प्राप्ते ।

ङिच्च १ । १ । ५३ ॥ ङिदनेकालप्यन्त्यस्यैव स्यात् ।

अवङ् स्फोटायनस्य ६ । १ । १२३ ॥ पदान्ते एङन्तस्य गोरवङ् वा स्यादचि। गवाग्रम्। गोऽग्रम्। पदान्ते किम्? गवि।

इन्द्रे च ६ । १ । १२४ ॥ गोरवङ् स्यादिन्द्रे। गवेन्द्रः।

दूराद् धूते च ८ । २ । ८४ ॥ दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा स्यात्।

प्लुतप्रगृह्या अचि नित्यम् ६ । १ । १२५ ॥ एतेऽचि प्रकृत्या स्युः। आगच्छ कृष्ण ३ अत्र गौश्चरति।

इदूदेद्द्विवचनं प्रगृह्यम् १ । १ । ११ ॥ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।

अदसो मात् १ । १ । १२ ॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। मात्किम्? अमुकेऽत्र।

चादयोऽसत्त्वे १ । ४ ।५७ ॥ अद्रव्यार्थाश्चादयो निपाताः स्युः।

प्रादयः १ । ४ ।५८ ॥ एतेऽपि तथा स्युः।

निपात एकाजनाङ् १ । १ । ४ ॥ एकोऽच् निपात आङ्वर्जः प्रगृह्य स्यात्। इ इन्द्रः। उ उमेशः। **वाक्यस्मरणयोरङित्** । आ एवं नु मन्यसे! आ एवं किल तत्। अन्यत्र ङित्। ईषदुष्णम्–ओष्णम्।

ओत् १ । १ । १५ ॥ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।

सम्बुद्धौ शाकल्यस्येतावनार्षे १ । १ । १६ ॥ सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति। विष्ण इति। विष्णविति।

मय उञो वो वा ८ । ३ । ३३ ॥ मयः परस्य उञो वो वा स्यादचि किम्वुक्तम्। किमु उक्तम्।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६ । १ । १२७ ॥ पदान्ता इको ह्रस्वो वा स्युरसवर्णेऽचि परे। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र। चक्र्यत्र। पदन्ता इति किम? गौर्यौ।

अचो रहाभ्यां द्वे ८ । ४ । ४६ ॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। गोर्य्यौ। **न समासे**। वाप्यश्वः।

ऋत्यकः ६ । १ । १२८ ॥ ऋति परे पदान्ता अकः प्राग्वद् वा। ब्रह्म ऋषिः। ब्रह्मर्षिः। पदान्ताः किम्? आर्च्छत्।

इत्यच्सन्धिः।

अथ हल्सन्धिप्रकरणम् ।

स्तोः श्चुना श्चुः ८ । ४ । ४० ॥ सकारतवर्गयोः शकारचवर्गाभ्यां योगेशकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित् । शर्ङ्गिञ्जय ।

शात् ८ । ४ । ४४ ॥ शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ।

ष्टुना ष्टुः ८ । ४ । ४१ ॥ स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।

न पदान्ताट्टोरनाम् ८ । ४ । ४२ ॥ पदान्ताट्टवर्गात्परस्याऽनामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात्किम् । ईट्टे । टोः किम् । सर्पिष्टमम् ।

अनाम्नवतिनगरीणामिति वाच्यम् । षण्णाम् । षण्णवतिः । षण्णगर्य्यः । **तोः षि ८ । ४ । ४३ ॥** तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः ।

झलां जशोऽन्ते ८ । २ । ३९ ॥ पदान्ते झलां जशः स्युः । वागीशः ।

यरोऽनुनासिकेऽनुनासिको वा ८ । ४ । ४५ ॥ यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः । एतद्मुरारिः । **प्रत्यये भाषायां नित्यम् ।** तन्मात्रम् । चिन्मयम् ।

तोर्लि ८ । ४ । ६० ॥ तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः । विद्वाँल्लिखति । नकारस्याऽनुनासिको लकारः ।

उदःस्थास्तम्भोः पूर्वस्य ८ । ४ । ६१ ॥ उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ।

तस्मादित्युत्तरस्य १ । १ । ६७ ॥ पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम् ॥

आदेः परस्य १ । १ । ५४ ॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । इति सस्य थः ।

झरो झरि सवर्णे ८ । ४ । ६५ ॥ हलः परस्य झरो लोपो वा स्यात् सवर्णे झरि ।

खरि च ८ । ४ । ५५ ॥ खरि परे झलां चरः स्युः । इत्युदो दस्य तः । उत्थानम् । उत्तम्भनम् ।

झयो होऽन्यतरस्याम् ८ । ४ । ६२ ॥ झयः परस्य हस्य वा पूर्वसवर्णः स्यात् । नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः । वाग्घरिः वाग्हरिः ।

शश्छोऽटि ८ । ४ । ६३ ॥ पदान्ताज्झयः परस्य शस्य छो वा स्यादटि । तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः । तच्शिवः । तच्छिवः । **छत्वममीति वाच्यम्** । तच्छ्लोकेन ।

मोऽनुस्वारः ८ । ३ । २३ ॥ मान्तस्य पदस्याऽनुस्वारः स्याद्धलि । हरिं वन्दे ।

नश्चाऽपदान्तस्य झलि ८ । ३ । २४ ॥ नस्य मस्य चाऽपदान्तस्य झल्यनुस्वारः स्यात् । यशांसि । आक्रंस्यते । झलि किम् ? मन्यसे ।

अनुस्वारस्य ययि परसवर्णः ८ । ४ । ५८ ॥ स्पष्टम् । [अनुस्वारस्य ययि परे परसवर्णो वा स्यात् । शान्तः ।

वा पदान्तस्य ८ । ४ । ५९ ॥ पदान्तस्याऽनुस्वारस्य यदि परे परसवर्णो वा स्यात् । त्वङ्करोषि । त्वं करोषि ।

मो राजि समः क्वौ ८ । ३ । २५ ॥ क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ।

हे मपरे वा ८ । ३ । २६ ॥ मपरे हकारे परे मस्य मो वा स्यात् । किम् ह्मलयति । किं ह्मलयति ॥ **यवलपरे यवला वा** । किर्य् ह्यः । किं ह्यः । किवँ ह्वलयति । किं ह्वलयति । किलँ ह्लादयति । किं ह्लादयति ।

नपरे नः ८ । ३ । २७ ॥ नपरे हकारे परे मस्य नो वा स्यात् । किन् ह्नुते । किं ह्नुते ।

आद्यन्तौ टकितौ १ । १ । ४६ ॥ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः । षट्त्सन्तः, षट्सन्तः ।

ङ्णोः कुक्टुक् शरि ८ । ६ । २८ ॥ ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि **चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्** । पाङ्ख्षष्ठः । प्राङ्क्षष्ठः । प्राङ् षष्ठः । सुगण्ठ्षष्ठः । सुगण्ट्षष्ठः । सुगण्षष्ठः ।

डः सि धुट् ८ । ३ । २९ ॥ डात्परस्य सस्य धुड् वा स्यात् । षट्त्सन्तः, षट्सन्तः ।

नश्च ८ । ३ । ३० ॥ नान्तात्परस्य सस्य धुड् वा स्यात् । सन्त्सः, सन्सः ।

शि तुक् ८ । ३ । ३१ ॥ पदान्तस्य नस्य शे परे तुग् वा स्यात् । सञ्छम्भुः । सञ्च्छम्भुः सञ्च्शम्भुः । सञ्शम्भुः ।

ङमो ह्रस्वादचि ङमुण् नित्यम् ८ । ३ । ३२ ॥ ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याऽचो नित्यं ङमुडागमः स्यात् । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ।

समः सुटि ८ । ३ ।५ ॥ समो रुः स्यात् सुटि ।

अत्रानुनासिकः पूर्वस्य तु वा ८ । ३ । २ ॥ अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ।

अनुनासिकात्परोऽनुस्वारः ८ । ३ । ४ ॥ अनुनासिकं विहाय रोः पूर्वस्मा- त्परोऽनुस्वारागमः स्यात् ।

खरवसानयोर्विसर्जनीयः ८ । ३ । १५ ॥ खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात् । **सम्पुङ्कानां सो वक्तव्यः** । सँस्स्कर्ता । संस्स्कर्ता ।

पुमः खय्यम्परे ८ । ३ । ६ ॥ अम्परे खयि पुमो रुः स्यात् । पुँस्कोकिलः पुंस्कोकिलः ।

नश्छव्यप्रशान् ८ । ३ । ७ ॥ अम्परे छवि नान्तस्य पदस्य रुः स्यात् न तु प्रशान्शब्दस्य ।

विसर्जनीयस्य सः ८ । ३ । ३४ ॥ खरि विसर्जनीयस्य सः स्यात् । चक्रिंस्त्रायस्व । चक्रिंस्त्रायस्व । अप्रशान् किम् ? प्रशान् तनोति । पदान्तस्येति किम् ? हन्ति ।

नॄन् पे ८ । ३ । १० ॥ नृनित्यस्य रुः स्वाद्वा पकारे परे ।

कुप्वोः ≍क≍पौ च ८ । ३ । ३७ ॥ कवर्गे पवर्गे च परे विसर्गस्य ≍क≍पौ स्तः । चाद्विसर्गः । नॄँ≍पाहि । नॄँ : पाहि । नॄं≍पाहि । नॄं : पाहि । नॄन् पाहि ।

तस्य परमाम्रेडितम् ८ । १ । २ ॥ द्विरुक्तस्य परं रूपमाम्रेडितं स्यात् ।

कानाम्रेडिते च ८ । ३ । १२ ॥ कान्नकारस्य रुः स्यादाम्रेडिते परे । काँस्कान् । कांस्कान् ।

छे च ६ । १ । ७३ ॥ ह्रस्वस्य छे परे तुगागमः स्यात् । शिवच्छाया ।

पदान्ताद्वा ६ । १ । ७६ ॥ दीर्घात्पदान्ताच्छे परे तुग् वा स्यात् । लक्ष्मीच्छाया । लक्ष्मीछाया ।

इति हल्सन्धिः ।

अथ विसर्गसन्धिप्रकरणम् ।

विसर्जनीयस्य सः ८ । ३ । ३४ ॥ खरि विसर्जनीयस्य सः स्यात् । विष्णुस्त्राता ।

वा शरि ८ । ३ । ३६ ॥ शरि विसर्गस्य विसर्गो वा स्यात् । हरिः शेते । हरिश्शेते ।

ससजुषो रुः ८ । २ । ६६ ॥ पदान्तस्य सस्य, राजुष्शब्दस्य च रुः स्यात् ।

अतो रोरप्लुतादप्लुते ६ । १ । ११३ ॥ अप्लुतादतः परस्य रोरुः स्वादप्लुतेऽति शिवोऽर्च्यः ।

हशि च ६ । १ । ११४ ॥ अप्लुतादतः परस्य रोरुः स्याद्धशि । शिवो वन्द्यः ।

भोभगोअघोअपूर्वस्य योऽशि ८ । ३ । १७ ॥ एतत्पूर्वस्य रोर्यादेशः स्यादशि । देवा इह । देवायिह । भोस् भगोस् अघोस् इति सान्ता निपाताः । तेषां रोर्यत्वे कृते - **हलि सर्वेषाम् ८ । ३ । २२** ॥ भो-भगो-अघो-अपूर्वस्य यस्य लोपः स्याद्धलि । भो देवाः । भगो नमस्ते । अघो याहि ।

रोऽसुपि ८ । २ । ६९ ॥ अह्नो रेफादेशः स्यान्न तु सुपि । अहरहः । अहर्गणः ।

रोरि ८ । ३ । १४ ॥ रेफस्य रेफे परे लोपः स्यात् ।

ढ्रलोपे पूर्वस्य दीर्घोऽणः ६ । ३ । १११ ॥ ढरेफयोर्लोपनिमित्तयोः पूर्वस्याऽणो दीर्घः स्यात् । पुना रमते । हरी रम्यः । शम्भू राजते । अणः किम् ? तृढः । वृढः । मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्वुत्वे रो रीति लोपे च प्राप्ते ।

विप्रतिषेधे परं कार्यम् १ । ४ । २ ॥ तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते । 'पूर्वत्राऽसिद्धमि'ति 'रो री'त्यस्याऽसिद्धत्वादुत्वमेव । मनोरथः ।

एतत्तदोः सुलोप्रोऽकोरनञ्समासे हलि ६ । १ । १३२ ॥ अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे । एष विष्णुः । स शम्भुः । अकोः किम् ? एषको रुद्रः । अनञ्समासे किम् ? असः शिवः हलि किम् ? एषोऽत्र ।

सोऽचि लोपे चेत्पादपूरणम् ६ । १ । १३४ ॥ स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत । सेमामविड्ढि प्रभृतिम् । सैष दाशरथी रामः ।

इति विसर्गसन्धिः ।

[इति पञ्चसन्धिप्रकरणम्]

(ज) अष्टाध्यायीसूत्रपाठ :

अथ प्रथमोऽध्यायः

अथ प्रथमः पादः

१ वृद्धिरादैच् ।
२ अदेङ् गुणः ।
३ इको गुणवृद्धी ।
४ न धातुलोप आर्द्धधातुके ।
५ क्ङिति च ।
६ दीधीवेवीटाम् ।
७ हलोऽनन्तराः संयोगः ।
८ मुखनासिकावचनोऽनुनासिकः
९ तुल्याऽऽस्यप्रयत्नं सवर्णम् ।
१० नाऽऽज्झलौ ।
११ ईदूदेद् द्विवचनं प्रगृह्यम् ।
१२ अदसो मात् ।
१३ शे ।
१४ निपात एकाऽजनाङ् ।
१५ ओत् ।
१६ सम्बुद्धौ शाकल्यस्येतावनार्षे ।
१७ उञः ।
१८ ऊँ ।
१९ ईदूतौ च सप्तम्यर्थे ।
२० दाधा घ्वदाप् ।
२१ आद्यन्तवदेकस्मिन् ।
२२ तरप्तमपौ घः ।
२३ वहुगणवतुडति संख्या ।
२४ ष्णान्ता षट् ।
२५ डति च ।
२६ क्तक्तवतू निष्ठा ।
२७ सर्वादीनि सर्वनामानि
२८ विभाषा दिक्समासे बहुव्रीहौ ।
२९ न बहुव्रीहौ ।
३० तृतीयासमासे ।
३१ द्वन्द्वे च ।
३२ विभासा जसि ।
३३ प्रथमचरमतयाऽल्याऽर्धकतिपयनेमाश्च ।
३४ पूर्वपराऽवरदक्षिणोत्तराऽपराऽ धराणि व्यवस्थायामसंज्ञायाम् ।
३५ स्वमज्ञातिधनाख्यायाम् ।
३६ अन्तरं बहिर्योगोपसंव्यावनयोः ।
३७ स्वरादिनिपातमव्ययम् ।
३८ तद्धितश्चाऽसर्वविभक्तिः ।
३९ कृन्मेजन्तः ।
४० क्त्वातोसुन्कसुनः ।
४१ अव्ययीभावश्च ।
४२ शि सर्वनामस्थानम् ।
४३ सुडनपुंसकस्य ।
४४ नवेति विभाषा ।
४५ इग्यणः सम्प्रसारणम् ।
४६ आद्यन्तौ टकितौ ।
४७ मिदचोऽन्त्यात्परः ।
४८ एच इग्घ्रस्वादेशे ।
४९ षष्ठी स्थानेयोगा ।
५० स्थानेऽन्तरतमः ।
५१ उरण् रपरः ।
५२ अलोऽन्त्यस्य ।

५३ ङिच्च ।
५४ आदेः परस्य ।
५५ अनेकाल्शित्सर्वस्य ।
५६ स्थानिवदादेशोऽनल्विधौ ।
५७ अचः परस्मिन् पूर्वविधौ ।
५८ नपदान्तद्विर्वचनवरेयलोपस्वरस-
वर्णानुस्वारदीर्घजश्चर्विधिषु ।
५९ द्विर्वचनेऽचि ।
६० अदर्शनलोपः ।
६१ प्रत्ययस्य लुक्श्लुलुपः ।
६२ प्रत्येय लोपे प्रत्ययलक्षणम् ।
६३ न लुमताङ्गस्य ।
६४ अचोऽन्त्यादि टि ।
६५ अलोऽन्त्यात्पूर्व उपधा ।
६६ तस्मिन्निति निर्दिष्टे पूर्वस्य ।
६७ तस्मादित्युत्तरस्य ।
६८ स्वं रूपं शब्दस्याऽशब्दसंज्ञा ।
६९ अणुदित्सवर्णस्य चाऽप्रत्ययः ।
७० तपरस्तत्कालस्य ।
७१ आदिरन्त्येन सहेता ।
७२ येन विधिस्तदन्तस्य ।
७३ वृद्धिर्यस्याऽचामादिस्तद्वृद्धम् ।
७४ त्यदादीनि च ।
७५ एङ् प्राचां देशे ।
[वृद्धिरा-द्यन्तवदऽऽव्ययीभावः
प्रत्ययस्य लुक्-पञ्चदश] ॥

अथ द्वितीयः पादः

१ गाङ्कुटादिभ्योऽञ्णिन्ङित् ।
२ विज इट् ।
३ विभाषोर्णोः ।
४ सार्वधातुकमपित् ।
५ असंयोगाल्लिट् कित् ।
६ इन्धिभवतिभ्यां च ।
७ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ।
८ रुदाविदमुषग्रहिस्वपिप्रच्छः संश्च ।
९ इको झल् ।
१० हलन्ताच्च ।
११ लिङ्सिचावात्मनेपदेषु ।
१२ उश्च ।
१३ वा गमः ।
१४ हनः सिच् ।
१५ यमो गन्धने ।
१६ विभाषोपयमने ।
१७ स्थाघ्वोरिच्च ।
१८ न क्त्वा सेट् ।
१९ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ।
२० मृषस्तितिक्षायाम् ।
२१ उदुपधाद्भावादिकर्मणोरन्यतस्याम् ।
२२ पूङः क्त्वा च ।
२३ नोपधात्थफाऽन्ताद्वा ।
२४ वञ्चिलुञ्च्यृतश्च ।
२५ तृषिमृषिकृषेः काश्यपस्य ।
२६ रलो व्युपधाद्धलादेः संश्च ।
२७ ऊकालोऽ ज्झस्वदीर्घप्लुतः ।
२८ अचश्च ।
२९ उच्चैरुदात्तः ।
३० नीचैरनुदात्तः ।
३१ समाहारः स्वरितः ।
३२ तस्यादित उदात्तमर्द्धह्रस्वम् ।
३३ एकश्रुति दूरात्सम्बुद्धौ ।

३४ यज्ञकर्मण्यजपन्यूङ्खसामसु ।
३५ उच्चैस्तरां वा वषट्कारः ।
३६ विभाषा छन्दसि ।
३७ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ।
३८ देव-ब्रह्मणोरनुदात्तः ।
३९ स्वरितात्संहितायामनुदात्तानाम् ।
४० उदात्तस्वरितपरस्य सन्नतरः ।
४१ अपृक्त एकाऽल्प्रत्ययः ।
४२ तत्पुरुषः समानाधिकरणः कर्मधारयः ।
४३ प्रथमानिर्दिष्टं समास उपसर्जनम् ।
४४ एकभक्ति चाऽपूर्वनिपाते ।
४५ अर्थवदधातुरप्रत्ययः प्रातिपादिकम् ।
४६ कृत्तद्धितसमासाश्च ।
४७ ह्रस्वो नपुंसके प्रातिपदिकस्य ।
४८ गोस्त्रियोरुपसर्जनस्य ।
४९ लुक् तद्धितलुकि ।
५० इद् गोण्याः ।
५१ लुपि युक्तवद् व्यक्तिवचने ।
५२ विछोषणानां चाऽजातेः ।
५३ तदशिष्यं संज्ञाप्रमाणत्वात् ।
५४ लुब्योगाऽप्रख्यानात् ।
५५ योगप्रमाणे च तदभावेऽदर्शनं स्यात् ।
५६ प्रधानप्रत्ययाऽर्थवचनमर्थस्याऽन्य प्रमाणत्वात् ।
५७ कालोपसर्जने च तुल्यम् ।
५८ जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ।
५९ अस्मदो द्वयोश्च ।
६० फल्गुनीप्रोष्ठपदानां च नक्षत्रे ।
६१ छन्दसि पुनर्वस्वोरेकवचनम् ।
६२ विशाखयोश्च ।
६३ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।
६४ सरूपाणामेकशेष एकविभक्तौ ।
६५ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ।
६६ स्त्री पुंवच्च ।
६७ पुमान् स्त्रिया ।
६८ भ्रातृपुत्रो स्वसृ-दुहितृभ्याम् ।
६९ नपुंसकमनपुंसकेनैकवच्चाऽस्याऽन्यतरस्याम् ।
७० पिता मात्रा ।
७१ श्वशुरः श्वश्वा ।
७२ त्यदादीनि सर्वैर्नित्यम् ।
७३ ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ।
(गाङ्कुटाद्यु-दुपधा-दपृक्त-श्छन्दसिपुन-र्वेस्वास्त्रयोदश ।)

इति प्रथमाध्यायस्य द्वितीयः पादः ।

अथ तृतीयः पादः ।

१ भूवादयो धातवः ।
२ उपदेशेऽजनुनासिक इत् ।
३ हलन्त्यम् ।
४ न विभक्तौ तुस्माः ।
५ आदिर्ञिटुडवः ।
६ षः प्रत्ययस्य ।
७ चुटू ।
८ लशक्वतद्धिते ।
९ तस्य लोपः ।
१० यथासङ्ख्यमनुदेशः समानाम् ।
११ स्वरितेनाऽधिकारः ।
१२ अनुदात्तङित आत्मनेपदम् ।

१३ भावकर्मणोः ।
१४ कर्त्तरि कर्मव्यतिहारे ।
१५ न गतिहिंसार्थेभ्यः ।
१६ इतरेतराऽन्योन्योपपदाच्च ।
१७ नेर्विशः ।
१८ परिव्यवेभ्यः क्रियः ।
१९ विपराभ्यां जेः ।
२० आङो दोऽनास्यविहरणे ।
२१ क्रीडोऽनुसम्परिभ्यश्च ।
२२ समवप्रविभ्यः स्थः ।
२३ प्रकाशन-स्थेयाऽऽख्ययोश्च ।
२४ उदोऽनूर्ध्वकर्मणि ।
२५ उपान्मन्त्रकरणे ।
२६ अकर्मकाच्च ।
२७ उद्विभ्यां तपः ।
२८ आङो यमहनः ।
२९ समो गम्यृच्छिभ्याम् ।
३० निसमुपविभ्यो ह्वः ।
३१ स्पर्द्धायामाङः ।
३२ गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रति-
यत्नप्रकथनोपयोगेषु कृञः ।
३३ अधेः प्रसहने ।
३४ वेः शब्दकर्मणः ।
३५ अकर्मकाच्च ।
३६ संमाननोत्सञ्जनाऽऽचार्यकरणज्ञान-
भृति-विगणनव्ययेषु नियः ।
३७ कर्तृस्थे चाऽशरीरे कर्मणि ।
३८ वृत्ति-सर्ग-तायनेषु क्रमः ।
३९ उपपराभ्याम् ।
४० आङ उद्गमने ।
४१ वेः पादविहरणे ।
४२ प्रोपाभ्यां समर्थाभ्याम् ।
४३ अनुपसर्गाद्वा ।
४४ अपह्नवे ज्ञः ।
४५ अकर्मकाच्च ।
४६ सम्प्रतिभ्यामनाध्याने ।
४७ भासनोपसम्भाषाज्ञानयत्नविमत्यु-
पमन्त्रणेषु वदः ।
४८ व्यक्त वाचां समुच्चारणे ।
४९ अनोरकर्मकात् ।
५० विभाषा विप्रलापे ।
५१ अवाद्ग्रः ।
५२ समः प्रतिज्ञाने ।
५३ उदश्चरः सकर्मकात् ।
५४ समस्तृतीयायुक्तात् ।
५५ दाणश्च चेच्चतुर्थ्यर्थे ।
५६ उपाद्यमः स्वकरणे ।
५७ ज्ञाश्रुस्मृदृशां सनः ।
५८ नाऽनोर्ज्ञः ।
५९ प्रत्याङ्भ्यां श्रुवः ।
६० शदेः शितः ।
६१ म्रियतेर्लुङलिङोश्च ।
६२ पूर्ववत्सनः ।
६३ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ।
६४ प्रोपाभ्यां युजेरयज्ञपात्रेषु ।
६५ समः क्ष्णुवः ।
६६ भुजोऽनवने ।
६७ णेरणौ यत्कर्म,णौ चेत्सकर्त्ताऽनाध्याने ।
६८ भीस्म्योर्हेतुभये ।
६९ गृधिवञ्च्योः प्रलम्भने ।

७० लियः संमानन-शालीनीकरणयोश्च ।
७१ मिथ्योपपदात्कृञोऽभ्यासे ।
७२ स्वरितञितः कर्त्रभिप्राये क्रियाफले ।
७३ अपाद्वदः ।
७४ णिचश्च ।
७५ समुदाङ्भ्यो यमोऽग्रन्थे ।
७६ अनुपसर्गाज्ज्ञः ।
७७ विभाषोपपदेन प्रतीयमाने ।
७८ शेषात्कर्तरि परस्मैपदम् ।
७९ अनुपराभ्यां कृञः ।
८० अभिप्रत्यतिभ्यः क्षिपः ।
८१ प्राद्वहः ।
८२ परेर्मृषः ।
८३ व्याङ्परिभ्यो रमः ।
८४ उपाच्च ।
८५ विभाषाऽकर्मकात् ।
८६ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ।
८७ निगरणचलनार्थेभ्यश्च ।
८८ अणावकर्मकाच्चित्तवत्कर्तृकात् ।
८९ न पा-दम्याङ्यमाङ्यसपरिमुहरुचि
नृतिवदवसः ।
९० वा क्यषः ।
९१ द्युद्भ्यो लुङि ।
९२ वृद्भ्यः स्यसनोः ।
९३ लुटि च क्लृपः ।
[भूवादयःक्रीडोऽनुं-वेःपाद-म्रियतेः
पाद्वहस्त्रयोदश ।]

इति प्रथमाध्यायस्य तृतीयः पादः ।

अथ चतुर्थः पादः

१ आ कडारादेका संज्ञा ।
२ विप्रतिषेधे परं कार्यम् ।
३ यू स्त्र्याख्यौ नदी ।
४ नेयङुवङ्स्थानावस्त्री ।
५ वाऽऽमि ।
६ ङिति ह्रस्वश्च ।
७ शेषो घ्यसखि ।
८ पतिः समास एव ।
९ षष्ठीयुक्तश्छन्दसि वा ।
१० ह्रस्वं लघु ।
११ संयोगे गुरु ।
१२ दीर्घं च ।
१३ यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् ।
१४ सुप्तिङन्तं पदम् ।
१५ नः क्ये ।
१६ सिति च ।
१७ स्वादिष्वसर्वनामस्थाने ।
१८ यचि भम् ।
१९ तसौ मत्वर्थे ।
२० अयस्मयादीनि च्छन्दसि ।
२१ बहुषु बहुवचनम् ।
२२ द्व्येकयोर्द्विवचनैकवचने ।
२३ कारके ।
२४ ध्रुवमपायेऽपादानम् ।
२५ भीत्रार्थानां भयहेतुः ।
२६ पराजेरसोढः ।
२७ वारणार्थानामीप्सितः ।
२८ अन्तर्धौ येनाऽदर्शनमिच्छति ।
२९ आख्यातोपयोगे ।

३० जनिकर्तुः प्रकृतिः ।
३१ भुवः प्रभवः ।
३२ कर्मणा यमभिप्रैति स सम्प्रदानम् ।
३३ रुच्यर्थानां प्रीयमाणः ।
३४ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।
३५ धारेरुत्तमर्णः ।
३६ स्पृहेरीप्सितः ।
३७ क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः ।
३८ क्रुधद्रुहोरुपसृष्टयोः कर्म ।
३९ राधीक्ष्योर्यस्य विप्रश्नः ।
४० प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ २ ॥
४१ अनुप्रतिगृणश्च ।
४२ साधकतमं करणम् ।
४३ दिवः कर्म च ।
४४ परिक्रयणे सम्प्रदानमन्यतरस्याम् ।
४५ आधारोऽधिकरणम् ।
४६ अधिशीङ्स्थाऽऽसां कर्म ।
४७ अभिनिविशश्च ।
४८ उपान्वध्याङ् वसः ।
४९ कर्तुरीप्सिततमं कर्म ।
५० तथायुक्तं चाऽनीप्सितम् ।
५१ अकथितं च ।
५२ गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽ-
कर्मकाणामणि कर्ता स णौ ।
५३ हृक्रोरन्यतरस्याम् ।
५४ स्वतन्त्रः कर्ता ।
५५ तत्प्रयोजको हेतुश्च ।
५६ प्राग्रीश्वरान्निपाताः ।
५७ चादयोऽसत्त्वे ।
५८ प्रादयः ।
५९ उपसर्गाः क्रियायोगे ।
६० गतिश्च ॥ ३ ॥
६१ ऊर्यादिच्विडाचश्च ।
६२ अनुकरणं चाऽनितिपरम् ।
६३ आदराऽनादरयोः सदसती ।
६४ भूषणेऽलम् ।
६५ अन्तरपरिग्रहे ।
६६ कणेमनसी श्रद्धाप्रतीघाते ।
६७ पुरोऽव्ययम् ।
६८ अस्तं च ।
६९ अच्छ गत्यर्थवदेषु ।
७० अदोऽनुपदेशे ।
७१ तिरोऽन्तर्धौ ।
७२ विभाषा कृञि ।
७३ उपाजेऽन्वाजे ।
७४ साक्षात्प्रभृतीनि च ।
७५ अनत्याधान उरसि-मनसी ।
७६ मध्ये-पदे निवचने च ।
७७ नित्यं हस्ते पाणावुपयमने ।
७८ प्राध्वं बन्धने ।
७९ जीविकोपनिषदावौपम्ये ।
८० ते प्राग्धातोः ॥ ४ ॥
८१ छन्दसि परेऽपि ।
८२ व्यवहिताश्च ।
८३ कर्मप्रवचनीयाः ।
८४ अनुर्लक्षणे ।
८५ तृतीयाऽर्थे ।
८६ हीने ।
८७ उपोऽधिके च ।
८८ अपपरी वर्जने ।

८९ आङ्मर्यादावचने ।
९० लक्षणेत्थम्भूताख्यानभागवीप्सा-
सुप्रतिपर्यनवः ।
९१ अभिरभागे ।
९२ प्रतिः प्रतिनिधि-प्रतिदानयोः ।
९३ अधिपरी अनर्थकौ ।
९४ सुः पूजायाम् ।
९५ अतिरतिक्रमणे च ।
९६ अपिः पदार्थ-सम्भावनान्ववसर्गवर्हा-
समुच्चयेषु ।
९७ अधिरीश्वरे ।
९८ विभाषा कृञि ।
९९ लः परस्मैपदम् ।
१०० तङानावात्मनेपदम् ।
१०१ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।
१०२ तान्येकवचनद्विवचनबहुवचनान्येकशः।
१०३ सुपः।
१०४ विभक्तिश्च ।
१०५ युष्मद्युपपदे समानाधिकरणे
स्थानिन्यपि मध्यमः ।
१०६ प्रहासे च मन्योपपदे मन्यते
रुत्तमएकवच्च ।
१०७ अस्मद्युत्तमः ।
१०८ शेषे प्रथमः ।
१०९ परः सन्निकर्षः संहिता ।
११० विरामोऽवसानम् ।
[आकडाराद्बहुष्वनुप्रतिगृण
ऊयर्यादिच्छन्दसि तिङो दश]

इति प्रथमाध्यायस्य चतुर्थः पादः ।

इति प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः

१ समर्थः पदविधिः ।
२ सुबामन्त्रिते पराङ्गवत्स्वरे ।
३ प्राक्कडारात्समासः ।
४ सह सुपा ।
५ अव्ययीभावः ।
६ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्य-
र्थाभावाऽत्ययाऽसंप्रतिशब्दप्रादुर्भावप-
श्चाद्य थानुपूर्व्ययौगपद्यसादृश्यसंपत्ति-
सा कल्याऽन्तवचनेषु ।
७ यथाऽसादृश्ये ।
८ यावदवधारणे ।
९ सुप्प्रतिना मात्रार्थे ।
१० अक्षशलाकासंख्याः परिणा ।
११ विभाषा ।
१२ अपपरिबहिरश्चवः पञ्चम्या ।
१३ आङ्मर्यादाऽभिविध्योः ।
१४ लक्षणेनाऽभिप्रती आभिमुख्ये ।
१५ अनुर्यत्समया ।
१६ यस्य चाऽऽयामः ।
१७ तिष्ठद्गुप्रभृतीनि च ।
१८ पारेमध्ये षष्ठ्या वा ।
१९ संख्या वंश्येन ।
२० नदीभिश्च ॥ १ ॥
२१ अन्यपदार्थे च संज्ञायाम् ।
२२ तत्पुरुषः ।
२३ द्विगुश्च ।
२४ द्वितीया श्रिताऽतीतपतितगताऽत्यस्त-
प्राप्ताऽऽपन्नैः ।
२५ स्वयं क्तेन ।

२६ खट्वा क्षेपे ।
२७ सामि ।
२८ कालाः ।
२९ अत्यन्तसंयोगे च ।
३० तृतीया तत्कृतार्थेन गुणवचनेन ।
३१ पूर्वसदृशसमोनार्थकलहनिपुण मिश्रश्लक्ष्णैः ।
३२ कर्तृकरणे कृता बहुलम् ।
३३ कृत्यैरधिकार्थवचने ।
३४ अन्नेन व्यञ्जनम् ।
३५ भक्ष्येण मिश्रीकरणम् ।
३६ चतुर्थी तदर्थाऽर्थबलिहितसुखरक्षितैः ।
३७ पञ्चमी भयेन ।
३८ अपेताऽपोढमुक्तप्रतिताऽपत्रस्तैरल्पशः ।
३९ स्तोकाऽन्तिकदूरार्थकृच्छ्राणि क्तेन ।
४० सप्तमी शौण्डैः ।
४१ सिद्धशुष्कपक्व बन्धैश्च ।
४२ ध्वाङ्क्षेण क्षेपे ।
४३ कृत्यैर्ऋणे ।
४४ संज्ञायाम् ।
४५ क्तेनाऽहोरात्राऽवयवाः ।
४६ तत्र ।
४७ क्षेपे ।
४८ पात्रेसंमितादयश्च ।
४९ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।
५० दिक्संख्ये संज्ञायाम् ।
५१ तद्धितार्थोत्तरपदसमाहारे च ।
५२ संख्यापूर्वो द्विगुः ।
५३ कुत्सितानि कुत्सनै ।
५४ पापाऽणके कुत्सितैः ।
५५ उपमानानि सामान्यवचनैः ।
५६ उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे ।
५७ विशेषणं विशेष्येण बहुलम् ।
५८ पूर्वाऽपरप्रथमचरमजघन्यसमानमध्य-मध्यमवीराश्च ।
५९ श्रेण्यादयः कृतादिभिः ।
६० क्तेन नञ्विशिष्टेनाऽनञ् ॥ ३ ॥
६१ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।
६२ वृन्दारकनागकुञ्जरैः पूज्यमानम् ।
६३ कतरकतमौ जातिपरिप्रश्ने ।
६४ किं क्षेपे ।
६५ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशा-वेहद्वष्कयणीप्रवक्तृश्रोत्रियाऽध्या-पकधूर्तैर्जातिः ।
६६ प्रशंसावचनैश्च ।
६७ युवा खलतिपलितवलिनजरतीभिः ।
६८ कृत्यतुल्याख्या अजात्या ।
६९ वर्णो वर्णेन ।
७० कुमारः श्रमणादिभिः ।
७१ चतुष्पादो गर्भिण्या ।
७२ मयूरव्यंसकादयश्च ।
[समर्थोऽन्यपदार्थे च
सिद्धशुष्कसन्महद् द्वादश ॥]

इति द्वितीयाध्यायस्य प्रथमः पादः ।

अथ द्वितीयस्य द्वितीयः पादः

१ पूर्वाऽपराऽधरोत्तरमेकदेशिनैका-धिकरणे ।
२ अर्धं नपुंसकम् ।
३ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ।

४ प्राप्ताऽऽपन्ने च द्वितीयया ।
५ कालाः परिमाणिना ।
६ नञ् ।
७ ईषदकृता ।
८ षष्ठी ।
९ याजकादिभिश्च ।
१० न निर्धारणे ।
११ पूरणगुणसुहितार्थसदव्यय-
तव्यसमानाधिकरणेन ।
१२ क्तेन च पूजायाम् ।
१३ अधिकरणवाचिना च ।
१४ कर्मणि च ।
१५ तृजकाभ्यां कर्तरि ।
१६ कर्तरि च ।
१७ नित्यं क्रीडाजीविकयोः ।
१८ कुगतिप्रादयः ।
१९ उपपदमतिङ् ।
२० अमैवाऽव्ययेन ॥१॥
२१ तृतीयाप्रभृतीन्यन्यतरस्याम् ।
२२ क्त्वा च ।
२३ शेषो बहुव्रीहिः ।
२४ अनेकमन्यपदार्थे ।
२५ संख्ययाऽव्यवाऽऽसन्नाऽदूराऽधिक-
संख्याः संख्येये ।
२६ दिङ्नामान्यन्ताले ।
२७ तत्र तेनेदमिति सरूपे ।
२८ तेन सहेति तुल्ययोगे ।
२९ चार्थे द्वन्द्वः ।
३० उपसर्जनं पूर्वम् ।
३१ राजदन्तादिषु परम् ।
३२ द्वन्द्वे घि ।
३३ अजाद्यदन्तम् ।
३४ अल्पाच्तरम् ।
३५ सप्तमीविशेषणे बहुव्रीहौ ।
३६ निष्ठा ।
३७ वाऽऽहिताग्न्यादिषु ।
३८ कडाराः कर्मधारये ।
[पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश] ॥

इति द्वितीयाध्यायस्य द्वितीयः पादः ।

अथ द्वितीयस्य तृतीयः पादः ।

१ अनभिहिते ।
२ कर्मणि द्वितीया ।
३ तृतीया च होश्छन्दसि ।
४ अन्तराऽन्तरेणयुक्ते ।
५ कालाऽध्वनोरत्यन्तसंयोगे ।
६ अपवर्गे तृतीया ।
७ सप्तमीपञ्चम्यौ कारकमध्ये ।
८ कर्मप्रवचनीययुक्ते द्वितीया ।
९ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।
१० पञ्चम्यपाङ्परिभिः ।
११ प्रतिनिधिप्रतिदानेच यस्मात् ।
१२ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ
चेष्टायामनध्वनि ।
१३ चतुर्थी संप्रदाने ।
१४ क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।
१५ तुमर्थाच्च भाववचनात् ।
१६ नमः स्वस्तिस्वाहास्वधालंवषड्-
योगाच्च ।
१७ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ।
१८ कर्तृकरणयोस्तृतीया ।

१९ सहयुक्तेऽप्रधाने ।
२० येनाङ्गविकारः ।
२१ इत्थम्भूतलक्षणे ।
२२ संज्ञोऽन्यतरस्यां कर्मणि ।
२३ हेतौ ।
२४ अकर्तर्यृणे पञ्चमी ।
२५ विभाषा गुणऽस्त्रियाम् ।
२६ षष्ठी हेतुप्रयोगे ।
२७ सर्वनाम्नस्तृतीया च ।
२८ अपादाने पञ्चमी ।
२९ अन्याऽरादितरर्तेदिक्शब्दाञ्चूत्तरपदा-
ऽऽजाहियुक्ते ।
३० षष्ठ्यतसर्थप्रत्ययेन ।
३१ एनपा द्वितीया ।
३२ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ।
३३ करणे च स्तोकाऽल्पकृच्छ्रकतिप-
यस्याऽसत्त्ववचनस्य ।
३४ दूराऽन्तिकाऽर्थैः षष्ठ्यन्तरस्याम् ।
३५ दूराऽन्तिकार्थेभ्यो द्वितीया च ।
३६ सप्तम्यधिकरणे च ।
३७ यस्य च भावेन भावलक्षणम् ।
३८ षष्ठी चाऽनादरे ।
३९ स्वामी श्वराधिपतिदायादसाक्षिप्रति-
भूप्रसूतैश्च ।
४० आयुक्तकुशलाभ्यां चाऽऽ-
सेवायाम् ॥२॥
४१ यतश्च निर्धारणम् ।
४२ पञ्चमी विभक्ते ।
४३ साधुनिपुणाभ्ययमर्चायां ससभ्ययप्रतेः ।
४४ प्रसितोत्सुकाभ्या तृतीया च ।

४५ नक्षत्रे च लुपि ।
४६ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे
प्रथमा ।
४७ संबोधने च ।
४८ साऽऽमन्त्रितम् ।
४९ एकवचनं सम्बुद्धिः ।
५० षष्ठी शेषे ।
५१ ज्ञोऽविदर्थस्य करणे ।
५२ अधीगर्थधयेशां कर्मणि ।
५३ कृञः प्रतियत्ने ।
५४ रुजार्थानां भाववचनानामज्वरेः ।
५५ आशिषि नाथः ।
५६ जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ।
५७ व्यवहृपणोः समर्थयोः ।
५८ दिवस्तदर्थस्य ।
५९ विभाषोपसर्गे ।
६० द्वितीया ब्राह्मणे ॥ ३ ॥
६१ प्रेष्युब्रुवोर्हविषो देवतासम्प्रदाने ।
६२ चतुर्थ्यें बहुलं छन्दसि ।
६३ यजेश्च करणे ।
६४ कृत्वोऽर्थप्रयोग कालेऽधिकरणे ।
६५ कर्तृकर्मणोः कृति ।
६६ उभयप्रासौ कर्मणि ।
६७ क्तस्य च वर्तमाने ।
६८ अधिकरणवाचिनश्च ।
६९ न लोकाऽव्ययनिष्ठाखलर्थतृनाम् ।
७० अकेनोर्भविष्यदाधमर्ण्ययोः ।
७१ कृत्यानां कर्तरि वा ।
७२ तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यत-
रस्याम् ।

७३ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशल सुखार्थहितैः ।
[अनभिहित इत्थम्भूत-यतश्च प्रेष्यब्रुवोस्त्रयोदश] ॥

इति द्वितीयाध्यास्य तृतीय पादः ।

अथ द्वितीयस्य चतुर्थः पादः ।

१ द्विगुरेकवचनम् ।
२ द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम् ।
३ अनुवादे चरणानाम् ।
४ अध्वर्युक्रतुरनपुंसकम् ।
५ अध्ययनतोऽविप्रकृष्टाख्यानाम् ।
६ जातिरप्राणिनाम् ।
७ विशिष्टलिङ्गो नदीदेशोऽग्रामाः ।
८ क्षुद्रजन्तवः ।
९ येषां च विरोधः शाश्वतिकः ।
१० शुद्धाणामनिरवसितानाम् ।
११ गवाश्वप्रभृतीनि च ।
१२ विभाषा वृक्षमृगतृणधान्यव्यञ्जन पशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ।
१३ विप्रतिषिद्धं चाऽनधिकरणवाचि ।
१४ न दधिपयआदीनि ।
१५ अधिकरणैतावत्त्वे च ।
१६ विभाषा समीपे ।
१७ स नपुंसकम् ।
१८ अव्ययीभावश्च ।
१९ तत्पुरुषोऽनञ्कर्मधारयः ।
२० संज्ञायां कन्थोशीनरेषु ।
२१ उपज्ञोपक्रमं तदाद्याऽऽचिख्यासायाम् ।
२२ छाया बाहुल्ये ।
२३ सभा राजाऽमनुष्यपूर्वा ।
२४ अशाला च ।
२५ विभाषा सेनासुराच्छायाशालानि शानाम् ।
२६ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ।
२७ पूर्ववदश्ववडवौ ।
२८ हैमन्तशिशिरावहोरात्रे च च्छन्दसि ।
२९ रात्राऽह्नाहाः पुंसि ।
३० अपथं नपुंसकम् ।
३१ अर्धर्चाः पुंसि च ।
३२ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ।
३३ एतदस्त्रतसोस्त्रतसौ चाऽनुदातौ ।
३४ द्वितीयाटौस्स्वेनः ।
३५ आर्धधातुके ।
३६ अदो जग्धिर्ल्यप्ति किति ।
३७ लुङ्सनोर्घस्लृ ।
३८ घञपोश्च ।
३९ बहुलं छन्दसि ।
४० लिट्यन्तरस्याम् ॥ २ ॥
४१ वेञो वयिः ।
४२ हनो वध लिङि।
४३ लुङि च ।
४४ आत्मनेपदेष्वन्यतरस्याम् ।
४५ इणो गा लुङि।
४६ णौ गमिरबोधने ।
४७ सनि च ।
४८ इङश्च ।
४९ गाङ् लिटि ।
५० विभाषा लुङ्लृङोः ।
५१ णौ च संश्चङोः ।
५२ अस्तेर्भूः ।

५३ ब्रुवो वचिः ।
५४ चक्षिङः ख्याञ् ।
५५ वा लिटि ।
५६ अजेर्व्यघञपोः ।
५७ वा यौ ।
५८ ण्यक्षत्त्रियार्षञितो यूनिलूगणिञोः ।
५९ पैलादिभ्यश्च ।
६० इञः प्राचाम् ॥ ३ ॥
६१ न तौल्वलिभ्यः ।
६२ तद्राजस्य बहुषु तेनैवाऽस्त्रियाम् ।
६३ यस्कादिभ्यो गोत्रे ।
६४ यञञोश्च ।
६५ अत्रिभृगुकुत्सवसिष्ठगौतमाऽङ्गि-रोसोभ्यश्च ।
६६ बह्वच इञः प्राच्य-भरतेषु ।
६७ न गोपवनादिभ्यः ।
६८ तिक-कितवादिभ्यो द्वन्द्वे ।
६९ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे
७० आगस्त्य-कौण्डिन्ययोरगस्ति कुण्डिनच् ।
७१ सुपो धातु-प्रातिपदिकयोः ।
७२ अदिप्रभृतिभ्यः शपः ।
७३ बहुलं छन्दसि ।
७४ यङोऽचि च ।
७५ जुहोत्यादिभ्यः श्लुः ।
७६ बहुलं छन्दसि ।
७७ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।
७८ विभाषा घ्राधेट्शाच्छासः ।
७९ तनादिभ्यस्तथासोः ।
८० मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमि जनिभ्यो लेः ॥ ४ ॥
८१ आमः ।
८२ अव्ययादाप्सुपः ।
८३ नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः ।
८४ तृतीयासप्तम्योर्बहुलम् ।
८५ लुटः प्रथमस्य डारौरसः ।
[द्विगुरुपञ्चोक्रमं वेञो वयिर्न तौल्वलिभ्य आमः पञ्च ॥]

इति द्वितीयाध्यायस्य चतुर्थः पादः ।

इति द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

प्रथमः पादः ।

१ प्रत्ययः ।
२ परश्च ।
३ आद्युदात्तश्च ।
४ अनुदात्तौ सुप्पितौ ।
५ गुप्तिज्किद्भ्यः सन् ।
६ मान्बधदान्शान्भ्यो दीर्घश्चाऽभ्यासस्य ।
७ धातोः कर्मणः समानकर्तृकादिच्छायां वा ।
८ सुप आत्मनः क्यच् ।
९ काम्यच्च ।
१० उपमानादाचारे ।
११ कर्तुः क्यङ् सलोपश्च ।
१२ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ।
१३ लोहितादि-डाज्भ्यः क्यष् ।
१४ कष्टाय क्रमणे ।
१५ कर्मणो रोमन्थ-तपोभ्यां वर्ति-चरोः ।
१६ बाष्पोष्मभ्यामुद्वमने ।

१७ शब्दवैर-कलहाऽभ्र-कण्व-मेघेभ्यःकरणे ।
१८ सुखादिभ्यः कर्तृवेदनायाम् ।
१९ मनोवरिवश्चित्रङः क्यच् ।
२० पुच्छभाण्डचीवराण्णिङ्॥ १ ॥
२१ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहल-कलकृततूस्येभ्यो णिच् ।
२२ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ।
२३ नित्यं कौटिल्ये गतौ ।
२४ लुपसदचरजपजभदहदशगृभ्योभाव-गर्हायाम् ।
२५ सत्यापपाशरूपवीणातूलश्लोकसेना-लोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ।
२६ हेतुमति च ।
२७ कण्ड्वादिभ्यो यक् ।
२८ गुपूधूपविच्छिपणिपनिभ्य आयः ।
२९ ऋतेरीयङ् ।
३० कमेर्णिङ् ।
३१ आयादय आर्द्धधातुके वा ।
३२ सनाद्यन्ता धातवः ।
३३ स्यतासी लृलुटोः ।
३४ सिब्बहुलं लेटि ।
३५ कास्प्रत्ययादाममन्त्रे लिटि ।
३६ इजादेश्च गुरुमतोऽनृच्छः ।
३७ दयायासश्च ।
३८ उष-विद-जागृभ्योऽन्यतरस्याम् ।
३९ भीह्रीभृहुवां श्लुवच्च ।
४० कृञ्चाऽनुप्रयुज्यते लिटि ।
४१ विदांकुर्वन्त्वित्यन्तरस्याम् ।
४२ अभ्युत्सादयां-प्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि ।
४३ च्लि लुङि ।
४४ च्लेः सिच् ।
४५ शल इगुपधादनिटः क्सः ।
४६ श्लिष आलिङ्गने ।
४७ न दृशः ।
४८ णिश्रिद्रुस्त्रुभ्यः कर्त्तरि चङ् ।
४९ विभाषा धेट्श्व्योः ।
५० गुपेश्छन्दसि ।
५१ नोनयति-ध्वनयत्येलयत्यर्दयतिभ्यः ।
५२ अस्यतिवक्तिख्यातिभ्योऽङ् ।
५३ लिपि-सिचि-ह्वश्च ।
५४ आत्मनेपदेष्वन्यतरस्याम् ।
५५ पुषादिद्युताद्लृदितः परस्मैपदेषु ।
५६ सर्तिशास्त्यर्तिभ्यश्च ।
५७ इरितो वा ।
५८ जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्वि-भ्यश्च ।
५९ कृमृदृरुहिभ्यश्छन्दसि ।
६० चिण् ते पदः ॥ ३ ॥
६१ दीपजनबुधपूरितायिप्यायिभ्योऽन्य-तरस्याम् ।
६२ अचः कर्मकर्त्तरि ।
६३ दुहश्च ।
६४ न रुधः ।
६५ तपोऽनुतापे च ।
६६ चिण् भावकर्मणोः ।
६७ सार्वधातुके यक् ।
६८ कर्तरि शप् ।

६९ दिवादिभ्यः श्यन् ।
७० वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसि त्रुटिलषः ।
७१ यसोऽनुपसर्गात् ।
७२ संयसश्च ।
७३ स्वादिभ्यः श्नुः ।
७४ श्रुवः शृच ।
७५ अक्षोऽन्यतरस्याम् ।
७६ तनूकरणे तक्षः ।
७७ तुदादिभ्यः शः ।
७८ रुधादिभ्यः श्नम् ।
७९ तनादिकृञ्भ्य उः ।
८० धिन्विकृण्व्योर च ॥ ४ ॥
८१ क्र्यादिभ्यः श्ना ।
८२ स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ।
८३ हलः श्नः शानज्झौ ।
८४ छन्दसि शायजपि ।
८५ व्यत्ययो बहुलम् ।
८६ लिङ्याशिष्यङ् ।
८७ कर्मवत्कर्मणा तुल्यक्रियः ।
८८ तपस्तपःकर्मकस्यैव ।
८९ न दुहस्नुनमां यक्चिणौ ।
९० कुषि-रजोः प्राचां श्यन् परस्मैपदं च । ।
९१ धातोः ।
९२ तत्रोपपदं सप्तमीस्थम् ।
९३ कृदतिङ् ।
९४ वाऽसरूपोऽस्त्रियाम् ।
९५ कृत्याः ।
९६ तव्यत्तव्याऽनीयरः ।
९७ अचो यत् ।
९८ पोरदुपधात् ।
९९ शकिसहोश्च ।
१०० गदमदचरयमश्चानुपसर्गे ।
१०१ अवद्यपण्यवर्या गर्ह्यपणितव्याऽनिरोधेषु ।
१०२ वह्यं करणम् ।
१०३ अर्यः स्वामि-वैश्ययोः
१०४ उपसर्या काल्या प्रजने ।
१०५ अजर्यं सङ्गतम् ।
१०६ वदः सुपि क्यप् च ।
१०७ भुवो भावे ।
१०८ हनस्त च ।
१०९ एतिस्तुशास्वृदृजुषः क्यप् ।
११० ऋदुपधाच्चाऽक्लृपिचृतेः ।
१११ ई च खनः ।
११२ मृजोऽसंज्ञायाम् ।
११३ मृजेर्विभाषा ।
११४ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याऽव्यथ्याः ।
११५ भिद्योद्ध्यौ नदे ।
११६ पुष्य-सिद्ध्यौ नक्षत्रे ।
११७ विपूयविनीयजित्या मुञ्जकल्कहलिषु
११८ प्रत्यपिभ्यां ग्रहेश्छन्दसि ।
११९ पदाऽस्वैरिबाह्या-पक्ष्येषु च ।
१२० विभाषा कृवृषोः ॥ ६ ॥
१२१ युग्यं च पत्त्रे ।
१२२ अमावस्यदन्यतरस्याम् ।
१२३ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयो-

च्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेव-
यज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्य-
स्ताव्योपचाय्यपृडानि ।
१२४ ऋहलोर्ण्यत् ।
१२५ ओरावश्यके ।
१२६ आसुयुवपिरपित्रपिचमश्च ।
१२७ आनाय्योऽनित्ये ।
१२८ प्रणाय्योऽसंमतौ ।
१२९ पाय्यसान्नाय्यनिकाय्यधाय्या
मानहविर्निवाससामिधेनीषु ।
१३० क्रतौ कुण्डपाय्यसञ्चाय्यौ ।
१३१ अग्नौ परिचाय्योपचाय्यसमूह्याः ।
१३२ चित्याऽग्निचित्ये च ।
१३३ ण्वुल्तृचौ ।
१३४ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।
१३५ इगुपधज्ञाप्रीकिरः कः ।
१३६ आतश्चोपसर्गे ।
१३७ पाघ्राध्माधेट्दृशः शः ।
१३८ अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युु-
देजिचेतिसातिसाहिभ्यश्च ।
१३९ ददातिदधात्योर्विभाषा ।
१४० ज्वलितिकसन्तेभ्यो णः ॥ ७ ॥
१४१ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिह-
श्लिषश्वसश्च ।
१४२ दुन्योरनुपसर्गे ।
१४३ विभाषा ग्रहः ।
१४४ गेहे कः ।
१४५ शिल्पिनि ष्वुन् ।
१४६ गस्थकन् ।
१४७ ण्युट् च ।
१४८ हश्च व्रीहिकालयोः ।
१४९ प्रुसृल्वः समभिहारे वुन् ।
१५० आशिषि च ।
[प्रत्य्यो मुण्ड-विदां दीपजनक्र्यादि-
भ्योऽ वद्ययुग्य च श्याद्व्यधा दश ॥]

इति तृतीयाध्यायस्य प्रथम पादः ।

अथ द्वितीयः पादः ।

१ कर्मण्यण् ।
२ ह्वावामश्च ।
३ आतोऽनुपसर्गे कः ।
४ सुपि स्थः ।
५ तुन्दशोकयोः परिमृजाऽपनुदोः ।
६ प्रे दाज्ञः ।
७ समि ख्यः ।
८ गापोष्टक् ।
९ हरतेरनुद्यमनेऽच् ।
१० वयसि च ।
११ आङि ताच्छील्ये ।
१२ अर्हः ।
१३ स्तम्बकर्णयो रमिजपोः ।
१४ शमि धातोः संज्ञायाम् ।
१५ अधिकरणे शेतेः ।
१६ चरेष्टः ।
१७ भिक्षा-सेना-ऽऽदायेषु च ।
१८ पुरोऽग्रतोऽग्रेषु सर्त्तेः ।
१९ पूर्वे कर्त्तरि ।
२० कृञो हेतुताच्छील्याऽऽनुलोम्येषु ॥१॥
२१ दिवाविभानिशाप्रभाभास्करान्तानन्ता-
दिबहुनान्दीकिंलिपिलिबिबलिभक्ति-
कर्तृचित्रक्षेत्र-सङ्ख्याजङ्घाबाह्वहर्य-

तद्धनुररुःषु ।
२२ कर्मणि भृतौ ।
२३ न शब्दश्लोकलहगाथावैरचाटु सूत्रमन्त्रपदेषु ।
२४ स्तम्ब-शकृतोरिन् ।
२५ हरतेर्दृतिनाथयोः पशौ ।
२६ फलेग्रहिरात्मम्भरिश्च ।
२७ छन्दसिवनसनरक्षिमथाम् ।
२८ एजेः खश् ।
२९ नासिकास्तनयोर्ध्माधेटोः ।
३० नाडीमुष्ट्योश्च ।
३१ उदि कूले रुजिवहोः
३२ वहाऽभ्रेलिहः
३३ परिमाणे पचः ।
३४ मितनखे च ।
३५ विध्वरुषोस्तुदः ।
३६ असूर्यललाटयोदृशितपोः ।
३७ उग्रम्पश्येरंमदपाणिन्धामाश्च ।
३८ प्रियवशे वदः खच् ।
३९ द्विषत्परयोस्तापेः ।
४० वाचि यमो व्रते ॥ २ ॥
४१ पूःसर्वयोर्दारिसहोः ।
४२ सर्वकूलाऽभ्रकरीषेषु कषः ।
४३ मेघर्त्तिभयेषु कृञः ।
४४ क्षेमप्रियमद्रेऽण् च ।
४५ आशिते भुवः करणभावयोः ।
४६ संज्ञायां भृतृवृजिधारिसहितपिदमः ।
४७ गमश्च ।
४८ अन्ताऽत्यन्ताऽध्वदूरपारसर्वाऽनन्तेषु डः ।
४९ आशिषि हनः ।
५० अपेक्लेश-तमसोः ।
५१ कुमारशीर्षयोर्णिनिः ।
५२ लक्षणे जायापत्योष्टक् ।
५३ अमनुष्यकर्तृके च ।
५४ शक्तौ हस्तिकपाटयोः ।
५५ पाणिघ-ताडघौ शिल्पिनि ।
५६ आढ्यसुभगस्थूलपलितनग्नाऽन्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ।
५७ कर्तरि भुवः खिष्णुच्खुकञौ ।
५८ स्पृशोऽनुदके किन् ।
५९ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ।
६० त्वदादिषु दृशोऽनालोचने कञ्च ॥ ३ ॥
६१ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ।
६२ भजो ण्विः ।
६३ छन्दसि सहः ।
६४ वहश्च ।
६५ कव्यपुरीषपुरीष्येषु ञ्युट् ।
६६ हव्येऽनन्तः पादम् ।
६७ जनसनखनक्रमगमो विट् ।
६८ अदोऽनन्ने ।
६९ क्रव्ये च ।
७० दुहः कब्घश्च ।
७१ मन्त्रे श्वेतवहोक्थशस्पुरोडाशोण्विन् ।
७२ अवे यजः ।
७३ विजुषे छन्दसि ।
७४ आतो मनिन्क्वनिब्वनिपश्च ।

७५ अन्येभ्योऽपि दृश्यन्ते ।
७६ क्विप् च ।
७७ स्थः क च ।
७८ सुप्यजातौ णिनिस्ताच्छील्ये ।
७९ कर्तर्युपमाने ।
८० व्रते ॥ ४ ॥
८१ बहुलमाभीक्ष्ण्ये ।
८२ मनः ।
८३ आत्ममाने खश्च ।
८४ भूते ।
८५ करणे यजः ।
८६ कर्मणि हनः ।
८७ ब्रह्मभ्रूणवृत्रेषु क्विप् ।
८८ बहुलं छन्दसि ।
८९ सुकर्मपापमन्त्रपुण्येषु कृञः ।
९० सोमे सुञः ।
९१ अग्नौ चेः ।
९२ कर्मण्यग्न्याख्यायाम् ।
९३ कर्मणीनिविक्रियः ।
९४ दृशेः क्वनिप् ।
९५ राजनि युधि कृञः ।
९६ सहे च ।
९७ सप्तम्यां जनेर्डः ।
९८ पञ्चम्यामजातौ ।
९९ उपसर्गे च संज्ञायाम् ।
१०० अनौ कर्मणि ॥ ५ ॥
१०१ अन्येष्वपि दृश्यते ।
१०२ निष्ठा ।
१०३ सुयजोर्ङ्वनिप् ।
१०४ जीर्यतेरतृन् ।
१०५ छन्दसि लिट् ।
१०६ लिटः कानज्वा ।
१०७ क्वसुश्च ।
१०८ भाषायां सदवसश्रुवः ।
१०९ उपेयिवाननाश्वाननूचानश्च ।
११० लुङ् ।
१११ अनद्यतने लङ् ।
११२ अभिज्ञावचने लृट् ।
११३ न यदि ।
११४ विभाषा साकाङ्क्षे ।
११५ परोक्षे लिट् ।
११६ ह-शश्वतोर्लङ् च ।
११७ प्रश्ने चाऽऽसन्नकाले ।
११८ लट् स्मे ।
११९ अपरोक्षे च ।
१२० ननौ पृष्टप्रतिवचने ॥ ६ ॥
१२१ नन्वोर्विभाषा ।
१२२ पुरि लुङ् चाऽस्मे ।
१२३ वर्त्तमाने लट् ।
१२४ लटः शतृशानचावप्रथमा-
समानाधिकरणे ।
१२५ सम्बोधने च ।
१२६ लक्षणहेत्वोः क्रियायाः ।
१२७ तौ सत् ।
१२८ पुङ्यजोः शानन् ।
१२९ ताच्छील्यवयोवचनशक्तिषु चानश् ।
१३० इङ्धार्योःशत्रकृच्छ्रिणि ।
१३१ द्विषोऽमित्रे ।
१३२ सुञो यज्ञसंयोगे ।
१३३ अर्हः प्रशंसायाम् ।

१३४ आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ।
१३५ तृन् ।
१३६ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतो-न्मदरुच्यपत्रपवृतुवृधुसहचरणइष्णु च् ।
१३७ णेश्छन्दसि ।
१३८ भुवश्च ।
१३९ ग्लाजिस्थश्च ग्स्नुः ।
१४० त्रसिगृधिधृषिक्षिपेः क्नुः ।
१४१ शमित्यष्टाभ्यो घिनुण् ।
१४२ सम्पृचानुरुधाङ्यमाङ्यसपरिसृ-संसृजपरिदेविसंज्वरपरिक्षिपपरि-रटपरिवदपरिदहपरिमुहदुषद्विषद्रु-हदुहयुजाक्रीडविविचत्यजरजभजा-तिचरापचरामुषाभ्याहनश्च ।
१४३ वौ कषलसकत्थस्रम्भः ।
१४४ अपे च लषः ।
१४५ प्रे लपसुद्रुमथवदवसः ।
१४६ निन्दहिंसक्लिशखादविनाशपरिक्षि-पपरिरटपरिवादिव्याभाषासूयोवुञ् ।
१४७ देविक्रुशोश्चोपसर्गे ।
१४८ चलनशब्दार्थादकर्मकाद्युच् ।
१४९ अनुदात्तेतश्च हलादेः ।
१५० जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वल-शुचलषपतपदः ।
१५१ क्रुधमण्डार्थेभ्यश्च ।
१५२ न यः ।
१५३ सूददीपदीक्षश्च ।
१५४ लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् ।
१५५ जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।
१५६ प्रजोरिनिः ।
१५७ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरि-भूप्रसूभ्यश्च ।
१५८ स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।
१५९ दाधेट्सिशसदो रुः ।
१६० सृघस्यदः क्मरच् ॥ ८ ॥
१६१ भञ्जभासमिदो घुरच् ।
१६२ विदिभिदिच्छिदेः कुरच् ।
१६३ इण्नशजिसर्त्तिभ्यः क्वरप् ।
१६४ गंत्वरश्च ।
१६५ जागरुकः ।
१६६ यजजपदशां यङः ।
१६७ नमिकम्पिस्म्यजसकमहिंसदीपोरः ।
१६८ सनाशंसभिक्ष उः ।
१६९ विन्दुरिच्छुः ।
१७० क्याच्छन्दसि ।
१७१ आदृगमहनजनः किकिनौ लिट् च ।
१७२ स्वपितृषोर्नजिङ् ।
१७३ श्रृवन्द्योरारुः ।
१७४ भियः क्रुक्लुकनौ ।
१७५ स्थेशभासपिसकसो वरच् ।
१७६ यश्च यङः ।
१७७ भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् ।
१७८ अन्येभ्योऽपि दृश्यते ।
१७९ भुवः संज्ञान्तरयोः ।
१८० विप्रसम्भ्यो ड्वसंज्ञायाम् ।
१८१ धः कर्मणि ष्ट्रन् ।
१८२ दाम्नीशसयुयुजस्तुतुदसिसिचमिह-

पतदशनहः करणे ।
१८३ हलसूकरयोः पुवः ।
१८४ अर्त्तिलूधुसूखनसहचर इत्रः ।
१८५ पुवः संज्ञायाम् ।
१८६ कर्त्तरि चर्षिदेवतयोः ।
१८७ ञीतः क्तः ।
१८८ मतिबुद्धिपूजार्थेभ्यश्च ।
[कर्मणि-दिवा-पूःसर्व-सत्सू-बहुल-मन्येष्वपि-नन्वोः-शमिति भञ्जभासधःकर्मण्यष्टौ] ॥

अथ तृतीये ततीयः पादः ।

१ उणादयो बहुलम् ।
२ भूतेऽपि दृश्यन्ते ।
३ भविष्यति गम्यादयः ।
४ यावत्पुरानिपातयोर्लट्
५ विभाषा कदार्कर्ह्योः ।
६ किंवृत्ते लिप्सायाम् ।
७ लिप्स्यमानसिद्धौ च ।
८ लोडर्थलक्षणे च ।
९ लिङ् चोर्ध्वमौहूर्त्तिके ।
१० तुमन्ण्वुलौ क्रियायां क्रियार्थायाम् ।
११ भाववचनाश्च ।
१२ अण् कर्मणि च ।
१३ लृट् शेषे च ।
१४ लृटः सद्वा ।
१५ अनद्यतने लुट् ।
१६ पदरुजविशस्पृशो घञ् ।
१७ सृ स्थिरे ।
१८ भावे ।
१९ अकर्त्तरि च कारके संज्ञायाम् ।
२० परिमाणाख्यायां सर्वेभ्यः ॥ १ ॥
२१ इञ्श्च ।
२२ उपसेर्ग रुवः ।
२३ समि युद्रुदुवः ।
२४ श्रिणीभुवोऽनुपसर्गे
२५ वौ क्षुश्रुवः ।
२६ अवोदोर्नियः ।
२७ प्रे द्रुस्तुस्त्रु वः ।
२८ निरभ्योः पूल्वोः ।
२९ उन्न्योग्रः ।
३० कृ धान्ये ।
३१ यज्ञे समि स्तुवः ।
३२ प्रे स्त्रोऽयज्ञे ।
३३ प्रथने वावशब्दे ।
३४ छन्दोनाम्नि च ।
३५ उदि ग्रहः ।
३६ समि मुष्टौ ।
३७ परिन्योर्नीणोर्द्यूताऽभ्रेषयोः ।
३८ परावनुपात्यय इणः ।
३९ व्युपयोः शेतेः पर्याये ।
४० हस्तादाने चेरस्तेये ॥ २ ॥
४१ निवासचितिशरीरोपसमाधानेष्वादेश्च कः ।
४२ सङ्घे चानौत्तराधर्ये ।
४३ कर्मव्यतिहारे णच् स्त्रियाम् ।
४४ अभिविधौ भाव इनुण् ।
४५ आक्रोशेऽवन्योर्ग्रहः ।
४६ प्रे लिप्सायाम् ।
४७ परौ यज्ञे ।
४८ नौ वृ धान्ये ।

४९ उदि श्रयतियौतिपूद्रुवः ।
५० विभाषाऽऽङिरुप्लुवोः ।
५१ अवे ग्रहो वर्षप्रतिबन्धे ।
५२ प्रे वणिजाम् ।
५३ रश्मौ च ।
५४ वृणोतेराच्छादने ।
५५ परौ भुवोऽवज्ञाने ।
५६ एरच् ।
५७ ऋदोरप् ।
५८ ग्रहवृदृनिश्चिगमश्च ।
५९ उपसर्गेऽदः ।
६० नौ ण च ॥ ३ ॥
६१ व्यधजपोरनुपसर्गे ।
६२ स्वनहसोर्वा ।
६३ यमः समुपनिविषु च ।
६४ नौ गदनदपठस्वनः ।
६५ क्वणो वीणायां च ।
६६ नित्यं पणः परिमाणे ।
६७ मदोऽनुपसर्गे ।
६८ प्रमदसंमदौ हर्षे ।
६९ समुदोरजः पशुषु ।
७० अक्षेषु ग्लहः ।
७१ प्रजने सर्त्तेः ।
७२ ह्वः संप्रसारण च न्यभ्युपविषु ।
७३ आङि युद्धे ।
७४ निपानमाहावः ।
७५ भावेऽनुपसर्गस्य ।
७६ हनश्च वधः ।
७७ मूर्तौ घनः ।
७८ अन्तर्घनो देशे ।
७९ अगारैकदेशे प्रघणः प्रघाणश्च ।
८० उद्घनोऽत्याधानम् ॥ ४ ॥
८१ अपघनोऽङ्गम् ।
८२ करणेऽयोविद्रुषु ।
८३ स्तम्बे क च ।
८४ परौ घः ।
८५ उपघ्न आश्रये ।
८६ सङ्घोद्घौ गणप्रशंसयोः ।
८७ निघो निमित्तम् ।
८८ ड्वितः क्त्रिः ।
८९ ट्वितोऽथुच् ।
९० यजयाचयतविच्छप्रच्छरक्षो नङ् ।
९१ स्वनो नन् ।
९२ उपसर्गे घोः किः ।
९३ कर्मण्यधिकरणे च ।
९४ स्त्रियां क्तिन् ।
९५ स्थागापापचो भावे ।
९६ मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ।
९७ ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ।
९८ व्रजयजोर्भावे क्यप् ।
९९ संज्ञायां समजनिषदनिपतमनविद-
षुञ्शीङ्भृञिणः ।
१०० कृञः श च ॥ ५ ॥
१०१ इच्छा ।
१०२ अ प्रत्ययात् ।
१०३ गुरोश्च हलः ।
१०४ षिद्भिदादिभ्योऽङ् ।
१०५ चिन्तिपूजिकथिकुम्बिचर्चश्च ।
१०६ आतश्चोपसर्गे ।
१०७ ण्यासश्रन्थो युच् ।

१०८ रोगाख्यायां ण्वुल् बहुलम् ।
१०९ संज्ञायाम् ।
११० विभाषाऽऽख्यानपरिप्रश्नयोरिञ् च ।
१११ पर्यायाऽर्हर्णोत्पत्तिषु ण्वुच् ।
११२ आक्रोशे नञ्यनिः ।
११३ कृत्यल्युटो बहुलम् ।
११४ नपुंसके भावे क्तः ।
११५ ल्युट् च ।
११६ कर्मणि च येन संस्पर्शात् कर्तु :- शरीरसुखम् ।
११७ करणाऽधिकरणयोश्च ।
११८ पुंसि संज्ञायां घः प्रायेण ।
११९ गोचरसंचरवहव्रजव्यजाऽऽ- पणानिगमाश्च ।
१२० अवे तृस्त्रोर्घञ् ।
१२१ हलश्च ।
१२२ अध्यायन्यायोद्यावसंहाराश्च ।
१२३ उदङ्कोऽनुदके ।
१२४ जालमानायः ।
१२५ खनो घ च ।
१२६ ईषद्दुःसुषु कृच्छ्राऽकृच्छार्थेषु खल् ।
१२७ कर्तृकर्मणोश्च भूकृञोः ।
१२८ आतो युच् ।
१२९ छन्दसि गत्यर्थेभ्यः ।
१३० अन्यभ्योऽपि दृश्यते ।
१३१ वर्त्तमानसामीप्ये वर्त्तमानवद्वा ।
१३२ आशंसयां भूतवच्च ।
१३३ क्षिप्रवचने लृट् ।
१३४ आशंसावचने लिङ् ।
१३५ नाऽनद्यतनवत्क्रियाप्रबन्ध सामीप्ययोः ।
१३६ भविष्यति मर्यादावचनेऽवरस्मिन् ।
१३७ कालविभागे चाऽनहोरात्राणाम् ।
१३८ परस्मिन् विभाषा ।
१३९ लिङ्निमित्ते लृङक्रियाऽतिपत्तौ ।
१४० भूते च ॥ ७ ॥
१४१ वोताप्योः ।
१४२ गर्हायां लडपिजात्वोः ।
१४३ विभाषा कथमि लिङ् च ।
१४४ किंवृत्ते लिङ्लृटौ ।
१४५ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ।
१४६ किंकिलास्त्यर्थेषु लृट् ।
१४७ जातुयदोर्लिङ् ।
१४८ यच्चयत्रयोः ।
१४९ गर्हायां च ।
१५० चित्रीकरणे च ।
१५१ शेषे लृडयदौ ।
१५२ उताप्योः समर्थयोर्लिङ् ।
१५३ कामप्रवेदनेऽकच्चिति ।
१५४ संभावनेऽलमिति चेत्सिद्धाऽप्रयोगे ।
१५५ विभाषा धातौ संभावनवचनेऽयदि ।
१५६ हेतुहेतुमतोर्लिङ् ।
१५७ इच्छार्येषु लिङ्लोटौ ।
१५८ समानकर्तृकेषु तुमुन् ।
१५९ लिङ् च ।
१६० इच्छर्थेभ्यो विभाषा वर्त्तमाने ।
१६१ विधिनिमन्त्रणामन्त्रणाऽधीष्टसंप्रश्न- प्रार्थनेषु लिङ् ।
१६२ लोट् च ।
१६३ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ।

१६४ लिङ् चोर्ध्वमौहुर्तिके ।

१६५ स्मे लोट् ।

१६६ अधीष्टे च ।

१६७ कालसमयवेलासु तुमुन् ।

१६८ लिङ् यदि ।

१६९ अर्हे कृत्यतृचश्च ।

१७० आवश्यकाधमर्ण्ययोर्णिनिः ।

१७१ कृत्याश्च ।

१७२ शकि लिङ् च ।

१७३ आशिषि लिङ् लोटौ ।

१७४ क्तिच्क्तौ च संज्ञायाम् ।

१७५ माङि लुङ् ।

१७६ स्मोत्तरे लङ् च ।

['उणादय इडे निवासव्यधजपो-रपधन-इच्छा हलश्च-वोताप्योर्विधि-षोडश'] ॥

अथ तृतीयाध्याये चतुर्थः पादः

१ धातुसम्बन्धे प्रत्ययाः ।

२ क्रियासमभिहारे लोट्, लोटो हिस्वौ, वा च तध्वमोः ।

३ समुच्चयेऽन्यतरस्याम् ।

४ यथाविध्यनुप्रयोगः पूर्वास्मिन् ।

५ समुच्चये सामान्यवचनस्य ।

६ छन्दसि लुङ् लङ्लिटः ।

७ लिङ्थें लेट् ।

८ उपसंवादाऽऽशङ्कयोश्च ।

९ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यै-अध्यैन्कध्यैन्शध्यैशध्यैन्-तवैतवेङ्तवेनः ।

१० प्रयै-रोहिष्यै-अव्यथिष्यै ।

११ दृशे विख्ये च ।

१२ शकि णमुल्कमुलौ ।

१३ ईश्वरे तोसुन्कसुनौ ।

१४ कृत्यार्थे तवैकेन्केन्यत्वनः ।

१५ अवचक्षे च ।

१६ भावलक्षणे स्थेणकृञ्वदिचरिहुत-मिजनिभ्यस्तोसुन् ।

१७ सृपितृदोः कसुन् ।

१८ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ।

१९ उदीचां माङो व्यतीहारे ।

२० पराऽवरयोगे च ॥ १ ॥

२१ समानकर्तृकयोः पूर्वकाले ।

२२ आभीक्ष्ण्ये णमुल् च ।

२३ न यद्यनाकाङ्क्षे ।

२४ विभाषाऽग्रेप्रथमपूर्वेषु ।

२५ कर्मण्याक्रोशे कृञः खमुञ् ।

२६ स्वादुमि णमुल् ।

२७ अन्यथैवंकथमित्थंसु सिद्धाऽप्रयोगश्चेत् ।

२८ यथातथयोरसूयाप्रतिवचने ।

२९ कर्मणि दृशिविदोः साकल्ये ।

३० यावति विन्दजीवोः ।

३१ चर्मोदरयोः पूरेः ।

३२ वर्षप्रमाण ऊलोपश्चास्याऽन्यतरस्याम् ।

३३ चेले क्नोपेः ।

३४ निमूलमूलयोः कषः ।

३५ शुष्कचूर्णरुक्षेषु पिषः ।

३६ समूलाऽकृतजीवेषु हन्कृञ्ग्रहः ।

३७ करणे हनः ।

३८ स्नेहने पिषः ।

३९ हस्ते वर्त्तिग्रहोः ।

४० स्वे पुषः ॥ २ ॥
४१ अधिकरणे बन्धः ।
४२ संज्ञायाम् ।
४३ कर्त्रोर्जीवपुरुषयोर्नशिवहोः ।
४४ ऊर्ध्वे शुषिपूरोः ।
४५ उपमाने कर्मणि च ।
४६ कषादिषु यथाविध्यनुप्रयोगः ।
४७ उपदंशस्तृतीयायाम् ।
४८ हिंसार्थानां च समानकर्मकाणाम् ।
४९ सप्तम्यां चोपपीडरुधकर्षः ।
५० समासत्तौ ।
५१ प्रमाणे च ।
५२ अपादाने परीप्सायाम् ।
५३ द्वितीयायां च ।
५४ स्वाङ्गेऽध्रुवे ।
५५ परिक्लिश्यमाने च ।
५६ विशिपतिपदिस्कन्दां व्याप्यमानाऽऽ-सेव्यमानयोः ।
५७ अस्यतितृषोः क्रियान्तरे कालेषु ।
५८ नाम्न्यादिशिग्रहोः ।
५९ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ।
६० तिर्यच्यपवर्गे ॥ ३ ॥
६१ स्वाङ्गतस्प्रत्यये कृभ्वोः ।
६२ नाधाऽर्थप्रत्यये च्व्यर्थे ।
६३ तूष्णीमि भुवः ।
६४ अन्वच्यानुलोम्ये ।
६५ शकधृषज्ञाग्लाघटरभलभक्रमसहाऽ-र्हास्त्यर्थेषु तुमुन् ।
६६ पर्याप्तिवचनेष्वलमर्थेषु ।
६७ कर्त्तरि कृत् ।
६८ भव्यगेयप्रवचनीयोपस्थानीयजन्या-प्लाव्यापात्या वा ।
६९ लः कर्मणि च भावे चाऽकर्मकेभ्यः ।
७० तयोरेव कृत्यक्तखलर्थाः ।
७१ आदिकर्मणि क्त कर्त्तरि च ।
७२ गत्यर्थाऽकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ।
७३ दाशगोघ्नौ सम्प्रदाने ।
७४ भीमादयोऽपादाने ।
७५ ताभ्यामन्यत्रोणादयः ।
७६ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यव-सानार्थेभ्यः ।
७७ लस्य ।
७८ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातां-झथासाथांध्वमिड्वहिमहिङ् ।
७९ टित आत्मनेपदानां टेरे ।
८० थासः से ।
८१ लिटस्तझयोरेशिरेच् ।
८२ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ।
८३ विदो लटो वा ।
८४ ब्रुवःपञ्चानामादित आहो ब्रुवः ।
८५ लोटो लङ्वत् ।
८६ एरुः ।
८७ सेर्ह्यपिच्च ।
८८ वा च्छन्दसि ।
८९ मेर्निः ।
९० आमेतः ।
९१ सवाभ्यां वामौ ।
९२ आडुत्तमस्य पिच्च ।

९३ एत ऐ ।
९४ लेटोऽडाटौ ।
९५ आत ऐ ।
९६ वैतोऽन्यत्र ।
९७ इतश्च लोपः परस्मैपदेषु ।
९८ स उत्तमस्य ।
९९ नित्यं ङितः ।
१०० इतश्च ॥ ४ ॥
१०१ तस्थस्थमिपां तान्तन्तामः ।
१०२ लिङ सीयुट् ।
१०३ यासुट् परस्मैपदेषूदात्तो ङिच्च ।
१०४ किदाशिषि ।
१०५ झस्यरन् ।
१०६ इटोऽत् ।
१०७ सुट् तिथोः ।
१०८ झेर्जुस्
१०९ सिजभ्यस्तविदिभ्यश्च ।
११० आतः ।
१११ लङः शाकटायनस्यैव ।
११२ द्विषश्च ।
११३ तिङ्शित्सार्वधातुकम् ।
११४ आर्द्धधातुकं शेषः ।
११५ लिट् च ।
११६ लिङाशिषि ।
११७ छन्दस्युभयथा ।

['धातुसम्बन्धे समानाऽधिकरणे स्वाङ्गे लिटस्तस्थस्थमिपां सप्तदशं']

इति तृतीयाध्यायस्य चतुर्थः पादः ।

इति तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्याय

अथ प्रथमः पादः

१ ङ्याप्प्रातिपदिकात् ।
२ स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-
सङ्सिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ।
३ स्त्रियाम् ।
४ अजाद्यतष्टाप् ।
५ ऋन्नेभ्यो ङीप् ।
६ उगितश्च ।
७ वनो र च ।
८ पादोऽन्यतरस्याम् ।
९ टाबृचि ।
१० न षट्स्वस्रादिभ्यः ।
११ मनः ।
१२ अनो बहुव्रीहेः ।
१३ डाबुभाभ्यामन्यतरस्याम् ।
१४ अनुपसर्जनात् ।
१५ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तय-
पठक्ठञ्कञ्क्वरपः ।
१६ यञश्च ।
१७ प्राचां ष्फस् तद्धितः ।
१८ सर्वत्र लोहितादिकतन्तेभ्यः ।
१९ कौरव्यमाण्डूकाभ्यां च ।
२० वयसि प्रथमे ॥ १ ॥
२१ द्विगोः ।
२२ अपरिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि ।
२३ काण्डान्तात् क्षेत्रे ।
२४ पुरुषात् प्रमाणेऽन्यतरस्याम् ।
२५ बहुव्रीहेरुधसो ङीष् ।

२६ संख्याव्ययादेर्ङीप् ।
२७ दामहायनान्ताच्च ।
२८ अन उपाधालोपिनोऽन्यतरस्याम् ।
२९ नित्यं संज्ञाछन्दसोः ।
३० केवलमामकभागधेयपापाऽपरसमाना-
र्यकृतसुमङ्गलभेषजाच्च ।
३१ रात्रेश्चाऽजसौ ।
३२ अन्तर्वत्पतिवतोर्नुक् ।
३३ पत्युर्नो यज्ञसंयोगे ।
३४ विभाषा सपूर्वस्य ।
३५ नित्यं सपत्न्यादिषु ।
३६ पूतक्रतोरै च ।
३७ वृषाकप्यग्निकुसितकुसीदानामुदात्तः ।
३८ मनोरौ वा ।
३९ वर्णादनुदात्तात्तोपधात्तो नः ।
४० अन्यतो ङीष् ॥ २ ॥
४१ षिद्गौरादिभ्यश्च ।
४२ जानपदकुण्डगोणस्थलभाजनागका-
लनीलकुशकामुककबराद्वृत्त्यमत्रा-
वपनाकृत्रिमाश्राणास्थौल्यवर्णनाच्छा-
दनायोविकारमैथुनेच्छाकेशवेशेषु ।
४३ शोणात् प्राचाम् ।
४४ वोतो गुणवचनात् ।
४५ बह्वादिभ्यश्च ।
४६ नित्यं छन्दसि ।
४७ भुवश्च ।
४८ पुंयोगादाख्यायाम् ।
४९ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्यय-
वयवनमातुलाचार्याणामानुक् ।
५० क्रीतात् करणपूर्वात् ।
५१ क्तादल्पाख्यायाम् ।
५२ बहुव्रीहेश्चाऽन्तोदात्तात् ।
५३ अस्वाङ्गपूर्वपदाद्वा ।
५४ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ।
५५ नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च ।
५६ न क्रोडादिबह्वचः ।
५७ सहनञ्विद्यमानपूर्वाच्च ।
५८ नखमुखात् संज्ञायाम् ।
५९ दीर्घजिह्वी च च्छन्दसि ।
६० दिक्पूर्वपदान्ङीप् ॥ ३ ॥
६१ वाहः ।
६२ सख्यशिश्वीति भाषायाम् ।
६३ जातेरस्त्रीविषयादयोपधात् ।
६४ पाककर्णपर्णपुष्पफलमूलवालोत्तर-
पदाच्च ।
६५ इतो मनुष्यजातेः ।
६६ ऊङुतः ।
६७ बाह्वन्तात्संज्ञायाम ।
६८ पङ्गोश्च ।
६९ उरुत्तरपदादौपम्ये ।
७० संहितशफलक्षणवामादेश्च ।
७१ कद्रुकमण्डल्वोश्छन्दसि ।
७२ संज्ञायाम् ।
७३ शार्ङ्गरवाद्यञो ङीन् ।
७४ यङश्चाप् ।
७५ आवट्याच्च ।
७६ तद्धिताः ।
७७ यूनस्तिः ।
७८ अणिञोरनार्षयोर्गुरुपोत्तमयोः ष्यङ्गोत्रे ।
७९ गोत्रावयवात् ।

८० क्रोड्यादिभ्यश्च ॥ ४ ॥
८१ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यरस्याम् ।
८२ समर्थानां प्रथमाद्वा ।
८३ प्राग्दीव्यतोऽण् ।
८४ अश्वपत्यादिभ्यश्च ।
८५ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।
८६ उत्सादिभ्योऽञ् ।
८७ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।
८८ द्विगोर्लुगनपत्ये ।
८९ गोत्रेऽलुगचि ।
९० यूनि लुक् ।
९१ फक्फिञोरन्यतरस्याम् ।
९२ तस्याऽपत्यम् ।
९३ एको गोत्रे ।
९४ गोत्राद्यून्यस्त्रियाम् ।
९५ अत इञ् ।
९६ बाह्वादिभ्यश्च ।
९७ सुधातुरकङ् च ।
९८ गोत्रे कुञ्जादिभ्यश्च्फञ् ।
९९ नडादिभ्यः फक् ।
१०० हरितादिभ्योऽञः ।
१०१ यञिञोश्च ।
१०२ शरद्वच्छुनकदर्भाद्भृगवत्साग्रायणेषु ।
१०३ द्रोणपर्वतजीवन्तादन्यतरस्याम् ।
१०४ अनृष्यानन्तर्ये विदादिभ्योऽञ् ।
१०५ गर्गादिभ्यो यञ् ।
१०६ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ।
१०७ कपिबोधादाङ्गिरसे ।
१०८ वतण्डाच्च ।
१०९ लुक् स्त्रियाम् ।
११० अश्वादिभ्यः फञ् ।
१११ भर्गात्त्रैगर्ते ।
११२ शिवादिभ्योऽण् ।
११३ अकृद्धाभ्यो नदीनामुषीम्यस्तन्नामिकाभ्यः ।
११४ ऋष्यन्धकवृष्णिकुरुभ्यश्च ।
११५ मातुरुत्संख्यासंभद्रपूर्वायाः ।
११६ कन्यायाः कनीन च ।
११७ विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजाऽत्रिषु ।
११८ पीलाया वा ।
११९ ढक् च मण्डूकात् ।
१२० स्त्रीभ्यो ढक् ।
१२१ द्व्यचः ।
१२२ इतश्चाऽनिञः ।
१२३ शुभ्रादिभ्यश्च ।
१२४ विकर्णकुषीतकात् काश्यपे ।
१२५ भ्रुवो वुक् च ।
१२६ कल्याण्यादीनामिनङ् ।
१२७ कुलटाया वा ।
१२८ चटकाया ऐरक् ।
१२९ गोधाया ढ्रक् ।
१३० आरगुदीचाम् ।
१३१ क्षुद्राभ्यो वा ।
१३२ पितृष्वसुश्छण् ।
१३३ ढकि लोपः ।
१३४ मातृष्वसुश्च ।
१३५ चतुष्पाद्भ्यो ढञ् ।
१३६ गृष्ट्यादिभ्यश्च ।
१३७ राजश्वशुराद्यत् ।

१३८ क्षत्राद्घः ।
१३९ कुलात् खः ।
१४० अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥७॥
१४१ महाकुलादञ्खञौ ।
१४२ दुष्कुलाड्ढक् ।
१४३ स्वसुश्छः ।
१४४ भ्रातुर्व्यच्च ।
१४५ व्यन् सपत्ने ।
१४६ रेवत्यादिभ्यष्ठक् ।
१४७ गोत्रस्त्रियाः कुत्सने ण च ।
१४८ वृद्धाट्ठक्सौवीरेषु बहुलम् ।
१४९ फेश्छ च ।
१५० फाण्टाहृतिमिमताभ्यां णफिञौ ।
१५१ कुर्वादिभ्यो ण्यः ।
१५२ सेनान्तलक्षणकारिभ्यश्च ।
१५३ उदीचामिञ् ।
१५४ तिकादिभ्यः फिञ् ।
१५५ कौशल्यकार्मार्याभ्यां च ।
१५६ अणो द्व्यचः ।
१५७ उदीचां वृद्धादगोत्रात् ।
१५८ वाकिनादीनां कुक् च ।
१५९ पुत्रान्तादन्यतरस्याम् ।
१६० प्राचामवृद्धात् फिन् बहुलम् ॥ ८ ॥
१६१ मनोर्जातावञ्यतौ षुक् च ।
१६२ अपत्यं पौत्रप्रभृति गोत्रम् ।
१६३ जीवति तु वंश्ये युवा ।
१६४ भ्रातरि च ज्यायसि ।
१६५ वाऽन्यस्मिन् सपिण्डे स्थाविरतरे जीवति ।
१६६ जनपदशब्दात् क्षत्रियादञ् ।
१६७ साल्वेयगान्धारिभ्यां च ।
१६८ द्वयञ्मगधकलिङ्गसूरमसादण् ।
१६९ वृद्धेत्कोसलाजादाञ्ञ्यङ् ।
१७० कुरुनादिभ्यो ण्यः ।
१७१ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ।
१७२ ते तद्राजाः ।
१७३ कम्बोजाल्लुक् ।
१७४ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ।
१७५ अतश्च ।
१७६ न प्राच्यभर्गादियौधेयादिभ्यः ।
['ङ्याब्द्विगोः षिद्गौरादिवाहोदैवयज्ञियञिञोद्व्यचो महाकुलान्मनोर्जातावष्टादश' ॥]

इति चतुर्थाध्यायास्य प्रथमः पादः ।

अथ चतुर्थस्य द्वितीयः पादः ।

१ तेन रक्तं रागात् ।
२ लाक्षारोचनाट्ठक् ।
३ नक्षत्रेण युक्तः कालः ।
४ लुबविशेषे ।
५ संज्ञायां श्रवणाऽश्वत्थाभ्याम् ।
६ द्वन्द्वाच्छः ।
७ दृष्टं साम ।
८ कलेर्ढक् ।
९ वामदेवाड्ड्यड्ड्यौ ।
१० परिवृतो रथः ।
११ पाण्डुकम्बलादिनिः ।
१२ द्वैपवैयाघ्रादञ् ।
१३ कौमाराऽपूर्ववचने ।
१४ तत्रोद्धृतममत्रेभ्यः ।

१५ स्थण्डिलाच्छयितरि व्रते ।
१६ संस्कृतं भक्षाः ।
१७ शूलोखाद्यत् ।
१८ दध्नष्ठक् ।
१९ उदश्वितोऽन्यतरस्याम् ।
२० क्षीराड्ढञ् ।
२१ साऽस्मिन् पौर्णमासीति ।
२२ आग्रहायण्यश्वत्थाट्ठक् ।
२३ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ।
२४ साऽस्य देवता ।
२५ कस्येत् ।
२६ शुक्राद्घन् ।
२७ अपोनप्त्रपान्नप्तृभ्यां घः ।
२८ छ च ।
२९ महेन्द्राद्घाऽणौ च ।
३० सोमाट्ट्यण् ।
३१ वाय्वृतुपित्रुषसो यत् ।
३२ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ।
३३ अग्नेर्ढक् ।
३४ कालेभ्यो भववत् ।
३५ महाराजप्रोष्ठपदाट्ठञ् ।
३६ पितृव्यमातुलमातामहपितामहाः ।
३७ तस्य समूहः ।
३८ भिक्षादिभ्योऽण् ।
३९ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ ।
४० केदाराद्यञ् च ।
४१ ठञ् कवचिनश्च ।
४२ ब्राह्मणमाणववाडवाद्यन् ।
४३ ग्रामजनबन्धुभ्यस्तल् ।
४४ अनुदात्तादेरञ् ।
४५ खण्डिकादिभ्यश्च ।
४६ चरणेभ्यो धर्मवत् ।
४७ अचित्तहस्तिधेनोष्ठक् ।
४८ केशाऽश्वाभ्यां यञ्छावन्यतरस्याम् ।
४९ पाशादिभ्यो यः ।
५० खलगोरथात् ।
५१ इनित्रकट्यचश्च ।
५२ विषयो देशे ।
५३ राजन्यादिभ्यो वुञ् ।
५४ भौरिक्याद्यैषुकार्यादिभ्योविधल्भक्तलौ ।
५५ सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ।
५६ संग्रामे प्रयोजनयोद्धृभ्यः ।
५७ तदस्यां प्रहरणमिति क्रीडायां णः ।
५८ घञः साऽस्यां क्रियेति ञः ।
५९ तदधीते तद्वेद ।
६० क्रतूक्थादिसूत्रान्ताट्ठक् ।
६१ क्रमादिभ्यो वुन् ।
६२ अनुब्राह्मणादिनिः ।
६३ वसन्तादिभ्यष्ठक् ।
६४ प्रोक्ताल्लुक् ।
६५ सूत्राच्च कोपधात् ।
६६ छन्दोब्राह्मणानि च तद्विषयाणि ।
६७ तदस्मिन्नस्तीति देशे तन्नाम्नि ।
६८ तेन निर्वृत्तम् ।
६९ तस्य निवासः ।
७० अदूरभवश्च ।
७१ ओरञ् ।

७२ मतोश्च बह्वजङ्गात् ।
७३ बह्वचः कूपेषु ।
७४ उदक्च विपाशः ।
७५ सङ्कलादिभ्यश्च ।
७६ स्त्रीषु सौवीरसाल्वप्राक्षु ।
७७ सुवास्त्वादिभ्योऽण् ।
७८ रोणी ।
७९ कोपधाच्च ।
८० वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्-
फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्य-
कुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशव-
लपक्षकर्णसुतङ्गमप्रगदिन्वराह-
कुमुदादिभ्यः ।
८१ जनपदे लुप् ।
८२ वरणादिभ्यश्च ।
८३ शर्कराया वा ।
८४ ठक्छौ च ।
८५ नद्यां मतुप् ।
८६ मध्वादिभ्यश्च ।
८७ कुमुदनडवेतसेभ्यो ड्मतुप् ।
८८ नडशादाद् ड्वलच् ।
८९ शिखाया वलच् ।
९० उत्करादिभ्यश्छः ।
९१ नडादीनां कुक् च ।
९२ शेषे ।
९३ राष्ट्रावारपाराद्घखौ ।
९४ ग्रामाद्यखञौ ।
९५ कत्र्यादिभ्यो ढकञ् ।
९६ कुलकुक्षिग्रीवाभ्यः श्वाऽऽस्यलङ्कारेषु ।
९७ नद्यादिभ्यो ढक् ।
९८ दक्षिणापश्चात्पुरसस्त्यक् ।
९९ कापिश्याः ष्फक् ।
१०० रङ्कोरमनुष्येऽण् च ॥ ५ ॥
१०१ द्युप्रागपागुदक्प्रतीचो यत् ।
१०२ कन्थायाष्ठक् ।
१०३ वर्णौ वुक् ।
१०४ अव्ययात्त्यप् ।
१०५ ऐषमोह्यः श्वसोऽन्यतरस्याम् ।
१०६ तीररुप्योत्तरपदादञ्ञौ ।
१०७ दिक्पूर्वपदादसंज्ञायां ञः ।
१०८ मद्रेभ्योऽञ् ।
१०९ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ।
११० प्रस्थोत्तरपदपलद्यादिकोपधादण् ।
१११ कण्वादिभ्यो गोत्रे ।
११२ इञश्च ।
११३ न द्व्यचः प्राच्यभरतेषु ।
११४ वृद्धाच्छः ।
११५ भवतष्ठक्छसौ ।
११६ काश्यादिभ्यष्ठञ्ञिठौ ।
११७ वाहीकग्रामेभ्यश्च ।
११८ विभाषोशीनरेषु ।
११९ ओर्देशे ठञ् ।
१२० वृद्धात् प्राचाम् ॥ ६ ॥
१२१ धन्वयोपधाद् वुञ् ।
१२२ प्रस्थपुरवहान्ताच्च ।
१२३ रोपधेतोः प्राचाम् ।
१२४ जनपदतदवध्योश्च ।
१२५ अवृद्धादपि बहुवचनविषयात् ।
१२६ कच्छाग्निवक्त्रगर्तोत्तरपदात् ।
१२७ धूमादिभ्यश्च ।

१२८ नगरात् कुत्सनप्रावीण्ययोः ।
१२९ अरण्यान्मनुष्ये ।
१३० विभाषा कुरुयुगन्धराभ्याम् ।
१३१ मद्रवृज्योः कन् ।
१३२ कोपधादण् ।
१३३ कच्छादिभ्यश्च ।
१३४ मनुष्यतत्स्थयोर्वुञ् ।
१३५ अपदातौ साल्वात् ।
१३६ गोयवाग्वोश्च ।
१३७ गर्तोत्तरपदाच्छः ।
१३८ गहादिभ्यश्च ।
१३९ प्राचां कटादेः ।
१४० राज्ञः क च ॥ ७ ॥
१४१ वृद्धादकेकान्तखोपधात् ।
१४२ कन्थापलदनगरग्रामह्रदोत्तरपदात् ।
१४३ पर्वताच्च ।
१४४ विभाषाऽमनुष्ये ।
१४५ कृकणपर्णाद्भारद्वाजे ।
['तेनसास्मिन्ठञक्रमादिभ्योजनपदे द्युप्रागपाग्धन्ववृद्धात्पञ्च']

इति चतुर्थाऽध्यायस्य द्वितीयः पादः ।

अथ चतुर्थाध्याये तृतीयः पादः

१ युष्मदस्मदोरन्यतरस्यां खञ् च ।
२ तस्मिन्नणि च युष्माकाऽस्माकौ ।
३ तवकममकावेकवचने ।
४ अर्धाद्यत् ।
५ परावराधमोत्तमपूर्वाच्च ।
६ दिक्पूर्वपदाट्ठञ् च ।
७ ग्रामजनपदैकदेशादञ्ठञौ ।
८ मध्यान्मः ।
९ अ साम्प्रतिके ।
१० द्वीपादनुसामुद्रं यञ् ।
११ कालाट्ठञ् ।
१२ श्राद्धे शरदः ।
१३ विभाषा रोगाऽऽतपयोः ।
१४ निशाप्रदोषाभ्यां च ।
१५ श्वसस्तुट् च ।
१६ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।
१७ प्रावृष एण्यः ।
१८ वर्षाभ्यष्ठक् ।
१९ छन्दसि ठञ् ।
२० वसन्ताच्च ॥ १ ॥
२१ हेमन्ताच्च ।
२२ सर्वत्राऽण् च तलोपश्च ।
२३ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।
२४ विभाषा पूर्वाह्णपराह्णाभ्याम् ।
२५ तत्र जातः ।
२६ प्रावृषष्ठप् ।
२७ संज्ञायां शरदो वुञ् ।
२८ पूर्वाह्णापराह्णार्द्रामूलप्रदोषाऽवस्कराद् वुन् ।
२९ पथः पन्थ च ।
३० अमावास्याया वा ।
३१ अ च ।
३२ सिन्ध्वपकराभ्यां कन् ।
३३ अणञौ च ।
३४ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ।
३५ स्थानान्तगोशालखरशालाच्च ।

३६ वत्सशालाभिजिदश्वयुक्शतभिषजो वा ।
३७ नक्षत्रेभ्यो बहुलम् ।
३८ कृतलब्धक्रीतकुशलाः ।
३९ प्रायभवः ।
४० उपजानूपकर्णोपनीवेष्ठक् ।
४१ संभूते ।
४२ कोशाड्ढञ् ।
४३ कालात्साधुपुष्प्यत्पच्यमानेषु ।
४४ उप्ते च ।
४५ आश्वयुज्या वुञ ।
४६ ग्रीष्मवसन्तादन्यतरस्याम् ।
४७ देयमृणे ।
४८ कलाप्यश्वत्थयवबुसाद् वुन् ।
४९ ग्रीष्माऽवरसमाद् वुञ् ।
५० संवत्सराग्रहायणीभ्यां ठञ् च ।
५१ व्याहरति मृगः ।
५२ तदस्य सोढम् ।
५३ तत्र भवः ।
५४ दिगादिभ्यो यत् ।
५५ शरीरावयवाच्च ।
५६ दृतिकुक्षिकलशिवस्त्यस्त्यहेढञ् ।
५७ ग्रीवाभ्योऽण् च ।
५८ गम्भीराञ्ञ्यः ।
५९ अव्ययीभावा च्च ।
६० अन्तःपूर्वपदाट्ठञ् ॥ ३ ॥
६१ ग्रामात् पर्यनुपूर्वात् ।
६२ जिह्वामूलाङ्गुलेश्छः ।
६३ वर्गान्ताच्च ।
६४ अशब्दे यत्खावन्यतरस्याम् ।
६५ कर्णललाटात्कनलङ्कारे ।
६६ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ।
६७ बह्वचोऽन्तोदात्ताट्ठञ् ।
६८ क्रतुयज्ञेभ्यश्च ।
६९ अध्यायेष्वेवर्षेः ।
७० पौरोडाशपुरोडाशात् ष्ठन् ।
७१ छन्दसो यदणौ ।
७२ द्वयजृद्ब्राह्मणर्क प्रथमाध्वरपुरश्चरणा-नामाख्यातादृक् ।
७३ अणगयनादिभ्यः ।
७४ तत आगतः ।
७५ ठगायस्थानेभ्यः ।
७६ शुण्डिकादिभ्योऽण् ।
७७ विद्यायोनिसम्बन्धेभ्यो वुञ् ।
७८ ऋतष्ठञ् ।
७९ पितुर्यच्च ।
८० गोत्रादङ्कवत् ॥ ४ ॥
८१ हेतुमनुष्येभ्योऽन्यतरस्यां रुप्यः ।
८२ मयट् च ।
८३ प्रभवति ।
८४ विदूराञ्ञ्यः ।
८५ तद्गच्छति पथिदूतयोः ।
८६ अभिनिष्क्रामति द्वारम् ।
८७ अधिकृत्य कृते ग्रन्थे ।
८८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजनना-दिभ्यश्छः ।
८९ सोऽस्य निवासः ।
९० अभिजनश्च ।
९१ आयुधजीविभ्यच्छः पर्वते ।

९२ शण्डिकादिभ्यो ञ्यः ।
९३ सिन्धुतक्षशिलादिभ्योऽणञौ ।
९४ तूदीशलातुरवर्मतीकूचवाराड्ढ-
क्छण्ढञ्यकः ।
९५ भक्तिः ।
९६ अचित्तादेशकालाट्ठक् ।
९७ महाराजाट्ठञ् ।
९८ वासुदेवार्जुनाभ्यां वुन् ।
९९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ।
१०० जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने ॥ ५॥
१०१ तेन प्रोक्तम् ।
१०२ तित्तिरिवरतन्तुखण्डिकोखाच्छण् ।
१०३ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ।
१०४ कलापिवैशम्पायनान्तेवासिभ्यश्च ।
१०५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।
१०६ शौनकादिभ्यश्छन्दसि ।
१०७ कठचरकाल्लुक् ।
१०८ कलापिनोऽण् ।
१०९ छगलिनो ढिनुक् ।
११० पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।
१११ कर्मन्दकृशाश्वादिनिः ।
११२ तनैकदिक् ।
११३ तसिश्च ।
११४ उरसो यच्च ।
११५ उपज्ञाते ।
११६ कृते ग्रन्थे ।
११७ संज्ञायाम् ।
११८ कुलालादिभ्यो वुञ् ।
११९ क्षुद्राभ्रमरवटरपादपादञ् ।
१२० तस्येदम् ॥ ६ ॥
१२१ रथाद्यात् ।
१२२ पत्रपूर्वादञ् ।
१२३ पत्राध्वर्युपरिषदश्च ।
१२४ हलसीराट्ठक् ।
१२५ द्वन्द्वाद्वुन् वैरमैथुनिकयोः ।
१२६ गोत्रचरणाद् वुञ् ।
१२७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ।
१२८ शकलाद्वा ।
१२९ छन्दोगाक्थिकयाज्ञिकबह्वृ-
चनटाञ्ञ्यः ।
१३० न दण्डमाणवान्तेवासिषु ।
१३१ रैवतिकादिभ्यश्छः ।
१३२ तस्य विकारः ।
१३३ अवयवे च प्राण्योषधिवृक्षेभ्यः ।
१३४ बिल्वादिभ्योऽण् ।
१३५ कोपधाच्च ।
१३६ त्रपुजतुनोः षुक् ।
१३७ ओरञ् ।
१३८ अनुदात्तादेश्च ।
१३९ पलाशादिभ्यो वा ।
१४० शम्याष्ट् लञ् ।
१४१ मयड्वैतयोर्भाषायामभक्ष्या-
ऽऽच्छादनयोः ।
१४२ नित्य वृद्धशरादिभ्यः ।
१४३ गोश्च पुरीषे ।
१४४ पिष्टाच्च ।
१४५ संज्ञायां कन् ।
१४६ व्रीहेः पुरोडाशे ।
१४७ असंज्ञायां तिलयवाभ्याम् ।

१४८ द्व्यचश्छन्दसि ।
१४९ नोत्वद्वर्ध्रबिल्वात् ।
१५० तालादिभ्योऽण् ।
१५१ जातरुपेभ्यः परिमाणे ।
१५२ प्राणिरजतादिभ्योऽञ् ।
१५३ ञितश्च तत्प्रत्ययात् ।
१५४ क्रीतवत् परिमाणात् ।
१५५ उष्ट्राद् वुञ् ।
१५६ उमोर्णयोर्वा ।
१५७ एण्या ढञ् ।
१५८ गोपयसोर्यत् ॥ ८ ॥
१५९ द्रोश्च ।
१६० माने वयः ।
१६१ फले लुक् ।
१६२ प्लक्षादिभ्योऽण् ।
१६३ जम्ब्वा वा ।
१६४ लुप् च ।
१६५ हरीतक्यादिभ्यश्च ।
१६६ कंसीयपरशव्ययोर्यञञौ लुक्च ।
['युष्मद्धेमन्तात्संभूते ग्रामाद्धेतुतेन रथात्पलाशादिभ्यो द्रोश्चाष्टे' ॥]

इति चतुर्थाऽध्याये तृतीयः पादः ।

अथ चतुर्थाऽध्याये चतुर्थः पादः

१ प्राग्वहतेष्ठक् ।
२ तेन दीव्यति खनति जयति जितम् ।
३ संस्कृतम् ।
४ कुलत्थकोपधादण् ।
५ तरति ।
६ गोपुच्छाट्ठञ् ।
७ नौद्व्यचष्ठन् ।
८ चरति ।
९ आकर्षात् ष्ठल् ।
१० पर्पादिभ्यः ष्ठन् ।
११ श्वगणाट्ठञ् च ।
१२ वेतनादिभ्यो जीवति ।
१३ वस्नक्रयविक्रयाट्ठन् ।
१४ आयुधाच्छ च ।
१५ हरत्युत्सङ्गादिभ्यः ।
१६ भस्त्रादिभ्यः ष्ठन् ।
१७ विभाषा विवधात् ।
१८ अण् कुटिलिकायाः ।
१९ निर्वृत्तेऽक्षद्यूतादिभ्याः ।
२० क्त्रेर्मम्नित्यम् ॥ १ ॥
२१ अपमित्ययाचिताभ्यां कक्कनौ ।
२२ संसृष्टे ।
२३ चूर्णादिनिः ।
२४ लवणाल्लुक् ।
२५ मुद्गादण् ।
२६ व्यञ्जनैरुपसिक्ते ।
२७ ओजःसहोऽम्भसा वर्त्तते ।
२८ तत्प्रत्यनुपूर्वमीपलोमकूलम् ।
२९ परिमुखं च ।
३० प्रयच्छति गर्ह्यम् ।
३१ कुसीददशैकादशात् ष्ठन्ष्ठचौ ।
३२ उञ्छति ।
३३ रक्षति ।
३४ शब्ददर्दुरं करोति ।
३५ पक्षिमत्स्यमृगान् हन्ति ।
३६ परिपन्थं च तिष्ठति ।
३७ माथोत्तरपदपदव्यनुपदं धावति ।

३८ आक्रन्दाट्ठञ् च ।
३९ पदोत्तरपदं गृह्णाति ।
४० प्रतिकण्ठार्थललामं च ॥ २ ॥
४१ धर्मं चरति ।
४२ प्रतिपथमेति ठंश्च ।
४३ समवायान् समवैति ।
४४ परिषदो ण्यः ।
४५ सेनाया वा ।
४६ संज्ञायां ललाटकुक्कुट्यौ पश्यति ।
४७ तस्य धर्म्यम् ।
४८ अण् महिष्यादिभ्यः ।
४९ ऋतोऽञ् ।
५० अवक्रयः ।
५१ तदस्य पण्यम् ।
५२ लवणाट्ठञ् ।
५३ किसरादिभ्यः ष्ठन् ।
५४ शलालुनोऽन्यतरस्याम् ।
५५ शिल्पम् ।
५६ मड्डुकझर्झरादणन्यतरस्याम् ।
५७ प्रहरणम् ।
५८ परश्वधाट्ठञ् च ।
५९ शक्तियष्ट्योरीकक् ।
६० अस्तिनास्तिदिष्टं मतिः ॥ ३ ॥
६१ शीलम् ।
६२ छत्रादिभ्यो णः ।
६३ कर्माध्ययने वृत्तम् ।
६४ बह्वच्पूर्वपदाट्ठच् ।
६५ हितं भक्षाः ।
६६ तदस्मै दीयते नियुक्तम् ।
६७ श्राणामांसौदनाट्टिठन् ।
६८ भक्तादणन्यतरस्याम् ।
६९ तत्र नियुक्तः ।
७० अगारान्ताट्ठन् ।
७१ अध्यायिन्यदेशकालात् ।
७२ कठिनान्तप्रस्तारसंस्थानेषु ब्यवहरति ।
७३ निकटे वसति ।
७४ आवसथात् ष्ठल् ।
७५ प्राग्घिताद्यत् ।
७६ तद्वहति रथयुगप्रासङ्गम् ।
७७ धुरो यड्ढकौ ।
७८ खः सर्वधुरात् ।
७९ एकधुराल्लुक् च ।
८० शकटादण् ॥ ४ ॥
८१ हलसीराट्ठक् ।
८२ संज्ञायां जन्याः ।
८३ विध्यत्यधनुषा ।
८४ धनगणं लब्धा ।
८५ अन्नाण्णः ।
८६ वशं गतः ।
८७ पदस्मिन्दृश्यम् ।
८८ मूलमस्याऽऽबर्हि ।
८९ संज्ञायां धेनुष्या ।
९० गृहपतिना संयुक्ते ञ्यः ।
९१ नौवयोधर्मविषमूलमूलसीतातुलाभ्य-
स्तार्यतुल्यप्राप्यवध्याऽऽनाम्यसमस-
मितसमितेषु ।
९२ धर्मपथ्यर्थन्यायादनपेते ।
९३ छन्दसो निर्मिते ।
९४ उरसोऽण् च ।
९५ हृदयस्य प्रियः ।

९६ बन्धने चर्षौ ।
९७ मतजनहलात्करणजल्पकर्षेषु ।
९८ तत्र साधुः ।
९९ प्रतिजनादिभ्यः खञ् ।
१०० भक्ताण्णः ॥ ५ ॥
१०१ परिषदो ण्यः ।
१०२ कथादिभ्यष्ठक् ।
१०३ गुडादिभ्यष्ठञ् ।
१०४ पथ्यतिथिवसतिस्वपतेर्ढञ् ।
१०५ सभाया यः ।
१०६ ढश्छन्दसि ।
१०७ समानतीर्थेवासी ।
१०८ समानोदरे शयित ओ चोदात्तः ।
१०९ सोदराद्यः ।
११० भवे छन्दसि ।
१११ पाथोनदीभ्यां ड्यण् ।
११२ वैशन्तहिमवद्भ्यामण् ।
११३ स्रोतसो विभाषा ड्यड्ड्यौ ।
११४ सगर्भसयूथसनुताद्यन् ।
११५ तुग्राद् घन् ।
११६ अग्राद्यत् ।
११७ घच्छौ च ।
११८ समुद्राभ्राद्घ ः ।
११९ बर्हिषिदत्तम् ।
१२० दूतस्य भागकर्मणी ॥ ६ ॥
१२१ रक्षोयातूनां हननी ।
१२२ रेवतीजगतीहविष्याभ्यः प्रशस्ये ।
१२३ असुरस्य स्वम् ।
१२४ मायायामण् ।
१२५ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ।
१२६ अश्विमानण् ।
१२७ वयस्यासु मूर्ध्नो मतुप् ।
१२८ मत्वेर्थ मासतन्वोः ।
१२९ मधोर्ञ च ।
१३० ओजसोऽहनि यत्खौ ।
१३१ वैशोयशआदेर्भगाद्यल् ।
१३२ ख च ।
१३३ पूर्वैः कृतमिनयौ च ।
१३४ अद्भिः संस्कृतम् ।
१३५ सहस्रेण संमितौ घः ।
१३६ मतौ च ।
१३७ सोममर्हति यः ।
१३८ मये च ।
१३९ मधोः ।
१४० वसोः समूहे च ॥ ७ ॥
१४१ नक्षत्राद् घः ।
१४२ सर्वदेवात्तातिल् ।
१४३ शिवशमरिष्टस्य करे ।
१४४ भावे च ।

['प्राग्वहतेरमपित्यधर्मं शीलं हलपरषिदो रक्षोनक्षत्राच्चत्वारि' ॥]

इति तृतीध्यायस्य चतुर्थः पादः ।

अथ पञ्चमोऽध्यायः ।

अथ प्रथमः पादः ।

१ प्राक् क्रीताच्छः ।
२ उगवादिभ्यो यत् ।
३ कम्बलाच्च संज्ञायाम् ।
४ विभाषा हविरपूपादिभ्यः ।
५ तस्मै हितम् ।

६ शरीरावयवाद्यत् ।
७ खलयवमाषतिलवृषब्रह्मणश्च ।
८ अजाविभ्यां थ्यन् ।
९ आत्मन्विश्वजनभोगोत्तरपदात् खः ।
१० सर्वपुरुषाभ्यां णढञौ ।
११ माणवकचरकाभ्यां खञ् ।
१२ तदर्थं विकृतेः प्रकृतौ ।
१३ छदिरुपधिबलेर्ढञ् ।
१४ ऋषभोपानहोर्ञ्यः ।
१५ चर्मणोऽञ् ।
१६ तदस्य तदस्मिन् स्यादिति ।
१७ परिखाया ढञ् ।
१८ प्राग्वतेष्ठञ् ।
१९ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ।
२० असमासे निष्कादिभ्यः ॥ १ ॥
२१ शताच्य ठन्यतावशते ।
२२ संख्याया अतिशदन्तायाः कन् ।
२३ वतोरिड् वा ।
२४ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ।
२५ कंसाट्टिठन् ।
२६ शूर्पादञन्यतरस्याम् ।
२७ शतमानविंशतिकसहस्त्रवसनादण् ।
२८ अध्यर्धपूर्वाद् द्विगोर्लुगसंज्ञायाम् ।
२९ विभाषा कार्षापणसहस्त्राभ्याम् ।
३० द्वित्रिपूर्वान्निष्कात् ।
३१ बिस्ताच्च ।
३२ विंशतिकात् खः ।
३३ खार्या ईकन् ।
३४ पणपादमाषशताद्यत् ।
३५ शाणाद्वा ।
३६ तेन क्रीतम् ।
३७ तस्य निमित्तं संयोगोत्पातौ
३८ गोद्व्यचोऽसंख्यापरिमाणाऽश्वादेर्यत् ।
३९ पुत्राच्छ च ।
४० सर्व भूमिपृथिवीभ्यामणञौ
४१ तस्येश्वरः ।
४२ तत्र विदित इति च ।
४३ लोकसर्वलोकाट्ठञ् ।
४४ तस्य वापः ।
४५ पात्रात् ष्ठन् ।
४६ तदस्मिन्वृद्ध्यायलाभाशुल्कोपदा दीयते ।
४७ पूरणार्धाट्ठन् ।
४८ भागाद्यच्च ।
४९ तद्धरति बहत्यावहति भाराद्वंशादिभ्यः ।
५० वस्नद्रव्याभ्यां ठन्कनौ ।
५१ सम्भवत्यवहरति पचति ।
५२ आढकाचितपात्रात् खोऽन्यतरस्याम् ।
५३ द्विगोः ष्ठंश्च ।
५४ कुलिजाल्लुक्खौ च ।
५५ सोऽस्यांशवस्नभृतयः ।
५६ तस्य परिमाणम् ।
५७ संख्यायाः संज्ञासङ्घसूत्राऽध्ययनेषु ।
५८ पङ्क्तिविंशतित्रिंशच्चत्वारिंशन्पञ्चाश-
त्षष्टिसप्तत्यशीतिनवतिशतम् ।
५९ पञ्चद्दशतो वर्गे वा ॥ ३ ॥
६० सप्तनोऽञ्छन्दसि ।
६१ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायांडण् ।
६२ तदर्हति ।
६३ छेदादिभ्यो नित्यम् ।
६४ शीर्षच्छेदाद्यच्च ।

६५ दण्डादिभ्यो यः ।
६६ छन्दसि च ।
६७ पात्राद् घश्च ।
६८ कडङ्करदक्षिणाच्छ च ।
६९ स्थालीबिलात् ।
७० यज्ञर्त्विग्भ्यां घखञौ ।
७१ पारायणतुरायणचान्द्रायणं वर्त्तयति ।
७२ संशयमापन्नः ।
७३ योजनं गच्छति ।
७४ पथः ष्कन् ।
७५ पन्थो ण नित्यम् ॥
७६ उत्तरपथेनाऽऽहृतं च ।
७७ कालात् ।
७८ तेन निर्वृत्तम् ।
७९ तमधीष्टो भृतो भूतो भावी ॥ ४ ॥
८० मासाद्वयसि यत्खञौ ।
८१ द्विगोर्यप् ।
८२ षण्मासाण्ण्यच्च ।
८३ अवयसि ठंश्च ।
८४ समायाः खः ।
८५ द्विगोर्वा ।
८६ रात्र्यहःसंवत्सराच्च ।
८७ वर्षाल्लुक् च ।
८८ चित्तवति नित्यम् ।
८९ षष्टिकाः षष्टिरात्रेण पच्यन्ते ।
९० वत्सरान्ताच्छछन्दसि ।
९१ संपरिपूर्वात् ख च ।
९२ तेन परिजय्यलभ्यकार्यसुकरम् ।
९३ तदस्य ब्रह्मचर्यम् ।
९४ तदस्य दक्षिणा यज्ञाख्येभ्यः ।
९५ तत्र च दीयते कार्यं भववत् ।
९६ व्युष्टादिभ्योऽण् ।
९७ तेन यथाकथाचहस्ताभ्यां णयतौ ।
९८ सम्पादिनि ।
९९ कर्मवेषाद्यत् ॥ ५ ॥
१०० तस्मै प्रभवति सन्तापादिभ्यः ।
१०१ योगाद्यच्च ।
१०२ कर्मण उकञ् ।
१०३ समयस्तदस्य प्राप्तम् ।
१०४ ऋतोरण् ।
१०५ छन्दसि घस् ।
१०६ कालाद्यत् ।
१०७ प्रकृष्टे ठञ् ।
१०८ प्रयोजनम् ।
१०९ विशाखाषाढादण्मन्थदण्डयोः ।
११० अनुप्रवनादिभ्यश्छः ।
१११ समापनात् सपूर्वपदात् ।
११२ एकागारिकट् चौरे ।
११३ आकालिकाडाद्यन्तवचने ।
११४ तेन तुल्यं क्रिया चेद् वतिः ।
११५ तत्र तस्येव ।
११६ तदर्हम् ।
११७ उपसर्गाच्छन्दसि धात्वर्थे ।
११८ तस्य भावस्त्वतलौ ।
११९ आ च त्वात् ॥ ६ ॥
१२० न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः ।
१२१ पृथ्वादिभ्य इमनिज्वा ।
१२२ वर्णदृढादिभ्यः ष्यञ् च ।
१२३ गुणवचनब्राह्मणादिभ्यः कर्मणि च ।

१२४ स्तेनाद्यन्नलोपश्च ।
१२५ सख्युर्यः ।
१२६ कपिज्ञात्योर्ढक् ।
१२७ पत्यन्तपुरोहितादिभ्यो यक् ।
१२८ प्राणभृज्जातिवयोवचनोद्गात्रा-
दिभ्योऽञ् ।
१२९ हायनान्तयुवादिभ्योऽण् ।
१३० इगन्ताच्च लघुपूर्वात् ।
१३१ योपधाद् गुरुपोत्तमाद् वुञ् ।
१३२ द्वन्द्वमनोज्ञादिभ्यश्च ।
१३३ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ।
१३४ होत्राभ्यश्छः ।
१३५ ब्रह्मणस्त्वः ।
['प्राक्क्रीताच्छताच्च सर्वभूमिसप्तनोऽञ्मा
सात्तस्मै प्रभवति न नञ्पूर्वात् षोडश' ॥]

इति पञ्चमाध्यायस्य प्रथमः पादः ।

अथ पञ्चमस्य द्वितीयः पादः ।

१ धान्यानां भवने क्षेत्रे खञ् ।
२ व्रीहिशाल्योर्ढक् ।
३ यवयवकषष्टिकाद्यत् ।
४ विभाषा तिलमाषोमाभङ्गाऽणुभ्यः ।
५ सर्वचर्मणः कृतः खखञौ ।
६ यथामुखसंमुखस्य दर्शनः खः ।
७ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रंव्याप्नोति ।
८ आप्रपदं प्राप्नोति ।
९ अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ।
१० परोवरपरम्परपुत्रपौत्रमनुभवति ।
११ अवारपारात्यन्तानुकामं गामी ।
१२ समांसमां विजायते ।
१३ अद्यश्वीनाऽवष्टब्धे ।
१४ आगवीनः ।
१५ अनुग्वलंगामी ।
१६ अध्वनो यत्खौ ।
१७ अभ्यमित्राच्छ च ।
१८ गोष्ठात् खञ् भूतपूर्वे ।
१९ अश्वस्यैकाहगमः ।
२० शालीनकौपीने अधृष्टाऽकार्ययोः ॥१॥
२१ व्रातेन जीवति ।
२२ साप्तपदीनं सख्यम् ।
२३ हैयङ्गवीनं संज्ञायम् ।
२४ तस्य पाकमूले पील्वादिकर्णादिभ्यः-
कुणब्जाहचौ ।
२५ पक्षात्तिः ।
२६ तेन वित्तश्चुञ्चुप्चणपौ ।
२७ विनञ्भ्यां नानाञौ न सह ।
२८ वेः शालच्छङ्कटचौ ।
२९ सम्प्रोदश्च कटच् ।
३० अवात्कुटारच्च ।
३१ नते नासिकायाः संज्ञायां टीटञ्ना-
टज्भ्रटचः ।
३२ नेर्बिडज्बिरीसचौ ।
३३ इनच्पिटच्चिक चि च ।
३४ उपाधिभ्यां त्यकन्नासन्नारूढयोः ।
३५ कर्मणि घटोऽठच् ।
३६ तदस्य सञ्जातं तारकादिभ्य इतच् ।
३७ प्रमाणे द्वयसज्दघ्नञ्मात्रचः ।
३८ पुरुषहस्तिभ्यामण् च ।
३९ यत्तदेतेभ्यः परिमाणे वतुप् ।
४० किमिदंभ्यां वो घः ॥ २ ॥
४१ किमः संख्यापरिमाणे डति च ।

४२ संख्याया अवयवे तयप् ।
४३ द्वित्रिभ्यां तयस्याऽयज्वा ।
४४ उभादुदात्तो नित्यम् ।
४५ तदस्मिन्नधिकमिति दशान्ताड्डः ।
४६ शदन्तविंशतेश्च ।
४७ संख्याया गुणस्य निमाने मयट् ।
४८ तस्य पूरणे डट् ।
४९ नान्तादसंख्यादेर्मट् ।
५० थट् च छन्दसि ।
५१ षट्कतिकतिपयचतुरां थुक् ।
५२ बहुपूगगणसङ्घस्य तिथुक् ।
५३ वतोरिथुक् ।
५४ द्वेस्तीयः ।
५५ त्रेः संप्रसारणं च ।
५६ विंशत्यादिभ्यस्तमडन्यरस्याम् ।
५७ नित्यं शतादिमासार्धमाससंवत्सराच्च ।
५८ षष्ट्यादेश्चाऽसङ्ख्यादेः ।
५९ मतौ छः सूक्तसाम्नोः ।
६० अध्यायानुवाकयोर्लुक् ॥ ३ ॥
६१ विमुक्तादिभ्योऽण् ।
६२ गोषदादिभ्यो वुन् ।
६३ तत्र कुशलः पथः ।
६४ आकर्षादिभ्यः कन् ।
६५ धनहिरण्यात्कामे ।
६६ स्वाङ्गेभ्यः प्रसिते ।
६७ उदराट्ठगाद्यूने ।
६८ सस्येन परिजातः ।
६९ अशं हारी ।
७० तन्त्रादचिरापहृते ।
७१ ब्राह्मणकोष्णिके संज्ञायाम् ।
७२ शीतोष्णाभ्यां कारिणि ।
७३ अधिकम् ।
७४ अनुकाभिकाभीकः कमिता ।
७५ पार्श्वेनाऽन्विच्छति ।
७६ अयः शूलदण्डाजिनाभ्यां ठक्ठञौ ।
७७ तावतिथं ग्रहणमिति लुग्वा ।
७८ सः एषां ग्रामणीः ।
७९ श्रृङ्खलमस्य बन्धनं करभे ।
८० उत्क उन्मनाः ॥ ४ ॥
८१ कालप्रयोजनाद्रोगे ।
८२ तदस्मिन्नन्नं प्रायेण संज्ञायाम् ।
८३ कुल्माषादञ् ।
८४ श्रोत्रियंश्छन्दोऽधीते ।
८५ श्राद्धमनेन भुक्तमिनिठनौ ।
८६ पूर्वादिनिः ।
८७ सपूर्वाच्च ।
८८ इष्टादिभ्यश्च ।
८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ।
९० अनुपद्यन्वेष्टा ।
९१ साक्षाद् द्रष्टरि संज्ञायाम् ।
९२ क्षेत्रियच्परक्षेत्रे चिकित्स्यः ।
९३ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्र-सृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ।
९४ तदस्याऽस्त्यस्मिन्निति मतुप् ।
९५ रसादिभ्यश्च ।
९६ प्राणिस्थादातो लजन्यतरस्याम् ।
९७ सिध्मादिभ्यश्च ।
९८ वत्सांऽसाभ्यां कामबले ।
९९ फेनादिलच्च ।

१०० लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ ५ ॥
१०१ प्रज्ञाश्रद्धाऽर्चाभ्यो णः ।
१०२ तपःसहस्राभ्यां विनीनी ।
१०३ अण् च ।
१०४ सिकताशर्कराभ्यां च ।
१०५ देशे लुबिलचौ च ।
१०६ दन्त उन्नत उरच् ।
१०७ ऊषसुषिमुष्कमधो रः ।
१०८ द्यूद्रुभ्यां मः ।
१०९ केशाद्वोऽन्यतरस्याम् ।
११० गाण्ड्यजगात् संज्ञायाम् ।
१११ काण्डाण्डादीरन्नीरचौ ।
११२ रजःकृष्यासुतिपरिषदो वलच् ।
११३ दन्तशिखात् संज्ञायाम् ।
११४ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ।
११५ अत इनिठनौ ।
११६ व्रीह्यादिभ्यश्च ।
११७ तुन्दादिभ्य इलच्च ।
११८ एकगोपूर्वाट्ठञ् नित्यम् ।
११९ शतसहस्रान्ताच्च निष्कात् ।
१२० रुपादाहतप्रशंसयोर्यप् ॥ ६ ॥
१२१ अस्मायामेधास्रजो विनिः ।
१२२ बहुलं छन्दसि ।
१२३ ऊर्णाया युस् ।
१२४ वाचो ग्मिनिः ।
१२५ आलजाटचौ बहुभाषिणि ।
१२६ स्वामिन्नैश्वर्ये ।
१२७ अर्शआदिभ्योऽच् ।
१२८ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ।
१२९ वाताऽतीसाराभ्यां कुक् च ।
१३० वयसि पूरणात् ।
१३१ सुखादिभ्यश्च ।
१३२ धर्मशीलवर्णान्ताच्च ।
१३३ हस्ताज्जातौ ।
१३४ वर्णाद् ब्रह्मचारिणि ।
१३५ पुष्करादिभ्यो देशे ।
१३६ बलादिभ्यो मतुबन्यतरस्याम् ।
१३७ संज्ञायां मन्माभ्याम् ।
१३८ कंशम्भ्यां बभयुस्तितुतयसः ।
१३९ तुन्दिवलिवटेर्भः ।
१४० अहंशुभमोर्युस् ॥ ७ ॥

['धान्यानां व्रातेन किमो विमुक्तदिभ्यः कालप्रयोजनात्प्रज्ञाश्रद्धास्मायामेधाविंशातिः' ॥]

इति पञ्चमाध्यायस्य द्वितीयः पादः ।

अथ पञ्चमस्य तृतीय पादः ।

१ प्राग्दिशो विभक्तिः ।
२ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ।
३ इदम इश् ।
४ एतेतौ रथोः ।
५ एतदोऽन् ।
६ सर्वस्य सोऽन्यतरस्यां दि ।
७ पञ्चम्यास्तसिल् ।
८ तसेश्च ।
९ पर्यभिभ्यां च ।
१० सप्तम्यास्त्रल् ।
११ इदमो हः ।
१२ किमोऽत् ।
१३ वा ह च च्छन्दसि ।

१४ इतराभ्योऽपि दृश्यन्ते ।
१५ सर्वैकान्यकिंयत्तदः काले दा ।
१६ इदमो र्हिल् ।
१७ अधुना ।
१८ दानीञ्च ।
१९ तदो दा च ।
२० तयोर्दार्हिलौ च छन्दसि ॥ १ ॥
२१ अनद्यतने र्हिलन्यतरस्याम् ।
२२ सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ।
२३ प्रकारवचने थाल् ।
२४ इदमस्थमुः ।
२५ किमश्च ।
२६ था हेतौ च च्छन्दसि ।
२७ दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ।
२८ दक्षिणोत्तराभ्यामतसुच् ।
२९ विभाषा पराऽवराभ्याम् ।
३० अञ्चेर्लुक् ।
३१ उपर्युपरिष्टात् ।
३२ पश्चात् ।
३३ पश्च पश्चा च च्छन्दसि ।
३४ उत्तराऽधरदक्षिणादातिः ।
३५ एनबन्यतरस्यामदूरेऽपञ्चम्याः ।
३६ दक्षिणादाच् ।
३७ आहि च दूरे ।
३८ उत्तराच्च ।
३९ पूर्वाधरावराणामसि पुरधवश्चैषाम् ।
४० अस्ताति च ।
४१ विभाषाऽवरस्य ।
४२ संख्याया विधार्थे धा ।
४३ अधिकरण विचाले च ।
४४ एकाद्धो ध्यमुञन्यतरस्याम् ।
४५ द्वित्र्योश्च धमुञ् ।
४६ एधाच्च ।
४७ याप्ये पाशप् ।
४८ पूरणाद्भागे तीयादन् ।
४९ प्रागेकादशभ्योऽच्छन्दसि ।
५० षष्ठाऽष्टमाभ्यां ञ च ।
५१ मानपश्वङ्गयोः कन्लुकौ च ।
५२ एकादाकिनिच्चाऽसहाये ।
५३ भूतपूर्वे चरट् ।
५४ षष्ठ्या रुप्य च ।
५५ अतिशायने तमबिष्ठनौ ।
५६ तिङश्च ।
५७ द्विवचनविभज्योपपदे तरबीयसुनौ ।
५८ अजादी गुणवचनादेव ।
५९ तुश्छन्दसि ।
६० प्रशस्यस्य श्रः ॥ ३ ॥
६१ ज्य च ।
६२ वृद्धस्य च ।
६३ अन्तिकबाढयोर्नेदसाधौ ।
६४ युवाऽल्पयोः कनन्यतरस्याम् ।
६५ विन्मतोर्लुक् ।
६६ प्रशंसायां रूपम् ।
६७ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।
६८ विभाषा सुपो बहुच् पुरस्तात्तु ।
६९ प्रकारवचने जातीयर् ।
७० प्रागिवात्कः ।

७१ अव्ययसर्वनाम्नामकच् प्राक् टेः ।
७२ कस्य च दः ।
७३ अज्ञाते ।
७४ कुत्सिते ।
७५ संज्ञायां कन् ।
७६ अनुकम्पायाम् ।
७७ नीतौ च तद्युक्तात् ।
७८ बह्वचो मनुष्यनाम्नष्ठज्वा ।
७९ घनिलचौ च ।
८० प्राचामुपादेरडज्वुचौ च ॥ ४ ॥
८१ जातिनाम्नः कन् ।
८२ अजिनान्तस्योत्तरपदलोपश्च ।
८३ ठाजादावूर्ध्वं द्वितीयादचः ।
८४ शेवलसुपरिविशालवरुणाऽर्यमादीनां तृतीयात् ।
८५ अल्पे ।
८६ ह्रस्वे ।
८७ संज्ञायां कन् ।
८८ कुटीशमीशुण्डाभ्यो रः ।
८९ कुत्वा डुपच् ।
९० कासूगोणीभ्यां ष्टरच् ।
९१ वत्सोक्षाऽश्वर्षभेभ्यश्च तनुत्वे ।
९२ कंयत्तदोर्निर्धारणे द्वयोरेकस्यडतरच् ।
९३ वा बहूनां जातिपरिप्रश्ने डतमच् ।
९४ एकाच्च प्राचाम् ।
९५ अवक्षेपणे कन् ।
९६ इवे प्रतिकृतौ ।
९७ संज्ञायां च ।
९८ लुम्मनुष्ये ।
९९ जीविकार्थे चाऽपण्ये ।
१०० देवपथादिभ्यश्च ॥ ५ ॥
१०१ वस्तेढञ् ।
१०२ शिलाया ढः ।
१०३ शाखादिभ्यो यः ।
१०४ द्रव्यं च भव्ये ।
१०५ कुशाग्राच्छः
१०६ समासाच्च तद्विषयात् ।
१०७ शर्करादिभ्योऽण् ।
१०८ अङ्गुल्यादिभ्यष्ठक् ।
१०९ एकशालायाष्ठजन्यतरस्याम् ।
११० कर्कलोहितादीकक् ।
१११ प्रत्नपूर्वविश्वेमात्थाल्छन्दसि ।
११२ पूगाञ्ञ्योऽग्रामणीपूर्वात् ।
११३ व्रातच्फञोरस्त्रियाम् ।
११४ आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ।
११५ वृकाट्टेण्यण् ।
११६ दामन्यादित्रिगर्तषष्ठाच्छः ।
११७ पर्श्वादियौधेयादिभ्योऽणञौ ।
११८ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ।
११९ ञ्यादयस्तद्राजाः ।

['प्राग्दिशोऽनद्यतने विभाषा ज्य च जातिनाम्नो वस्ते रेकोनविंशतिः ॥']

इति पञ्चमाध्यायस्त तृतीयः पादः ।

अथ पञ्चमस्य चतुर्थः पादः

१ पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ।
२ दण्डव्यवसर्गयोश्च ।
३ स्थूलादिभ्यः प्रकारवचने कन् ।
४ अनत्यन्तगतौ क्तात् ।

५ न सामिवचने ।
६ बृहत्या आच्छादने ।
७ अषडक्षाशितंग्वलंकर्मालंपुरुषा-
ऽध्युत्तरपदात् खः ।
८ विभाषाऽञ्चेरदिक् स्त्रियाम् ।
९ जात्यन्ताच्छ बन्धुनि ।
१० स्थानान्ताद्विभाषा संस्थानेनेति चेत् ।
११ किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे ।
१२ अमु च छन्दसि ।
१३ अनुगादिनष्ठक् ।
१४ णचः स्त्रियामञ् ।
१५ अणिनुणः ।
१६ विसारिणो मत्स्ये ।
१७ संख्यायाः क्रियाभ्यावृत्तिगणने
कृत्वसुच् ।
१८ द्वित्रिचतुर्भ्यः सुच् ।
१९ एकस्य सकृच्च ।
२० विभाषा वहोर्धाऽविप्रकृष्टकाले ॥ १ ॥
२१ तत्प्रकृतवचने मयट् ।
२२ समूहवच्च बहुषु ।
२३ अनन्तावसथेतिहभेषजाञ्ञ्यः ।
२४ देवतान्तात्तादर्थ्ये यत् ।
२५ पादाऽर्घाभ्यां च ।
२६ अतिथेर्ञ्यः ।
२७ देवात्तल् ।
२८ अवेः कः ।
२९ यावादिभ्यः कन् ।
३० लोहितान्मणौ ।
३१ वर्णे चाऽनित्ये ।
३२ रक्ते ।
३३ कालाच्च ।
३४ विनायिदभ्यष्ठक् ।
३५ वाचो व्याहृतार्थायाम् ।
३६ तद्युक्तात् कर्मणोऽण् ।
३७ ओषधेरजातौ ।
३८ प्रज्ञादिभ्यश्च ।
३९ मृदस्तिकन् ।
४० सस्नौ प्रशंसायाम् ॥ २ ॥
४१ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ।
४२ बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् ।
४३ संख्यैकवचनाच्च वीप्सायाम् ।
४४ प्रतियोगे पञ्चम्यास्तसिः ।
४५ अपादाने चाऽहीयरुहोः ।
४६ अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः ।
४७ हीयमानपापयोगाच्च ।
४८ षष्ठ्या व्याश्रये ।
४९ रोगाच्चापनयने ।
५० कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः ।
५१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ।
५२ विभाषा साति कार्त्स्न्ये ।
५३ अभिविधौ सम्पदा च ।
५४ तदधीनवचने ।
५५ देये त्रा च ।
५६ देवमनुष्यपुरुषपुरुमर्त्येभ्यो
द्वितीयासप्तम्योर्बहुलम् ।
५७ अव्यक्तानुकरणाद्-द्व्यजवरार्धादनितौ
डाच् ।
५८ कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।
५९ सङ्ख्यायाश्च गुणान्तायाः ।
६० समयाच्च यापनायाम् ॥ ३ ॥

६१ सपत्रनिष्पत्रादतिव्यथने ।
६२ निष्कुलान्निष्कोषणे ।
६३ सुखप्रियादानुलोम्ये ।
६४ दुःखात् प्रातिलोम्ये ।
६५ शूलात् पाके ।
६६ सत्यादशपथे ।
६७ मद्रात् परिवापणे ।
६८ समासान्ताः ।
६९ न पूजनात् ।
७० किमः क्षेपे ।
७१ नञस्तत्पुरुषात् ।
७२ पथो विभाषा ।
७३ बहुव्रीहौ सङ्ख्येयये डजबहुगणात् ।
७४ ऋक्पूरब्धूः पथामाऽनक्षे ।
७५ अच्प्रत्यन्ववपूर्वात् सामलोम्नः ।
७६ अक्ष्णोऽदर्शनात् ।
७७ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वन-
हुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्व-
ष्ठीवनक्तन्दिवरात्रिदिवाहर्दिवसरजस-
निः श्रेयसपुरुषायुषद्व्यायुषत्र्यायुष-
र्ग्यजुषजातोक्षमहोक्षवृद्धोक्षो-
पशुनगोष्ठश्वाः ।
७८ ब्रह्महस्तिभ्यां वर्चसः ।
७९ अवसमन्धेभ्यस्तमसः ।
८० श्वसोवसीयः श्रेयसः ॥ ४ ॥
८१ अन्ववतप्ताद्रहसः ।
८२ प्रतेरुरसः सप्तमीस्थात् ।
८३ अनुगवमायामे ।
८४ द्विस्तावा त्रिस्तावा वेदिः ।
८५ उपसर्गादध्वनः ।
८६ तत्पुरुषस्याङ्गुलेः सङ्ख्याऽव्ययादेः ।
८७ अहः सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः ।
८८ अह्नोऽह्न एतेभ्यः ।
८९ न सङ्ख्यादेः समाहारे ।
९० उत्तमैकाभ्यां च ।
९१ राजाहः सखिभ्यष्टच् ।
९२ गोरतद्धितलुकि ।
९३ अग्राख्यायामुरसः ।
९४ अनोऽश्माऽयःसरसां जातिसंज्ञयोः ।
९५ ग्रामकौटाभ्यां च तक्ष्णः ।
९६ अतेः शुनः ।
९७ उपमानादप्राणिषु ।
९८ उत्तरमृगपूर्वाच्च सक्थनः ।
९९ नावो द्विगोः ।
१०० अर्धाच्च ॥ ५ ॥
१०१ खार्याः प्राचाम् ।
१०२ द्वित्रिभ्यामञ्जलेः ।
१०३ अनसन्तान्नपुंसकाच्छन्दसि ।
१०४ ब्रह्मणो जानपदाख्यायाम् ।
१०५ कुमहद्भ्यामन्यतरस्याम् ।
१०६ द्वन्द्वाच्चुदषहान्तात् समाहारे ।
१०७ अव्यीभावे शरत्प्रभृतिभ्यः ।
१०८ अनश्च ।
१०९ नंपुसकादन्यतरस्याम् ।
११० नदीपौर्णमास्याग्रहायणीभ्यः ।
१११ झयः
११२ गिरेश्च सेनकस्य षच् ।
११३ बहुश्रीहौ सख्य्यक्ष्णोः स्वाङ्गात् षच् ।
११४ अङ्गुलेर्दारुणि ।
११५ द्वित्रिभ्यां ष मूर्ध्नः ।

११६ अप् पूरणीप्रमाण्योः ।
११७ अन्तर्बहिभ्या च लोम्नः ।
११८ अञ्नासिकायाः संज्ञायां नसं चाऽस्थूलात् ।
११९ उपसर्गाच्च ।
१२० सुप्रभातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदप्रोष्ठपदाः ॥ ६ ॥
१२१ नञ्दुःसभ्यो हलिसक्थ्योरन्यतरस्याम् ।
१२२ नित्यमसिच् प्रजामेधयोः ।
१२३ वहुप्रजाश्छन्दसि ।
१२४ धर्मादनिच् केवलात् ।
१२५ जम्भा सुहरितृणसोमेभ्यः ।
१२६ दक्षिणेर्मा लुब्धयोगे ।
१२७ इच् कर्मव्यतिहारे ।
१२८ द्विदण्ड्यादिभ्यश्च ।
१२९ प्रसम्भ्यां जानुनोर्ज्ञुः ।
१३० ऊर्ध्वाद्विभाषा ।
१३१ ऊधसोऽनङ् ।
१३२ धनुषश्च ।
१३३ वा संज्ञायाम् ।
१३४ जायाया निङ् ।
१३५ गन्धस्येदुत्पूतिसुसुरभिभ्यः ।
१३६ अल्पाख्यायाम् ।
१३७ उपमानाच्च ।
१३८ पादस्य लोपोऽहस्त्यादिभ्यः ।
१३९ कुम्भपदीषु च ।
१४० संख्यासुपूर्वस्य ॥ ७ ॥
१४१ वयसि दन्तस्य दतृ ।
१४२ छन्दसि च ।
१४३ स्त्रियां संज्ञायाम् ।
१४४ विभाषा श्वावारोकाभ्याम् ।
१४५ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ।
१४६ ककुदस्यावस्थायां लोपः ।
१४७ त्रिककुत् पर्वते ।
१४८ उद्विभ्यां काकुदस्य ।
१४९ पूर्णाद्विभाषा ।
१५० सुहृद्दुर्हृदौ मित्रामित्रयोः ।
१५१ उरःप्रभृतिभ्यः कप् ।
१५२ इनः स्त्रियाम् ।
१५३ नद्यृतश्च ।
१५४ शेषाद्विभाषा ।
१५५ न संज्ञायाम् ।
१५६ ईयसश्च ।
१५७ वन्दिते भ्रातुः ।
१५८ ऋतश्छन्दसि ।
१५९ नाडीतन्त्र्योः स्वाङ्गे ।
१६० निष्प्रवाणिश्च ।

['पादशतस्य तत्प्रकृतवृकज्येष्ठाभ्यांसपत्रान्ववत प्तात् खार्या नञ्दुःसुभ्यो वयसि विंशतिः']

इति पञ्चमोऽध्यायः ।

अथषष्ठाऽध्यायः ।

अथ प्रथमः पादः ।

१ एकाचो द्वे प्रथमस्य ।
२ अजादेर्द्वितीयस्य ।
३ न न्द्राः संयोगादयः ।
४ पूर्वोऽभ्यासः ।
५ उभे अभ्यस्तम् ।
६ जक्षित्यादयः षट् ।
७ तुजादीनां दीर्घोऽभ्यासस्य ।
८ लिटि धातोरनभ्यासस्य ।
९ सन्यङोः ।
१० श्लौ ।
११ चङि।
१२ दाश्वान्साह्वान्मीढ्वांश्च ।
१३ ष्यङः सप्रसारणं पुत्रपत्योस्तत्पुरुषे ।
१४ बन्धुनि बहुव्रीहौ ।
१५ वचिस्वपियजादीनां किति ।
१६ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चति-
पृच्छतिभृज्जतीनां ङिति च ।
१७ लिट्यभ्यासस्योभयेषाम् ।
१८ स्वापेश्चङि ।
१९ स्वपिस्यमिव्येञां यङि ।
२० न वशः ॥ १ ॥
२१ चायः की ।
२२ स्फायः स्फी निष्ठायाम् ।
२३ स्त्यः प्रपूर्वस्य ।
२४ द्रवमूर्तिस्पर्शयोः श्यः ।
२५ प्रतेश्च ।
२६ विभाषाऽभ्यवपूर्वस्य ।
२७ श्रृतं पाके ।
२८ प्यायः पी ।
२९ लिड्यङोश्च ।
३० विभाषा श्वेः ।
३१ णौ च संश्चङोः ।
३२ ह्वः सम्प्रसारणम् ।
३३ अभ्यस्तस्य च ।
३४ बहुलं छन्दसि ।
३५ चायः की ।
३६ अपस्पृधेथामानुचृरानृहुश्चिच्युषेतित्या-
जश्राताश्रितमाशीराशीर्ताः ।
३७ न संप्रसारणे संप्रसारणम् ।
३८ लिटि वयो यः ।
३९ वश्चास्यान्यतरस्यां किति ।
४० वेञः ॥ २ ॥
४१ ल्यपि च ।
४२ ज्यश्च ।
४३ व्यश्च ।
४४ विभाषा परेः ।
४५ आदेच उपदेशेऽशिति ।
४६ न व्यो लिटि ।
४७ स्फुरतिस्फुलत्योर्घञि ।
४८ क्रीड्जीनां णौ ।
४९ सिध्यतेरपारलौकिके ।
५० मीनातिमिनोतिदीङां ल्यपि च ।
५१ विभाषा लीयतेः ।
५२ खिदेश्छन्दसि ।
५३ अपगुरो णमुलि ।
५४ चिस्फुरोर्णौ ।
५५ प्रजने वीयतेः ।
५६ बिभेतेर्हेतुभये ।

५७ नित्यं स्मयतेः ।
५८ सृजिदृशोर्झल्यमकिति ।
५९ अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम् ।
६० शीर्षंश्छन्दसि ॥ ३ ॥
६१ ये च तद्धिते ।
६२ अचि शीर्षः ।
६३ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छ-
कन्नुदन्नासञ्छस्प्रभृतिषु ।
६४ धात्वादेः षः सः ।
६५ णो नः ।
६६ लोपो व्योर्वलि ।
६७ वेरपृक्तस्य ।
६८ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ।
६९ एङ्ह्रस्वात् संबुद्धेः ।
७० शेश्छन्दसि बहुलम् ।
७१ ह्रस्वस्य पिति कृति तुक् ।
७२ संहितायाम् ।
७३ छे च ।
७४ आङ्माडोश्च ।
७५ दीर्घात् ।
७६ पदान्ताद्वा ।
७७ इको यणचि ।
७८ एचोऽयवायावः ।
७९ वान्तो यि प्रत्यये ।
८० धातोस्तन्निमित्तस्यैव ॥ ४ ॥
८१ क्षय्यजय्यौ शक्यार्थे ।
८२ क्रय्यस्तदर्थे ।
८३ भय्यप्रवय्ये च च्छन्दसि ।
८४ एकः पूर्वपरयोः ।
८५ अन्तादिवच्च ।
८६ षत्वतुकोरसिद्धः ।
८७ आद् गुणः ।
८८ वृद्धिरेचि ।
८९ एत्येधत्यूठ्सु ।
९० आटश्च ।
९१ उपसर्गादृति धातौ ।
९२ वा सुप्यापिशलेः ।
९३ औतोम्शसोः ।
९४ एङि पररूपम् ।
९५ ओमाङोश्च ।
९६ उस्यपदान्तात् ।
९७ आतो गुणे ।
९८ अव्यक्तानुकरणस्यात इतौ ।
९९ नाम्रेडितस्यान्त्यस्त तु वा ।
१०० नित्यमाम्रेडिते डाचि ॥ ५ ॥
१०१ अकः सवर्णे दीर्घः ।
१०२ प्रथमयोः पूर्वसवर्णः ।
१०३ तस्माच्छसो नः पुंसि ।
१०४ नादिचि ।
१०५ दीर्घाज्जसि च ।
१०६ वा छन्दसि ।
१०७ अमि पूर्वः ।
१०८ संप्रसारणाच्च ।
१०९ एङः पदान्तादति ।
११० ङसिङसोश्च ।
१११ ऋत उत् ।
११२ ख्यत्यात् परस्य ।
११३ अतो रोरप्लुतादप्लुते ।
११४ हशि च ।
११५ प्रकृत्याऽन्तःपादमव्यपरे ।

११६ अव्यादवद्यादवक्रमुरव्रतायमवन्त्व-
वस्युषु च ।
११७ यजुष्युरः ।
११८ आपो जुषाणो वृष्णो
वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे ।
११९ अङ्ग इत्यादौ च ।
१२० अनुदात्ते च कुधपरे ।
१२१ अवपथासि च ।
१२२ सर्वत्र विभाषा गोः ।
१२३ अवङ् स्फोटायनस्य ।
१२४ इन्द्रे च ।
१२५ प्लुतप्रगृह्या अचि नित्यम् ।
१२६ आङोऽनुनासिकश्छन्दसि बहुलम् ।
१२७ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ।
१२८ ऋत्यकः ।
१२९ अप्लुतवदुपस्थिते ।
१३० ई३ चाक्रवर्मणस्य ।
१३१ दिव उत् ।
१३२ एतत्तदोः सुलोपोऽकोरनञ्समासे
हलि ।
१३३ स्यश्छन्दसि बहुलम् ।
१३४ सोऽचि लोपे चेत् पादपूरणम् ।
१३५ सुट् कात्पूर्वः ।
१३६ अड्भ्यासव्यवायेऽपि ।
१३७ संपरिभ्यां करोतौ भूषणे ।
१३८ समवाये च ।
१३९ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु
च ।
१४० किरतौ लवने ।
१४१ हिंसायां पतेश्च ।
१४२ अपाच्चतुष्पाच्छकुनिष्वालेखने ।
१४३ कुस्तुम्बुरुणि जातिः ।
१४४ अपरस्पराः क्रियासातत्ये ।
१४५ गोष्पदं सेविताऽसेवितप्रमाणेषु ।
१४६ आस्पदं प्रतिष्ठायाम् ।
१४७ आश्चर्यमनित्ये ।
१४८ वर्चस्केऽवस्करः ।
१४९ अपस्करो रथाङ्गम् ।
१५० विष्किरःशकुनौ वा ।
१५१ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ।
१५२ प्रतिष्कशश्च कशेः ।
१५३ प्रस्कण्वहरिश्चन्द्रावृषी ।
१५४ मस्करमस्करिणौ वेणुपरिव्राजकयोः ।
१५५ कास्तीराजस्तुन्दे नगरे ।
१५६ कारस्करो वृक्षः ।
१५७ पारस्कर प्रभृतीनि च सञ्ज्ञायाम् ।
१५८ अनुदात्तं पदमेकवर्जम् ।
१५९ कर्षाऽऽत्त्वतोघञोऽन्त उदात्तः ।
१६० उञ्छादीनां च ॥ ८ ॥
१६१ अनुदात्तस्य च यत्रोदात्तलोपः ।
१६२ धातोः ।
१६३ चितः ।
१६४ तद्धितस्य ।
१६५ कितः ।
१६६ तिसृभ्यो जसः ।
१६७ चतुरः शसि ।
१६८ सावेकाचस्तृतीयादिर्विभक्तिः ।
१६९ अन्तोदात्तादुत्तरपदादन्यतरस्याम-
नित्यसमासे ।
१७० अञ्चेश्छन्दस्यसर्वनामस्थानम् ।

१७१ ऊडिदम्पदाद्यप्पुम्रै द्युभ्यः ।
१७२ अष्टनो दीर्घात् ।
१७३ शतुरनुमो नद्यजादी ।
१७४ उदात्तयणो हल्पूर्वात् ।
१७५ नोङ्धात्वोः ।
१७६ ह्रस्वनुड्भ्यां मतुप् ।
१७७ नामन्यतरस्याम् ।
१७८ ङ्याश्छन्दसि बहुलम् ।
१७९ षट्त्रिचतुर्भ्यो हलादिः ।
१८० झल्युपोत्तमम् ॥ ९ ॥
१८१ विभाषा भाषायाम् ।
१८२ न गोश्वन्साववर्णराडङ्कुङ्कृद्भ्यः ।
१८३ दिवो झल् ।
१८४ नृ चान्यतरस्याम् ।
१८५ तित्स्वरितम् ।
१८६ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधा-
तुकमनुदात्तमन्ह्विङोः ।
१८७ आदिः सिचोऽन्यतरस्याम् ।
१८८ स्वपादिर्हिंसामच्यनिटि ।
१८९ अभ्यस्तानामादिः ।
१९० अनुदात्ते च ।
१९१ सर्वस्य सुपि ।
१९२ भीह्रीभृहुमदजनधनदरिद्राजागरां-
प्रत्ययात् पूर्वं पिति ।
१९३ लिति ।
१९४ आदिर्णमुल्यन्यतरस्याम् ।
१९५ अचः कर्तृयकि ।
१९६ थलि च सेटीडन्तो वा ।
१९७ ञ्नित्यादिर्नित्यम् ।
१९८ आमन्त्रितस्य च ।
१९९ पथिमथोः सर्वनामस्थाने ।
२०० अन्तश्च तवै युगपत् ॥ १० ॥
२०१ क्षयो निवासे ।
२०२ जयः करणम् ।
२०३ वृषादीनां च ।
२०४ संज्ञायामुपमानम् ।
२०५ निष्ठा च द्व्यजनात् ।
२०६ शुष्कधृष्टौ ।
२०७ आशितः कर्ता ।
२०८ रिक्ते विभाषा ।
२०९ जुष्ट र्पिते च च्छन्दसि ।
२१० नित्यं मन्त्रे ।
२११ युष्मदस्मदोर्ङसि ।
२१२ ङयि च ।
२१३ यतोऽनावः ।
२१४ ईडवन्दवृशंसदुहां ण्यतः ।
२१५ विभाषा वेण्विन्धानयोः ।
२१६ त्यागरागहासकुहश्वठक्रथानाम् ।
२१७ उपोत्तमं रिति ।
२१८ चङ्यन्यन्तरस्याम् ।
२१९ मतोः पूर्वमात्संज्ञायां स्त्रियाम् ।
२२० अन्तोऽवत्याः ॥ ११ ॥
२२१ ईवत्याः ।
२२२ चौ ।
२२३ समासस्य ।

['एकाचश्चयो ल्यपि च ये च क्षय्यज-
य्यावकः सवर्णेऽवपथाहिंसायामनुदात्तस्य
विभाषाक्षयईवत्यास्त्रीणि'] ॥

इति षष्ठाध्यायस्य प्रथमः पादः ।

अथ षष्ठस्य द्वितीयः पादः ।

१ बहुव्रीहौ प्रकृत्या पूर्वपदम् ।
२ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमाना-व्ययद्वितीयाकृत्याः ।
३ वर्णो वर्णेष्वनेते ।
४ गाधलवणयोः प्रमाणे ।
५ दायाद्यं दायादे ।
६ प्रतिबन्धि चिरकृच्छ्रयोः ।
७ पदेऽपदेशे ।
८ निवाते वातत्राणे ।
९ शारदेऽनार्त्तवे ।
१० अध्वर्युकषाययोर्जातौ ।
११ सदृशप्रतिरुपयोः सादृश्ये ।
१२ द्विगौ प्रमाणे ।
१३ गन्तव्यपण्यं वाणिजे ।
१४ मात्रोपज्ञोपक्रमच्छाये नपुंसके ।
१५ सुखप्रिययोर्हिते ।
१६ प्रीतौ च ।
१७ स्व स्वामिनि ।
१८ पत्यावैश्वर्य ।
१९ न भूवाक्चिद्दधिषु ।
२० वा भुवनम् ॥ १ ॥
२१ आशङ्काऽऽबाधनेदीयः सु सम्भावने ।
२२ पूर्वे भूतपूर्वे ।
२३ सविधसनीडसमर्यादसवेशसदेशेषु-सामीप्ये ।
२४ विस्पष्टादीनि गुणवचनेषु ।
२५ श्रज्याऽवमकन्पावत्सु भावे कर्म धारये ।
२६ कुमारश्च ।
२७ आदिः प्रत्येनसि ।
२८ पूवेष्वन्यतरस्याम् ।
२९ इगन्तकालकपालभगालशरावेषु द्विगौ ।
३० बह्वन्यतरस्याम् ।
३१ दिष्टिवितस्त्योश्च ।
३२ सप्तमी सिद्धशुष्कपक्वबन्धेष्व कालात् ।
३३ परिप्रत्युपापा वर्ज्यमानाऽहोरात्रावयवेषु ।
३४ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ।
३५ संख्या ।
३६ आचार्योपसर्जनश्चान्तेवासी ।
३७ कार्तकौजपादयश्च ।
३८ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभार-भारतहैलिहिलरौरवप्रवृद्धेषु ।
३९ क्षुल्लकश्च वैश्वदेवे ।
४० उष्ट्रः सादिवाम्योः ॥ २ ॥
४१ गौः सादसादिसारषु ।
४२ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लील-दृढरुपा पारेवडवा तैतिलकद्रूः पण्य-कम्बला दासीभाराणां च ।
४३ चतुर्थी तदर्थे ।
४४ अर्थे ।
४५ क्ते च ।
४६ कर्मधारयेऽनिष्ठा ।
४७ अहीने द्वितीया ।
४८ तृतीया कर्मणि ।
४९ गतिरनन्तरः ।
५० तादौ च निति कृत्यतौ ।
५१ तवै चान्तश्च युगपत् ।
५२ अनिगन्तोऽञ्चतौ वप्रत्यये ।
५३ न्यधी च ।

५४ ईषदन्यतरस्याम् ।
५५ हिरण्यपरिमाणं धने ।
५६ प्रथमोऽचिरोपसम्पत्तौ ।
५७ कतरकतमौ कर्मधारये ।
५८ आर्यो ब्राह्मणकुमारयोः ।
५९ राजा च ।
६० षष्ठी प्रत्येनसि ।
६१ क्ते नित्यार्थे ।
६२ ग्रामः शिल्पिनि ।
६३ राजा च प्रशंसायाम् ।
६४ आदिरुदात्तः ।
६५ सप्तमीहारिणौ धर्म्येऽहरणे ।
६६ युक्ते च ।
६७ विभाषाऽध्यक्षे ।
६८ पापं च शिल्पिनि ।
६९ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ।
७० अङ्गनि मैरेये ।
७१ भक्ताख्यास्तदर्थेषु ।
७२ गोबिडालसिंहसैन्धवेषूपमाने ।
७३ अके जीविकार्थे ।
७४ प्राचां क्रीडायाम् ।
७५ अणि नियुक्ते ।
७६ शिल्पिनि चाऽकृञः ।
७७ संज्ञायां च ।
७८ गोतन्तियवं पाले ।
७९ णिनि ।
८० उपमानं शब्दार्थप्रकृतावेव ॥ ४ ॥
८१ युक्तारोह्यादयश्च ।
८२ दीर्घकाशतुषभ्राष्ट्रवटं जे ।
८३ अन्त्यात्पूर्वं बह्वचः ।
८४ ग्रामेऽनिवसन्तः ।
८५ घोषादिषु च ।
८६ छात्र्यादयः शालायाम् ।
८७ प्रस्थेऽवृद्धमकर्क्यादीनाम् ।
८८ मालादीनां च ।
८९ अमहन्नवन्नगरेऽनुदीचाम् ।
९० अर्मे चाऽवण द्व्यच्त्र्यच् ।
९१ न भूताधिकसञ्जीवमद्राश्मकज्जलम् ।
९२ अन्तः ।
९३ सर्वं गुणकार्त्स्न्ये ।
९४ संज्ञायां गिरिनिकाययोः ।
९५ कुमार्यां वयसि ।
९६ उदकेऽकेवले ।
९७ द्विगौ क्रतौ ।
९८ सभायां नपुंसके ।
९९ पुरे प्राचाम् ।
१०० अरिष्टगौडपूर्वे च ॥ ५ ॥
१०१ न हास्तिनफलकमार्तेयाः ।
१०२ कुसूलकूपकुम्भशालं बिले ।
१०३ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ।
१०४ आचार्योपसर्जनश्चान्तेवासिनि ।
१०५ उत्तरपदवृद्धौ सर्वं च ।
१०६ बहुव्रीहौ विश्वं संज्ञायाम् ।
१०७ उदराऽश्वेषुषु ।
१०८ क्षेपे ।
१०९ नदी बन्धुनि ।
११० निष्ठोपसर्गपूर्वमन्यतरस्याम् ।
१११ उत्तरपदादिः ।
११२ कर्णो वर्णलक्षणात् ।
११३ संज्ञौपम्ययोश्च ।

११४ कण्ठपृष्ठग्रीवाजङ्घं च ।
११५ शृङ्गमवस्थायां च ।
११६ नञो जरमरमित्रमृताः ।
११७ सोर्मनसी अलोमोषसी ।
११८ क्रत्वादयश्च ।
११९ आद्युदात्तं द्व्यच् छन्दसि ।
१२० वीरवीर्यौ च ॥ ६ ॥
१२१ कूलतीरतुलमूलशालाक्षसममव्ययी-भावे ।
१२२ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ।
१२३ तत्पुरुषे शालायां नपुंसके ।
१२४ कन्था च ।
१२५ आदिश्चिहणादीनाम् ।
१२६ चेलखेटकटुककाण्डं गर्हायाम् ।
१२७ चीरमुपमानम् ।
१२८ पललसूपशाकं मिश्रे ।
१२९ कूलसूदस्थलकर्षाः संज्ञायाम् ।
१३० अकर्मधारये राज्यम् ।
१३१ वर्ग्यादयश्च ।
१३२ पुत्रः पुम्भ्यः ।
१३३ नाऽऽचार्यराजर्त्विक्संयुक्तज्ञात्या-ख्येभ्यः ।
१३४ चूर्णादीन्यप्राणिषष्ठ्याः ।
१३५ षट् च काण्डादीनि ।
१३६ कुण्डं वनम् ।
१३७ प्रकृत्या भगालम् ।
१३८ शितेर्नित्याऽबह्वज्बहुव्रीहावभसत् ।
१३९ गतिकारकोपपदात्कृत् ।
१४० उभे वनस्पत्यादिषु युगपत् ॥ ७ ॥
१४१ देवताद्वन्द्वे च ।
१४२ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूष-मन्थिषु ।
१४३ अन्तः ।
१४४ थाऽथघञ्क्ताऽजबित्रकाणाम् ।
१४५ सूपमानात् क्तः ।
१४६ संज्ञायामनाचितादीनाम् ।
१४७ प्रवृद्धादीनां च ।
१४८ कारकाद्दत्तश्रुतयोरेवाऽऽशिषि ।
१४९ इत्थंभूतेन कृतमिति च ।
१५० अनो भावकर्मवचनः ।
१५१ मन्क्तिन्व्याख्यानशयनासनस्थान-याजकादिक्रीताः ।
१५२ सप्तम्याः पुण्यम् ।
१५३ ऊनार्थकलहं तृतीयायाः
१५४ मिश्रं चानुपसर्गमसन्धौ ।
१५५ नञो गुणप्रतिषेधे सम्पाद्यर्हहिताल-मर्थास्तद्धिताः ।
१५६ ययतोश्चाऽतदर्थे ।
१५७ अच्कावशक्तौ ।
१५८ आक्रोशे च ।
१५९ संज्ञायाम् ।
१६० कृत्योकेष्णुच्चार्वादयश्च ॥ ८ ॥
१६१ विभाषा तृन्नन्नतीक्ष्णशुचिषु ।
१६२ बहुव्रीहाविदमेतत्तद्भ्यः प्रथम-पूरणयोः क्रियागणने ।
१६३ संख्यायाः स्तनः ।
१६४ विभाषा छन्दसि ।
१६५ संज्ञायां मित्राऽजिनयोः ।
१६६ व्यवायिनोऽन्तरम् ।
१६७ मुखं स्वाङ्गम् ।

१६८ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टि-
पृथुवत्सेभ्यः ।
१६९ निष्ठोपमानादन्यतरस्याम् ।
१७० जातिकालसुखादिभ्योऽनाच्छदनात्-
क्तोऽकृतमितप्रतिपन्नाः ।
१७१ वा जाते ।
१७२ नञ्सुभ्याम् ।
१७३ कपि पूर्वम् ।
१७४ ह्रस्वान्तेऽन्त्यात्पूर्वम् ।
१७५ बहोर्नञ्वदुत्तरपदभूम्नि ।
१७६ न गुणादयोऽवयवाः ।
१७७ उपसर्गात्स्वाङ्गंध्रुवमपर्शु ।
१७८ वनं समासे ।
१७९ अन्तः ।
१८० अन्तश्च ॥ ९ ॥
१८१ न निविभ्याम् ।
१८२ परेरभितोभावि मण्डलम् ।
१८३ प्रादस्वाङ्गं संज्ञायाम् ।
१८४ निरुदकादीनि च ।
१८५ अभेर्मुखम् ।
१८६ अपाच्च ।
१८७ स्फिगपूतवीणाऽञ्जोऽध्वकुक्षिसीर-
नामनाम च ।
१८८ अधेरुपरिस्थम् ।
१८९ अनोरप्रधानकनीयसी ।
१९० पुरुषश्चाऽन्वादिष्टः ।
१९१ अतेरकृत्पदे ।
१९२ नेरनिधाने ।
१९३ प्रतेरंश्वादयस्तत्पुरुषे ।
१९४ उषाद् द्व्यजजिनमगौरादयः ।
१९५ सोरवक्षेपणे ।
१९६ विभाषोत्पुच्छे ।
१९७ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ।
१९८ सक्थं चाऽक्रान्तात् ।
१९९ परादिशछन्दसि बहुलम् ।
['बहुव्रीहांवाशङ्कागौः साद क्ते नित्यार्थे युक्त । नहास्तिनकूलतीर देवताविभाषा न निव्येकोन विंशातिः'] ॥

इति षष्ठाध्यायस्य द्वितीयः पादः ।

अथ षष्ठस्य तृतीयः पादः ।

१ अलुगुत्तरपदे ।
२ पञ्चम्याः स्तोकादिभ्यः ।
३ ओजः सहोम्भस्तमसस्तृतीयायाः ।
४ मनसः संज्ञायाम् ।
५ आज्ञायिनि च ।
६ आत्मनश्च ।
७ वैयाकरणाख्यायां चतुर्थ्याः ।
८ परस्य च ।
९ हलदन्तात्सप्तम्याः संज्ञायाम् ।
१० कारनाम्नि च प्राचां हलादौ ।
११ मध्याद् गुरौ ।
१२ अमूर्धमस्तकात्स्वाङ्गादकामे ।
१३ बन्धे च विभाषा ।
१४ तत्पुरुषे कृति बहुलम् ।
१५ प्रावृट्शरत्कालदिवां जे ।
१६ विभाषा वर्षक्षशरवरात् ।
१७ घकालतनेषु कालनाम्नः
१८ शयवासवासिष्वकालात् ।
१९ नेन्त्सिद्धबध्नातिषु च ।
२० स्थे च भाषायाम् ॥ १ ॥

२१ षष्ठ्या आक्रोशे ।
२२ पुत्रेऽन्यतरस्याम् ।
२३ ऋतो विद्यायोनिसम्बन्धेभ्यः ।
२४ विभाषा स्वसृपत्योः ।
२५ आनङ् ऋतो द्वन्द्वे ।
२६ देवताद्वन्द्वे च ।
२७ ईदग्नेः सोमवरुणयोः ।
२८ इद् वृद्धौ ।
२९ दिवो द्यावा ।
३० दिवसश्च पृथिव्याम् ।
३१ उषासोषसः ।
३२ मातरपितरावुदीचाम् ।
३३ पितरामातरा च च्छन्दसि ।
३४ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ।
३५ तसिलादिष्वाकृत्वसुचः ।
३६ क्यङ्मानिनोश्च ।
३७ न कोपधायाः ।
३८ संज्ञापूरण्योश्च ।
३९ वृद्धिनिमित्तस्य च तद्धितस्याऽरक्तविकारे ।
४० स्वाङ्गाच्चेतः ॥ २ ॥
४१ जातेश्च ।
४२ पुंवत्कर्मधारयजातीयदेशीयेषु ।
४३ घरुपकल्पचेलडब्रुवगोत्रमतहतेषुङ्योऽनेकाचो ह्रस्वः ।
४४ नद्याः शेषस्याऽन्यतरस्याम् ।
४५ उगितश्च ।
४६ आन्महतः समानाधिकरणजातीययोः ।
४७ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ।
४८ त्रेस्त्रयः ।
४९ विभाषा चत्वारिंशत् प्रभृतौ सर्वेषाम् ।
५० हृदयस्य हृल्लेखयदण्लासेषु ।
५१ वा शोकष्यञ्रोगेषु ।
५२ पादस्य पदाज्यातिगोपहतेषु ।
५३ पद्यत्यतदर्थे ।
५४ हिमकाषिहतिषु च ।
५५ ऋचः शे ।
५६ वाघोषमिश्रशब्देषु ।
५७ उदकस्योदः संज्ञायाम् ।
५८ पेषं वासवाहनधिषु च ।
५९ एकहलादौ पूरयितव्येऽन्यतरस्याम् ।
६० मन्थौदनसक्तुबिन्दुवज्रभारहारबीवधगाहेषु च ।
६१ इको ह्रस्वोऽङ्यो गालवस्य ।
६२ एक तद्धिते च ।
६३ ङ्यापोः संज्ञाछन्दसोर्बहुलम् ।
६७ अरुर्द्विषदजन्तस्य मुम् ।
६८ इच एकाचोऽम्प्रत्ययवच्च ।
६९ वाचंयमपुरन्दरौ च ।
७० कारे सत्याऽगदस्य ।
७१ श्येनतिलस्य पाते ञे ।
७२ रात्रेः कृति विभाषा ।
७३ नलोपो नञः ।
७४ तस्मान्नुडचि ।
७५ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्र नाकेषुप्रकृत्या ।
७६ एकादिश्चैकस्य चाऽदुक् ।
७७ नगोऽप्राणिष्वन्यतरस्याम् ।
७८ सहस्यः सः संज्ञायाम् ।

७९ ग्रन्थाऽन्ताऽधिके च ।
८० द्वितीये चाऽनुपाख्ये ॥ ४ ॥
८१ अव्ययीभावे चाऽकाले ।
८२ वोपसर्जनस्य ।
८३ प्रकृत्याशिषि ।
८४ समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु ।
८५ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररुप-स्थानवर्णवयोवचनबन्धुषु ।
८६ चरणे ब्रह्मचारिणि ।
८७ तीर्थे ये ।
८८ विभाषोदरे ।
८९ दृग्दृशवतुषु ।
९० इदंकिमोरीश्की ।
९१ आ सर्वनाम्नः ।
९२ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्येय ।
९३ समः समि ।
९४ तिरसस्तिर्यलोपे ।
९५ सहस्य सध्रिः ।
९६ सधमादस्थयोश्छन्दसि ।
९७ द्व्यन्तरुपसर्गेभ्योऽप ईत् ।
९८ ऊदनोर्देशे ।
९९ अषष्ठ्यतृतीयास्थस्याऽन्यस्यदुगाशी-राशास्थास्थितोत्सुकोतिकारकरागच्छेषु ।
१०० अर्थे विभाषा ।
१०१ कोः कत्तत्पुरुषेऽचि ।
१०२ रथवदयोश्च ।
१०३ तृणे च जातौ ।
१०४ का पथ्यक्षयोः ।
१०५ ईषदर्थे ।
१०६ विभाषा पुरुषे ।
१०७ कवं चोष्णे ।
१०८ पथि च च्छन्दसि ।
१०९ पृषोदरादीनि यथोपदिष्टम् ।
११० संख्याविसायपूर्वस्याऽह्नस्याहन न्यतरस्यां ङौ ।
१११ ढ्रलोपे पूर्वस्य दीर्घोऽणः ।
११२ सहिवहोरोदवर्णस्य ।
११३ साढ्यै साढ्वा साढेति निगमे ।
११४ संहितायाम् ।
११५ कर्णे लक्षणस्याऽऽविष्टाष्टपञ्चमणि-भिन्नच्छिन्नच्छिद्रस्त्रुवस्वस्तिकस्य ।
११६ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।
११७ वनगिर्योः संज्ञायां कोटर किंशु-लुकादीनाम् ।
११८ वले ।
११९ मतौ वह्वचोऽनजिरादीनाम् ।
१२० शरादीनां च ॥ ६ ॥
१२१ इको वहेऽपीलाः ।
१२२ उपसर्गस्य घञ्यमनुष्ये बहुलम् ।
१२३ इकः काशे ।
१२४ दस्ति ।
१२५ अष्टनः संज्ञायाम् ।
१२६ छन्दसि च ।
१२७ चितेः कपि ।
१२८ विश्वस्य वसुराटोः ।
१२९ नरे संज्ञायाम् ।
१३० मित्रे वर्षौ ।
१३१ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्यमतौ ।
१३२ ओषधेश्च विभक्तावप्रथमायाम् ।

१३३ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ।
१३४ इकः सुञि ।
१३५ द्व्यचोऽतस्तिङः ।
१३६ निपातस्य च ।
१३७ अन्येषामपि दृश्यते ।
१३८ चौ ।
१३९ समप्रसारणस्य ।
[अलुक् षष्ठ्याजातेरिकोऽव्ययीभावे कोः कत्तदिको वहे एकोनविंशतिः] ॥

इति षष्ठाध्यायस्य तृतीयः पादः ।

अथ षष्ठस्य चतुर्थः पादः ।

१ अङ्गस्य ।
२ हलः
३ नामि ।
४ न तिसृचतसृ ।
५ छन्दस्युभयथा ।
६ नृ च ।
७ नोपधायाः ।
८ सर्वनामस्थाने चासम्बुद्धौ ।
९ वा षपूर्वस्य निगमे ।
१० सान्तमहतः संयोगस्य ।
११ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ।
१२ इन्हन्पूषार्यम्णां शौ ।
१३ सौ च ।
१४ अत्वसन्तस्य चाऽधातोः ।
१५ अनुनासिकस्य क्विझलोः क्ङिति ।
१६ अज्झनगमां सनि ।
१७ तनोतेर्विभाषा ।
१८ क्रमश्च क्त्वि ।
१९ च्छ्वोः शूडनुनासिके च ।
२० ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥१॥
२१ राल्लोपः ।
२२ असिद्धवदत्राऽऽभात् ।
२३ श्नान्नलोपः ।
२४ उनिदितां हल इपधायाः क्ङिति ।
२५ दंशसञ्जस्वञ्जां शपि ।
२६ रञ्जेश्च ।
२७ घञि च भावकरणयोः ।
२८ स्यदो जवे ।
२९ अवोदैधौद्मप्रश्रथहिमश्रथाः ।
३० नाञ्चेः पूजायाम् ।
३१ क्त्वि स्कन्दिस्यन्दोः ।
३२ जान्तनशां विभाषा ।
३३ भञ्जेश्च चिणि ।
३४ शास इदङ्हलोः ।
३५ शा हौ ।
३६ हन्तेर्जः ।
३७ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।
३८ वा ल्यपि ।
३९ न क्तिचि दीर्घश्च ।
४० गमः कौ ॥ २ ॥
४१ विड्वनोरनुनासिकस्याऽऽत् ।
४२ जनसनखनां सञ्झलोः ।
४३ ये विभाषा ।
४४ तनोतेर्यकि ।
४५ सनः क्तिचि लोपश्चाऽस्याऽन्यतरस्याम् ।
४६ आर्धधातुके ।

४७ भ्रस्जो रोपधयो रमन्यतरस्याम् ।
४८ अतो लोपः ।
४९ यस्य हलः ।
५० क्यस्य विभाषा ।
५१ णेरनिटि ।
५२ निष्ठायां सेटि ।
५३ जनिता मन्त्रे ।
५४ शमिता यज्ञ ।
५५ अयामन्ताल्वाय्येत्विष्णुषु ।
५६ ल्यपि लघुपूर्वात् ।
५७ विभाषाऽऽपः ।
५८ युप्लुवोर्दीर्घेश्छन्दसि ।
५९ क्षियः ।
६० निष्ठायामण्यदर्थे ॥ ३ ॥
६१ वाऽऽक्रोशदैन्ययोः ।
६२ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेऽज्झनग्रहदृशां वा चिण्वदिट् च ।
६३ दीङो युडचि क्ङिति ।
६४ आतो लोप इटि च ।
६५ ईद्यति ।
६६ घुमास्थागापाजहातिसां हलि ।
६७ एर्लिङि ।
६८ वाऽन्यस्य संयोगादेः ।
६९ न ल्यपि ।
७० मयतेरिदन्यतरस्याम् ।
७१ लुङ्लङ्लृङ्क्ष्वडुदात्तः ।
७२ आडजादीनाम् ।
७३ छन्दस्यापि दृश्यते ।
७४ न माङ्योगे ।
७५ बहुलं छन्दस्यमाङ्योगेइरयोगेऽपि ।
७६ इरयो रे ।
७७ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ।
७८ अभ्यासस्याऽसवर्णे ।
७९ स्त्रियाः ।
८० वाऽम्शसोः ॥ ४ ॥
८१ इणो यण् ।
८२ एरनेकाचोऽसंयोगपूर्वस्य
८३ ओः सुपि ।
८४ वर्षाभ्वश्च ।
८५ न भूसुधियोः ।
८६ छन्दस्युभयथा ।
८७ हुश्नुवोः सार्वधातुके ।
८८ भुवो वुग्लुङ्लिटोः ।
८९ ऊदुपधाया गोहः ।
९० दोषो णौ ।
९१ वा चित्तविरागे ।
९२ मितां ह्रस्वः ।
९३ चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ।
९४ खचि ह्रस्वः ।
९५ ह्लादो निष्ठायाम् ।
९६ छादेर्घेऽद्व्युपसर्गस्य ।
९७ इस्मन्त्रन् क्वि च ।
९८ गमहनजनखनघसां लोपः क्ङित्यनङि ।
९९ तनिपत्योश्छन्दसि ।
१०० घसिभसोर्हलि च ॥ ५ ॥
१०१ हुझल्भ्यो हेर्धिः ।
१०२ श्रुशृणुपृकृवृभ्यश्छन्दसि ।
१०३ अङितश्च ।
१०४ चिणो लुक् ।
१०५ अतो हेः ।

१०६ उतश्च प्रत्ययादसंयोगपूर्वात् ।
१०७ लोपश्चास्याऽन्यरन्यां म्वोः ।
१०८ नित्यं करोतेः ।
१०९ ये च ।
११० अत उत्सार्वधातुके ।
१११ श्नसोरल्लोपः ।
११२ श्नाभ्यस्तयोरातः ।
११३ ई हल्यघोः ।
११४ इद्दरिद्रस्य ।
११५ भियोऽन्यतरस्यान् ।
११६ जहातेश्च ।
११७ आ च हौ ।
११८ लोपो यि ।
११९ घ्वसोरेद्धवभ्यासलोपश्च ।
१२० अत एकहल्मध्येऽनादेशादेर्लिटि ॥६॥
१२१ थलि च सेटि ।
१२२ तृफलभजत्रपश्च ।
१२३ राधो हिंसायाम् ।
१२४ वा जृभ्रमुत्रसाम् ।
१२५ फणां च सप्तानाम् ।
१२६ न शसददवादितगुणानाम् ।
१२७ अर्वणस्त्रसावनञः ।
१२८ मघवा बहुलम् ।
१२९ भस्य ।
१३० पादः पत् ।
१३१ वसोः सम्प्रसारणम् ।
१३२ वाह ऊठ् ।
१३३ श्वयुमघोनामतद्धिते ।
१३४ अल्लोपोऽनः ।
१३५ षपूर्वहन्धृतराज्ञामणि ।
१३६ विभाषा ङिश्योः ।
१३७ न संयोगाद्वमन्तात् ।
१३८ अचः ।
१३९ उद ईत् ।
१४० आतो धातोः ॥ ७ ॥
१४१ मन्त्रेष्वाङ्यादेरात्मनः ।
१४२ ति विंशतेर्डिति ।
१४३ टेः ।
१४४ नस्तद्धिते ।
१४५ अह्नष्टखोरेव ।
१४६ ओर्गुणः ।
१४७ ढे लोपोऽकद्र्वाः ।
१४८ यस्येति च ।
१४९ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ।
१५० हलस्तद्धितस्य ।
१५१ आपत्यस्य च तद्धितेऽनाति ।
१५२ क्यच्व्योश्च ।
१५३ बिल्वकादिभ्यश्छस्य लुक् ।
१५४ तुरिष्ठेमेयःसु ।
१५५ टेः ।
१५६ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरंपूर्वस्य च गुणः ।
१५७ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृ-प्रदीर्घवृन्दाकाणां प्रस्थस्फवर्बंहि-गर्वर्षित्रब्दाधिवृन्दाः ।
१५८ बहोर्लोपो भू च बहोः ।
१५९ इष्ठस्य यिट् च ।
१६० ज्यादादीयसः ।
१६१ र ऋतो हलादेर्लघोः ।
१६२ विभाषर्जोश्छन्दसि ।

१६३ प्रकृत्यैकाच् ।
१६४ इनण्यनपत्ये ।
१६५ गाथिविदथिकेशिगणिपणिनश्च ।
१६६ संयोगादिश्च ।
१६७ अन् ।
१६८ ये चाऽभावकर्मणोः ।
१६९ आत्माऽध्वानौ खे ।
१७० न मपूर्वोऽपत्येऽवर्मणः ।
१७१ ब्राह्मोऽजातौ ।
१७२ कार्मस्ताच्छील्ये ।
१७३ औक्षमनपत्ये ।
१७४ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्मशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ।
१७५ ऋत्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि । ['अङ्गस्य राल्लोपो विड्वनोर्वाऽऽक्रोशेणो यण्हुझल्भस्थलि च मन्त्रेषु र ऋतः पञ्चदश']

इति षष्ठाध्यायस्य चतुर्थः पादः ।

इति षष्ठाध्यायः ।

अथ सप्तमोऽध्यायः

अथ प्रथमः पादः ।

१ युवोरनाकौ ।
२ आयनेयीनीनीयियः फढखछघां प्रत्ययादीनाम् ।
३ झोऽन्तः ।
४ अदभ्यस्तात् ।
५ आत्मनेपदेष्वनतः ।
६ शीङो रुट् ।
७ वेत्तेर्विभाषा ।
८ बहुलं छन्दसि ।
९ अतो भिस ऐस् ।
१० बहुलं छन्दसि ।
११ नेदमदसोरकोः ।
१२ टाङसिङसामिनात्स्याः ।
१३ ङेर्यः ।
१४ सर्वनाम्नः स्मै ।
१५ ङसिङ्योः स्मात्स्मिनौ ।
१६ पूर्वादिभ्यो नवभ्यो वा ।
१७ जसः शी ।
१८ औङ आपः ।
१९ नपुंसकाच्च ।
२० जश्शसोः शिः ॥ १ ॥
२१ अष्टाभ्य औश् ।
२२ षड्भ्यो लुक् ।
२३ स्वमोर्नपुंसकात् ।
२४ अतोऽम् ।
२५ अद्ड्डुतरादिभ्यः पञ्चभ्यः ।
२६ नेतराच्छन्दसि ।
२७ युष्मदस्मद्भ्यां ङसोऽश् ।
२८ ङे प्रथमयोरम् ।
२९ शसो न ।
३० भ्यसोऽभ्यम् ।
३१ पञ्चम्या अत् ।
३२ एकवचनस्य च ।
३३ साम आकम् ।
३४ आत औ णलः ।
३५ तुह्योस्तातङ्ङाशिष्यन्तरस्याम् ।
३६ विदेः शतुर्वसुः ।

३७ समासेऽनञ्पूर्वे क्त्वो ल्यप्।
३८ क्त्वाऽपि च्छन्दसि ।
३९ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्या-
याजालः ।
४० अमो मश्।
४१ लोपस्त आत्मनेपदेषु ।
४२ ध्वमो ध्वात्।
४३ यजध्वैनमिति च ।
४४ तस्य तात्।
४५ तप्तनप्तनथनाश्च ।
४६ इदन्तो मसि ।
४७ क्त्वो यक्।
४८ इष्ट्वीनमिति च ।
४९ स्नात्व्यादयश्च ।
५० आज्जसेरसुक्।
५१ अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ।
५२ आमि सर्वनाम्नः सुट्।
५३ त्रेस्त्रयः ।
५४ ह्रस्वनद्यापो नुट्।
५५ षट्चतुर्भ्यश्च ।
५६ श्रीग्रामण्योश्छन्दसि ।
५७ गोः पादान्ते ।
५८ इदितो नुम्धातोः
५९ शे मुचादीनाम्।
६० मस्जिनशोर्झलि ॥ ३ ॥
६१ रधिजभोरचि ।
६२ नेट्यलिटि रधेः ।
६३ रभेरशब्लिटोः ।
६४ लभेश्च ।
६५ आङो यि ।
६६ उपात्प्रशंसायाम्।
६७ उपसर्गात्खल्घञोः ।
६८ न सुदुर्भ्यां केवलाभ्याम्।
६९ विभाषा चिण्णमुलोः ।
७० उगिदचां सर्वनामस्थानेऽधातोः ।
७१ युजेरसमासे ।
७२ नपुंसकस्य झलचः ।
७३ इकोऽचि विभक्तौ ।
७४ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ।
७५ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।
७६ छन्दस्यपि दृश्यते ।
७७ ई च द्विवचने ।
७८ नाऽभ्यस्ताच्छतुः ।
७९ वा नपुंसकस्य ।
८० आच्छीनद्योर्नुम्॥ ४ ॥
८१ शप्श्यनोर्नित्यम्।
८२ सावनडुहः ।
८३ दृक्स्ववः स्वतवसां छन्दसि ।
८४ दिव औत्।
८५ पथिमथ्यृभुक्षामात्।
८६ इतोऽत्सर्वनामस्थाने ।
८७ थो न्थः ।
८८ भस्य टेर्लोपः ।
८९ पुंसोऽसुङ्।
९० गोतो णित्।
९१ णलुत्तमो वा ।
९२ सख्युरसंबुद्धौ ।
९३ अनङ् सौ ।
९४ ऋदुशनस्पुरुदंसोऽनेहसां च ।
९५ तृज्वत् क्रोष्टुः ।

९६ स्त्रियां च ।
९७ विभाषा तृतीयादिष्वचि ।
९८ चतुरनडुहोरामुदात्तः ।
९९ अम्संबुद्धौ ।
१०० ऋत इद्धातोः ॥ ५ ॥
१०१ उपधायाश्च ।
१०२ उदोष्ठ्यपूर्वस्य ।
१०३ बहुलं छन्दसि ।
['युवोरष्टाभ्यो लोपो रधिशप्श्यनोरुपधाया-स्त्रीणि'] ॥

इति सप्तमाध्याये प्रथमः पादः ।

अथ द्वितीयः पादः ।

१ सिचि वृद्धिः परस्मैपदेषु ।
२ अतो ल्रान्तस्य ।
३ वदव्रजहलन्तस्याऽचः ।
४ नेटि ।
५ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।
६ ऊर्णोतेर्विभाषा ।
७ अतो हलादेर्लघोः ।
८ नेड् वशि कृति ।
९ तितुत्रतथसिसुसरकसेषु च ।
१० एकाच उपदेशेऽनुदात्तात् ।
११ श्र्युकः किति ।
१२ सनि ग्रहगुहोश्च ।
१३ कृसृभृवृस्तुद्रुस्त्रु श्रुवो लिटि ।
१४ श्वीदितो निष्ठायाम ।
१५ यस्य विभाषा ।
१६ आदितश्च ।
१७ विभाषा भावाऽऽदिकर्मणोः ।
१८ क्षुब्धध्वान्तलग्नम्लिष्टविरिब्धफाण्ट-बाढानिमन्थमनस्तमः सक्ताविस्पष्ट-स्वरानायासभृशेषु ।
१९ धृषिशसी वैयात्ये ।
२० दृढः स्थूलबलयोः ॥ १ ॥
२१ प्रभौ परिवृढः ।
२२ कृच्छ्रगहनयोः कषः ।
२३ घुषिरविशब्दने ।
२४ अर्देः संनिविभ्यः ।
२५ अभेश्चाऽऽविदूर्ये ।
२६ णेरध्ययने वृत्तम् ।
२७ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।
२८ रुष्यमत्वरसंधुषास्वनाम् ।
२९ हृषेर्लोमसु ।
३० अपचितश्च ।
३१ ह्वरेश्छन्दसि ।
३२ अपरिह्वृताश्च ।
३३ सोमे ह्वरितः ।
३४ ग्रसतिस्कभितस्तभितोत्तभितचत्तविक-स्ताविशस्तृशंस्तृशास्तृतरुतृतरुवरुतृव-रुतवरुत्रीरुज्ज्वलिति क्षरितिवमित्य-मितीति च ।
३५ आर्द्धधातुकस्येड्वलादेः ।
३६ स्नुक्र मोरनात्मनेपदनिमित्ते ।
३७ ग्रहाऽलिटि दीर्घः ।
३८ वृतो वा ।
३९ न लिङि ।
४० सिचि च परस्मैपदेषु ॥ २ ॥
४१ इट् सनि वा ।
४२ लिङ्सिचोरात्मनेपदेषु ।
४३ ऋतश्च संयोगादेः ।

४४ स्वरतिसूतिसूयतिधूञूदितोवा ।
४५ रधादिभ्यश्च ।
४६ निरः कुषः ।
४७ इण्निष्ठायाम् ।
४८ तीषसहलुभरुषरिषः ।
४९ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णु-
भरज्ञपिसनाम् ।
५० क्लिशः क्त्वानिष्ठयोः ।
५१ पूङ्श्च ।
५२ वसतिक्षुधोरिट् ।
५३ अञ्चेः पूजायाम् ।
५४ लुभो विमोहने ।
५५ जृव्रश्च्योः क्त्वि ।
५६ उदितो वा ।
५७ सेऽसिचि कृतचृतच्छृदतृदनृतः ।
५८ गमेरिट् परस्मैपदेषु ।
५९ न वृद्भ्यश्चतुर्भ्यः ।
६० तासि च क्लृपः ॥ ३ ॥
६१ अचस्तास्वत्थल्यनिटो नित्यम् ।
६२ उपदेशेऽत्वतः ।
६३ ऋतो भारद्वाजस्य ।
६४ बभूथाततन्थजगृम्भववर्थेति निगमे ।
६५ विभाषा सृजिदृशोः ।
६६ इडत्यर्तिव्ययतीनाम् ।
६७ वस्वेकाजाद्घसाम् ।
६८ विभाषा गमहनविदविशाम् ।
६९ सनिंससनिवांसम् ।
७० ऋद्धनोः स्ये ।
७१ अञ्जेः सिचि ।
७२ स्तुसुधूञ्भ्यः परस्मैपदेषु ।
७३ यमरमनमातां सक् च ।
७४ स्मिपूङ्रञ्ज्वशां सनि ।
७५ किरश्च पञ्चभ्यः ।
७६ रुदादिभ्यः सार्वधातुके ।
७७ ईशः से ।
७८ ईड्जनोर्ध्वे च ॥
७९ लिङः सलोपोऽनन्त्यस्य ।
८० अतो येयः ॥ ४ ॥
८१ आतो ङितः ।
८२ आने मुक् ।
८३ ईदासः ।
८४ अष्टन आ विभक्तौ ।
८५ राया हलि ।
८६ युष्मदस्मदोरनादेशे ।
८७ द्वितायायं च ।
८८ प्रथमायाश्च द्विवचने भाषायाम् ।
८९ योऽचि ।
९० शेषे लापः ।
९१ मपर्यन्तस्य ।
९२ युवावौ द्विवचने ।
९३ यूयवयौ जसि ।
९४ त्वाऽहै सौ ।
९५ तुभ्यमह्यौ ङयि ।
९६ तवममौङसि ।
९७ त्वमावेकवचने ।
९८ प्रत्ययोत्तरपदयोश्च ।
९९ त्रिचतुरोः स्त्रियां तिसृचतसृ ।
१०० अचि र ऋतः ॥ ५ ॥
१०१ जराया जरसन्यतरस्याम् ।
१०२ त्यदादीनामः ।

१०३ किमः कः ।
१०४ कु तिहोः ।
१०५ काऽति ।
१०६ तदोः सः सावनन्त्ययोः ।
१०७ अदस औ सुलोपश्च ।
१०८ इदमो मः ।
१०९ दश्च ।
११० यः सौ ।
१११ इदोऽय् पुंसि ।
११२ अनाप्यकः ।
११३ हलि लोपः ।
११४ मृजेर्वृद्धिः ।
११५ अचो ञ्णिति ।
११६ अत उपाधायाः ।
११७ तद्धितेष्वचामादेः ।
११८ किति च ।

['सिचि प्रभाविट्सन्यचस्तास्वदातो जराया अष्टादश'] ॥

इति सप्तमाध्यायस्य द्वितीयः पादः ।

अथ सप्तमस्य तृतीयः पादः ।

१ देविकाशिंशपादित्यवाडदीर्घसत्र-श्रेयसामात् ।
२ केकयमित्रयुप्रलयानां यादेरियः ।
३ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।
४ द्वारादीनां च ।
५ न्यग्रोघस्य च केवलस्य ।
६ न कर्मव्यतिहारे ।
७ स्वागतादीनां च ।
८ श्वादेरिञि ।
९ पदान्तस्याऽन्यतरस्याम् ।
१० उत्तरपदस्य ।
११ अवयवादृतोः ।
१२ सुसर्वार्धाज्जनपदस्य ।
१३ दिशोऽमद्राणाम् ।
१४ प्राचां ग्रामनगराणाम् ।
१५ संख्यायाः संवत्सरसंख्यस्य च ।
१६ वर्षस्याऽऽभविष्यति ।
१७ परिमाणान्तस्याऽसंज्ञाशाणयोः ।
१८ जे प्रोष्ठपदानाम् ।
१९ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ।
२० अनुशतिकादीनां च ॥ १ ॥
२१ देवताद्वन्द्वे च ।
२२ नेन्द्रस्य परस्य ।
२३ दीर्घाच्च वरुणस्य ।
२४ प्राचां नगरान्ते ।
२५ जङ्गलधेनुवलजान्तस्य विभाषित-मुत्तरम् ।
२६ अर्धात् परिमाणस्य पूर्वस्य तु वा ।
२७ नाऽतः परस्य ।
२८ प्रवाहणस्य ढे ।
२९ तत्प्रत्ययस्य च ।
३० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ।
३१ यथातथयथापुरयोः पर्यायेण ।
३२ हनस्तोऽचिण्णलोः ।
३३ आतो युक्चिण्कृतोः ।
३४ नोदात्तोपदेशस्य मान्तस्याऽनाचमेः ।
३५ जनिवध्योश्च ।
३६ अर्तिह्रीब्लीरीक्नूयीक्ष्मायतांपुग् णौ ।
३७ शाच्छासाह्वाव्यावेपां युक् ।

३८ वो विधूनने जुक्।
३९ लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने।
४० भियो हेतुभये षुक्॥ २॥
४१ स्कायो वः।
४२ शदेरगतौ तः।
४३ रुहः पोऽन्यतरस्याम्।
४४ प्रत्ययस्थात्कात्पूर्वस्याऽत इदाप्यसुपः।
४५ न यासयोः।
४६ उदीचामातः स्थाने यकपूर्वायाः।
४७ भरुषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि।
४८ अभाषितपुंस्काच्च।
४९ आदाचार्याणाम्।
५० ठस्येकः।
५१ इसुसुक्तान्तात् कः।
५२ चजोः कु घिण्ण्यतोः।
५३ न्यङ्क्वादीनां च।
५४ हो हन्तेर्ञ्णिन्नेषु।
५५ अभ्यासाच्च।
५६ हेरचङि।
५७ सन्लिटोर्जेः।
५८ विभाषा चेः।
५९ न क्वादेः।
६० अजिव्रज्योश्च।
६१ भुजन्युब्जौ पाण्युपतापयोः।
६२ प्रयाजाऽनुयाजौ यज्ञाङ्गे।
६३ वञ्चेर्गतौ।
६४ ओक उचः के।
६५ ण्य आवश्यके।
६६ यजयाचरुचप्रवचर्चश्च।
६७ वचोऽशब्दसंज्ञायाम्।
६८ प्रयोज्यनियोज्यौ शक्यार्थे।
६९ भोज्यं भक्ष्ये।
७० घोर्लोपो लेटि वा।
७१ ओतः श्यनि।
७२ क्सस्याऽचि।
७३ लुग्वा दुहदिहलिहगुहामात्मनेपदेदन्त्ये।
७४ शमामष्टानां दीर्घः श्यनि।
७५ ष्ठिवुक्लमुचमां शिति।
७६ क्रमः परस्मैपदेषु।
७७ इषुगमियमां छः।
७८ पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशद-
सदां पिबजिघ्रधमतिष्ठमनयच्छपश्य-
र्च्छधौशीयसीदाः।
७९ ज्ञाजनोर्जा।
८० प्वादीनां ह्रस्वः॥ ४॥
८१ मीनातेर्निगमे।
८२ मिदेर्गुणः।
८३ जुसि च।
८४ सार्वधातुकार्धधातुकयोः।
८५ जाग्रोऽविचिण्णल्ङित्सु।
८६ पुगन्तलघूपधस्य च।
८७ नाऽभ्यस्तस्याऽचि पिति सार्वधातुके।
८८ भूसुवोस्तिङि।
८९ उतो वृद्धिर्लुकि हलि।
९० ऊर्णोतेर्विभाषा।
९१ गुणोऽपृक्ते।
९२ तृणह इम्।
९३ ब्रुव इट्।
९४ यङो वा।
९५ तुरुस्तुशम्यमः सार्वधातुके।

९६ अस्तिसिचोऽपृक्ते ।
९७ बहुलं छन्दसि ।
९८ रुदश्च पञ्चभ्यः ।
९९ अड्गार्ग्यगालवयोः ।
१०० अदः सर्वेषाम् ॥ ५ ॥
१०१ अतो दीर्घो यञि ।
१०२ सुपि च ।
१०३ बहुवचने झल्येत् ।
१०४ ओसि च ।
१०५ आङि चाऽऽपः ।
१०६ सम्बुद्धौ च ।
१०७ अम्बार्थनद्योर्ह्रस्वः ।
१०८ ह्रस्वस्य गुणः ।
१०९ जसि च ।
११० ऋतो ङिसर्वनामस्थानयोः ।
१११ घेर्ङिति ।
११२ आण्नद्याः ।
११३ याडापः ।
११४ सर्वनाम्नः स्याड्ढ्रस्वश्च ।
११५ विभाषा द्वितीयातृतीयाभ्याम् ।
११६ ङेराम्नद्याम्नीभ्यः ।
११७ इदुद्भ्याम् ।
११८ औत् ।
११९ अच्च घेः ।
१२० आङो नाऽस्त्रियाम् ॥ ६ ॥

['देविकादेवतास्फ्यो भुजमीनातेरतो दीर्घो विंशतिः] ॥

इति सप्तमस्य तृतीयः पादः ।

अथ चतुर्थः पादः ।

१ णौ चङ्युपधाया ह्रस्वः ।
२ नाऽग्लोपिशास्वृदिताम् ।
३ भ्रजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ।
४ लोपः पिबतेरीच्चाभ्यासस्य ।
५ तिष्ठतेरित् ।
६ जिघ्रतेर्वा ।
७ ऊर्ऋत् ।
८ नित्यं छन्दसि ।
९ दयतेर्दिगि लिटि ।
१० ऋतश्च संयोगादेर्गुणः ।
११ ऋच्छत्यृताम् ।
१२ शृदृप्रां ह्रस्वो वा ।
१३ केऽणः ।
१४ न कपि ।
१५ आपोऽन्यतरस्याम् ।
१६ ऋदृशोऽङि गुणः ।
१७ अस्यतेस्थुक् ।
१८ श्वयतेरः ।
१९ पतः पुम् ।
२० वच उम् ॥ १ ॥
२१ शीङः सार्वधातुके गुणः ।
२२ अयङ् यि क्ङिति ।
२३ उपसर्गाद्ध्रस्व ऊहतेः ।
२४ एतेर्लिङि ।
२५ अकृत्सार्वधातुकयोर्दीर्घः ।
२६ च्वौ च ।
२७ रीङृतः ।
२८ रिङ् शयग्लिङ्क्षु ।
२९ गुणोऽर्त्तिसंयोगाद्योः ।
३० यङि च ।

३१ ई घ्राध्मोः ।
३२ अस्य च्वौ ।
३३ क्यचि च ।
३४ अशनायोदन्यधनाया बुभुक्षापिपा-
सागर्धेषु ।
३५ न च्छन्दस्यपुत्रस्य ।
३६ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति ।
३७ अश्वाऽघस्यात् ।
३८ देवसुम्नयोर्यजुषि काठके ।
३९ कव्यध्वरपृतनस्यर्चि लोपः ।
४० द्यतिस्यतिमास्थामित्ति किति ॥ २ ॥
४१ शाच्छोरन्यतरस्याम् ।
४२ दधातेर्हिः ।
४३ जहातेश्च क्त्वि ।
४४ विभाषा छन्दसि ।
४५ सुधितवसुधितनेमधितधिष्वधिषीय च ।
४६ दो दद्घोः ।
४७ अच उपसर्गात्तः ।
४८ अपो भि ।
४९ सः स्यार्द्धधातुके ।
५० तासस्त्योर्लोपः ।
५१ रि च ।
५२ ह एति ।
५३ यीवर्णयोर्दीधीवेव्योः ।
५४ सीन मीमाधुरभलमशकपतपदामचइस् ।
५५ आप्ज्ञप्यृधामीत् ।
५६ दम्भ इच्च ।
५७ मुचोऽकर्मकस्य गुणो वा ।
५८ अत्र लोपोऽभ्यासस्य ।
५९ ह्रस्वः ।
६० हलादिः शेषः ॥ ३ ॥
६१ शर्पूर्वाः खयः ।
६२ कुहोश्चुः ।
६३ न कवतेर्यङि ।
६४ कृषेश्छन्दसि ।
६५ दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽल-
र्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनि-
क्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः-
सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति
च ।
६६ उरत् ।
६७ द्युतिस्वाप्योः सम्प्रसारणम् ।
६८ व्यथो लिटि ।
६९ दीर्घः इणः किति ।
७० अत आदेः ।
७१ तस्मान्नुड् द्विहलः ।
७२ अश्नोतेश्च ।
७३ भवतेरः ।
७४ ससूवेति निगमे ।
७५ निजां त्रयाणां गुणः श्लौ ।
७६ भृञामित् ।
७७ अर्त्तिपिपर्त्त्योश्च ।
७८ बहुलं छन्दसि ।
७९ सन्यतः ।
८० ओः पुयण्ज्यपरे ॥ ४ ॥
८१ स्रवतिशृणोतिद्रवतिप्रवतिप्लवति-
च्यवतीनां वा ।
८२ गुणो यङ्लुकोः ।
८३ दीर्घोऽकितः ।
८४ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपद-

स्कन्दाम् ।
८५ नुगतोऽनुनासिकान्तस्य ।
८६ जपजभदहदशभञ्जपशां च ।
८७ चरफलोश्च ।
८८ उत्परस्याऽतः ।
८९ ति च ।
९० रीगृदुपधस्य च ।
९१ रुग्रिकौ च लुकि ।
९२ ऋतश्च ।
९३ सन्वल्लघुनि चङ्परेऽनग्लोपे ।
९४ दीर्घो लघोः ।
९५ अत्स्मदृत्वरप्रथम्रदस्तृस्पशाम् ।
९६ विभाषा वैष्टिचेष्ट्योः ।
९७ ई च गणः ।
['णौच शीङ् शाच्छोः शपूर्वाः स्रवति सप्तदश'] ॥

इति सप्तमाध्यायस्य चतुर्थः पादः ।

इति सप्तमोऽध्यायः ।

अथ अष्टमोऽध्यायः

अथ प्रथमः पादः ।

१ सर्वस्य द्वे ।
२ तस्य परमाम्रेडितम् ।
३ अनुदात्तञ्च ।
४ नित्यवीप्सयोः ।
५ परेर्वर्जने ।
६ प्रसमुपोदः पादपूरणे ।
७ उपर्यध्यधसः सामीप्ये ।
८ वाक्यादेरामन्त्रितस्यासूयाऽसंमतिकोप-कुत्सनभर्त्सनेषु ।
९ एकं बहुव्रीहिवत् ।
१० आबाधे च ।
११ कर्मधारयवदुत्तरेषु ।
१२ प्रकारे गुणवचनस्य ।
१३ अकृच्छे प्रियसुखयोरन्यतरस्याम् ।
१४ यथास्वे यथायथम् ।
१५ द्वन्द्व रहस्यमर्यादावचनव्युत्क्रमणयज्ञ-पात्रप्रयोगाऽभिव्यक्तिषु ।
१६ पदस्य ।
१७ पदात् ।
१८ अनुदात्तं सर्वमपादादौ ।
१९ आमन्त्रितस्य च ।
२० युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयो-र्वान्नावौ ॥ १ ॥
२१ बहुवचनस्य वस्नसौ ।
२२ तेमयावेकवचनस्य ।
२३ त्वामौ द्वितीयायाः ।
२४ न चवाहाहैवयुक्ते ।
२५ पश्यार्थैश्चाऽनालोचने ।
२६ सपूर्वायाः प्रथमाया विभाषा ।
२७ तिङो गोत्रादीनि कुत्सनाऽऽभीक्ष्णययोः ।
२८ तिङ्ङतिङः ।
२९ न लुट् ।
३० निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चणक-च्चिद्यत्रयुक्तम् ।
३१ नह प्रत्यारम्भे ।
३२ सत्यं प्रश्ने ।
३३ अङ्गाऽप्रातिलोम्ये ।
३४ हि च ।
३५ छन्दस्यनेकमपि साकाङ्क्षम् ।
३६ यावद्यथाभ्याम् ।

३७ पूजायां नाऽनन्तरम् ।
३८ उपसर्गव्यपेतं च ।
३९ तुपश्यपश्यताऽहैः पूजायाम् ।
४० अहो च ॥ २ ॥
४१ शेषे विभाषा ।
४२ पुरा च परीप्सायाम् ।
४३ नन्वित्यनुज्ञैषणायाम् ।
४४ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ।
४५ लोपे विभाषा ।
४६ एहिमन्ये प्रहासे लृट् ।
४७ जात्वपूर्वम ।
४८ किं वृत्तं च चिदुत्तरम् ।
४९ आहो उताहो चानन्तरम् ।
५० शेषे विभाषा ।
५१ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ।
५२ लोट् च ।
५३ विभाषितं सोपसर्गमनुत्तमम् ।
५४ हन्त च ।
५५ आम एकान्तरमामन्त्रितमनन्तिके ।
५६ यद्धितुपरं छन्दसि ।
५७ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ।
५८ चादिषु च ।
५९ चवायोगे प्रथमा ।
६० हेति क्षियायाम् ।
६१ अहेति विनियोगे च ।
६२ चाहलोप एवेत्यवधारणम् ।
६३ चादिलोपे विभाषा ।
६४ वै-वावेति चच्छन्दसि ।
६५ एकान्याभ्यां समर्थाभ्याम् ।
६६ यद्वृत्तान्नित्यम् ।
६७ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ।
६८ सगतिरपि तिङ् ।
६९ कुत्सने च सुप्यगोत्रादौ ।
७० गतिर्गतौ ।
७१ तिङि चोदात्तवति ।
७२ आमन्त्रितं पूर्वमविद्यमानवत् ।
७३ नामन्त्रिते समानाधिकरणे सामान्य-
वचनम् ।
७४ विभाषितं विशेषवचने बहुवचनम् ।

['सर्वस्य बहुवचनस्य शेषेऽहेति चतुर्दश']
इत्यष्टमाध्यायस्य प्रथमः पादः ।

अथ द्वितीयः पादः

१ पूर्वत्राऽसिद्धम् ।
२ नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।
३ न मु ने ।
४ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।
५ एकादेश उदात्तेनोदात्तः ।
६ स्वरितो वाऽनुदात्ते पदादौ ।
७ नलोपः प्रातिपदिकान्तस्य ।
८ न ङिसम्बुद्ध्योः ।
९ मात्पधायाश्च मतोर्वोऽयवादिभ्यः
१० झय. ।
११ संज्ञायाम् ।
१२ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रु-
मण्वच्चर्मण्वती ।
१३ उदन्वानुदधौ च ।
१४ राजन्वान् सौराज्ये ।
१५ छन्दसीरः ।
१६ अनो नुट् ।
१७ नाद् घस्य ।

१८ कृपो रो लः ।
१९ उपसर्गस्याऽयतौ ।
२० ग्रो यङि ॥ १ ॥
२१ अचि विभाषा ।
२२ परेश्च घाऽङ्कयोः ।
२३ संयोगान्तस्य लोपः ।
२४ रात्सस्य ।
२५ धि च ।
२६ झलो झलि ।
२७ ह्रस्वादङ्गत् ।
२८ इट ईटि ।
२९ स्कोः संयोगाद्योरन्ते च ।
३० चोः कुः ।
३१ हो ढः ।
३२ दादेर्धातोर्घः ।
३३ वा द्रुहमुहष्णुहष्णिहाम् ।
३४ नहो धः ।
३५ आहस्थः ।
३६ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ।
३७ एकाचो बशो भष् झषन्तस्य स्ध्वोः ।
३८ दधस्तथोश्च ।
३९ झलां जशोऽन्ते ।
४० झषस्तथोर्धोऽधः ॥ २ ॥
४१ षढोः कः सि ।
४२ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।
४३ संयोगादेरातो धातोर्यण्वतः ।
४४ ल्वादिभ्यः ।
४५ ओदितश्च ।
४६ क्षियो दीर्घात् ।
४७ श्योऽस्पर्शे ।
४८ अञ्चोऽनपादाने ।
४९ दिवोऽविजिगीषायाम् ।
५० निर्वाणोऽवाते ।
५१ शुषः कः ।
५२ पचो वः ।
५३ क्षायो मः ।
५४ प्रस्त्योऽन्तरस्याम् ।
५५ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ।
५६ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।
५७ न ध्याख्यापृमूर्च्छिमदाम् ।
५८ वित्तो भोगप्रत्यययोः ।
५९ भित्तं शकलम् ।
६० ऋणमाधमर्ण्ये ॥३॥
६१ नसत्तनिषत्ताऽनुत्तप्रपूर्तसूर्तगूर्तानि- च्छन्दसि ।
६२ किन्प्रत्ययस्य कुः ।
६३ नशेर्वा ।
६४ मो नो धातोः ।
६५ म्वोश्च ।
६६ ससजुषो रुः ।
६७ अवयाः श्वेतवाः पुरोडाश्च ।
६८ अहन् ।
६९ रोऽसुपि ।
७० अम्नरुधरवरित्युभयथा छन्दसि ।
७१ भुवश्च महाव्याहृतेः ।
७२ वसुस्रं सुध्वंस्वनडुहां दः ।
७३ तिप्यनस्तेः ।
७४ सिपि धातो रुर्वा ।
७५ दश्च ।
७६ र्वोरुपधाया दीर्घ इकः ।
७७ हलि च ।
७८ उपधायां च ।
७९ न भकुर्छुराम् ।
८० अदसोऽसेर्दादु दो मः ॥ ४ ॥
८१ एत ईद्बहुवचने ।

८२ वाक्यस्य टेः प्लुत उदात्तः ।
८३ प्रत्यभिवादेऽशूद्रे ।
८४ दूराद्धूते च ।
८५ है हे प्रयोगे हैहयोः ।
८६ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ।
८७ ओमभ्यादाने ।
८८ ये यज्ञकर्मणि ।
८९ प्रणवष्टेः ।
९० याज्यान्तः ।
९१ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ।
९२ अग्नीत्प्रेषणे परस्य च ।
९३ विभाषा पृष्टप्रतिवचने हेः ।
९४ निगृह्यानुयोगे च ।
९५ आम्रेडितं भर्त्सने ।
९६ अङ्गयुक्तं तिङाकाङ्क्षम् ।
९७ विचार्यमाणानाम् ।
९८ पूर्वं तु भाषायाम् ।
९९ प्रतिश्रवणे च ।
१०० अनुदात्तं प्रश्नान्ताऽभिपूजितयोः ॥४॥
१०१ चिदिति चोपमार्थे प्रयुज्यमाने ।
१०२ उपरि स्विदासीदिति च ।
१०३ स्वरितमाम्रेडितेऽसूयासंमतिकोप-
कुत्सनेषु ।
१०४ क्षियाशीः प्रैषेषु तिडाकाङ्क्षम् ।
१०५ अनन्त्यस्यापि प्रश्नाख्यानयोः ।
१०६ फ्लुतावैच इदुतौ ।
१०७ एचोऽप्रगृह्यस्यादूराद्धूतेपूर्वस्यार्ध-
स्यादुत्तरस्येदुतौ ।
१०८ तयोर्य्वावचि संहितायाम् ।
['पूर्वत्राचिषढोर्नसतै च]
[ई च्चिविदित्यष्टौ'] ॥

अथ तृतीयः पादः ।

१ मतुवसो रु सम्बुद्धौ छन्दसि ।
२ अत्रानुनासिकः पूर्वस्य तु वा ।
३ आतोऽटि नित्यम् ।
४ अनुनासिकात् परोऽनुस्वारः ।
५ समः सुटि ।
६ पुमः खय्यम्परे ।
७ नश्छव्यप्रशान् ।
८ उभयथर्क्षु ।
९ दीर्घादटि समानपादे ।
१० नृन्पे ।
११ स्वतवान्पायौ ।
१२ कानाम्रेडिते ।
१३ ढो ढे लोपः ।
१४ रो रि ।
१५ खरवसानोर्विसर्जनीयः ।
१६ रोः सुपि ।
१७ भोभगोअधोअपूर्वस्य योऽशि ।
१८ व्योर्लघुप्रयत्नतरः शाकटायनस्य ।
१९ लोपः शाकल्यस्य ।
२० ओतो गार्ग्यस्य ॥ १ ॥
२१ उञि च पदे ।
२२ हलि सर्वेषाम् ।
२३ मोऽनुस्वारः ।
२४ नश्चाऽपदान्तस्य झलि ।
२५ मो राजि समः क्वौ ।
२६ हे मपरे वा ।
२७ नपरे नः ।
२८ ङ्णोः कुक्टुक्शरि ।
२९ डः सि धुट् ।
३० नश्च ।
३१ शि तुक् ।
३२ ङमो ह्रस्वादचि ङमुण् नित्यम् ।
३३ मय उञो वो वा ।

३४ विसर्जनीयस्य सः ।
३५ शर्परि विसर्जनीयः ।
३६ वा शरि ।
३७ कुप्वोः क पौ च ।
३८ सोऽपदादौ ।
३९ इणः षः ।
४० नमस्पुरसोर्गत्योः ॥ २ ॥
४१ इदुदुपधस्य चाऽप्रत्ययस्य ।
४२ तिरसोऽन्यतरस्याम् ।
४३ द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ।
४४ इसुसोः सामर्थ्ये ।
४५ नित्यं समासेऽनुत्तरपदस्थस्य ।
४६ अतः कृकमिकंसकुम्भपात्रकुशाकर्णी-ष्वनव्ययस्य ।
४७ अधःशिरसी पदे ।
४८ कस्कादिषु च ।
४९ छन्दसि वाऽप्राम्रेडितयोः ।
५० कःकरत्करतिकृधिकृतेष्वनदितेः ।
५१ पञ्चम्याः परावध्यर्थे ।
५२ पातौ च बहुलम् ।
५३ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ।
५४ इडाया वा ।
५५ अपदान्तस्य मूर्धन्यः ।
५६ सहेः साढः सः ।
५७ इण्कोः ।
५८ नुम्विसर्जनीयशर्व्यवायेऽपि ।
५९ आदेशप्रत्यययोः ।
६० शासिवसिघसीनां च ॥ ३ ॥
६१ स्तौतिण्योरेव षण्यभ्यासात् ।
६२ सः स्विदिस्वदिसहीनां च ।
६३ प्राक्सितादड्व्यवायेऽपि ।
६४ स्थादिष्वभ्यासेन चाभ्यासस्य ।
६५ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तो-भतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ।
६६ सदिरप्रतेः ।
६७ स्तम्भेः ।
६८ अवाच्चालम्बनाऽऽविदूर्ययोः ।
६९ वेश्च स्वनो भोजने ।
७० परिनिविभ्यः सेवसितसयसिवुसहसु-ट्स्तुस्वञ्जाम् ।
७१ सिवादीनां वाऽड्व्यवायऽपि ।
७२ अनुविपर्यभिनिभ्यः स्यन्दतेर प्राणिषु ।
७३ वेः स्कन्देरनिष्ठायाम् ।
७४ परेश्च ।
७५ परिस्कन्दः प्राच्यभरतेषु ।
७६ स्फुरतिस्फुलत्योर्निर्निविभ्यः ।
७७ वेः स्कभ्नातेर्नित्यम् ।
७८ इणः षीध्वंलुङ्लिटां धोऽङ्गात् ।
७९ विभाषेटः ।
८० समासेऽङ्गुलेः सङ्गः ।
८१ भीरोः स्थानम् ।
८२ अग्नेः स्तुत्स्तोमसोमाः ।
८३ ज्योतिरायुषः स्तोमः ।
८४ मातृपितृभ्यां स्वसा ।
८५ मातुः पितृभ्यामन्यतरस्याम् ।
८६ अभिनिसः स्तनः शब्दसंज्ञायाम् ।
८७ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ।
८८ सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।
८९ निनदीभ्यां स्नातेः कौशले ।
९० सूत्रं प्रतिष्णातम् ।
९१ कपिष्ठलो गोत्रे ।
९२ प्रष्ठोऽग्रगामिनि ।
९३ वृक्षाऽऽसनयोर्विष्टरः ।
९४ छन्दोनाम्नि च ।
९५ गवियुधिभ्यां स्थिरः ।

९६ विकुशमिपरिभ्यः स्थलम् ।
९७ अम्बाम्बगोभूमिसव्यापद्वित्रि-
कुशेकुशङ्क्वङ्गुपुञ्जिपरमेबर्हिर्दिव्य-
ग्निभ्यः स्थः ।
९८ सुषामादिषु च ।
९९ एति संज्ञायामगात् ।
१०० नक्षत्राद्वा ॥ ५ ॥
१०१ ह्रस्वात्तादौ तद्धिते ।
१०२ निसस्तपतावनासेवने ।
१०३ युष्मत्तत्ततक्षुः ष्वन्तःपादम् ।
१०४ यजुष्येकेषाम् ।
१०५ स्तुतस्तोमयोश्छन्दसि ।
१०६ पूर्वपदात् ।
१०७ सुञः ।
१०८ सनोतेरनः ।
१०९ सहेः पृतनर्त्ताभ्यां च ।
११० न रपरसृपिसृजिस्पृशिस्पृहिसव-
नादीनाम् ।
१११ सात्पदाद्योः ।
११२ सिचो यङि ।
११३ सेधतेर्गतौ ।
११४ प्रतिस्तब्धनिस्तब्धौ च ।
११५ सोढः ।
११६ स्तुम्भुसिवुसहां चङि ।
११७ सुनोतेः स्यसनोः ।
११८ सदेः परस्य लिटि ।
११९ निव्यभिव्योऽड्व्यवाये वा छन्दसि ।
['मतुवसोरुञ्चि चेदुदुपधस्य स्तौतिण्यो-
र्भीरोर्ह्र स्वात्तादावेकोनविंशतिः'] ॥

इत्यष्टमाध्यायस्य तृतीयः पादः ।

अथ चतुर्थः पादः ।

१ रषाभ्यां नो णः समानपदे ।
२ अट्कुप्वाङ्नुम्व्यवायेऽपि ।
३ पूर्वपदात्सञ्ज्ञायामगः ।
४ वनं पुरगामिश्रकासिध्रकासारिका-
कोटराग्रेभ्यः ।
५ प्रनिरन्त-शरेक्षुप्लक्षाम्रकार्ष्यखदिर-
पीयूक्षाभ्योऽसंज्ञायामपि ।
६ विभाषौषधिवनस्पतिभ्यः ।
७ अह्नोऽदन्तात् ।
८ वाहनमाहितात् ।
९ पानं देशे ।
१० वा भावकरणयोः ।
११ प्रातिपदिकान्तनुम्विभक्तिषु च ।
१२ एकाजुत्तरपदे णः ।
१३ कुमति च ।
१४ उपसर्गादसमासेऽपि णोपदेशस्य ।
१५ हिनुमीना ।
१६ आनि लोट् ।
१७ नेर्गदनदपतपदघुमास्यतिहन्तियातिवा-
तिद्रातिप्सातिवपतिवहतिशाम्यतिचि-
नोतिदेग्धिषु च ।
१८ शेषे विभाषाऽकखादावषान्त उपदेशे ।
१९ अनितेः ।
२० अन्तः ॥ १ ॥
२१ उभौ साभ्यासस्य ।
२२ हन्तेरत्पूर्वस्य ।
२३ वमोर्वा ।
२४ अन्तरदेशे ।
२५ अयनं च ।
२६ छन्दस्यृदवग्रहात् ।
२७ नश्च धातुस्थोरुषुभ्यः ।
२८ उपसर्गादनोत्परः ।
२९ कृत्यचः ।
३० णेर्विभाषा ।
३१ हलश्चेजुपधात् ।

३२ इजादेः सनुमः ।
३३ वा निंसनिक्षनिन्दाम् ।
३४ न भाभूपूकमिगमिप्यायीवेपाम् ।
३५ षात्पदान्तात् ।
३६ नशेः षान्तस्य ।
३७ पदान्तस्य ।
३८ पदव्यवायेऽपि ।
३९ क्षुभ्नादिषु च ।
४० स्तोः श्चुना श्चुः ॥ २ ॥
४१ ष्टुना ष्टुः ।
४२ न पदान्ताट्टोरनाम् ।
४३ तोः षि ।
४४ शात् ।
४५ यरोऽनुनासिकेऽनुनासिको वा ।
४६ अचो रहाभ्यां द्वे ।
४७ अनचि च ।
४८ नादिन्याक्रोशे पुत्रस्य ।
४९ शरोऽचि ।
५० त्रिप्रभृतिषु शाकटायनस्य ।
५१ सर्वत्र शाकल्यस्य ।
५२ दीर्घादाचार्याणाम् ।
५३ झलां जश् झशि ।
५४ अभ्यासे चर्च ।
५५ खरि च ।
५६ वावसाने ।
५७ अणोऽप्रगृह्यस्याऽनुनासिकः ।
५८ अनुस्वारस्य ययि परसवर्णः ।
५९ वा पदान्तस्य ।
६० तोर्लि ॥ ३ ॥
६१ उदः स्थास्तम्भोः पूर्वस्य ।
६२ झयो होऽन्यतरस्याम् ।
६३ शश्छोऽटि ।
६४ हलो यमां यमि लोपः ।
६५ झरो झरि सवर्णे ।
६६ उदात्तादनुदात्तस्य स्वरितः ।
६७ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगाल-वानाम् ।
६८ अ अ । इति ।

['रषाभ्यामुभौ ष्टुना ष्टुरुदः स्थाऽष्टौ' ॥]

इत्यष्टमाध्यायस्य चतुर्थः पादः ।

(झ) "પ્રમાણગણના"

શ્રીમદ્-વલ્લભાચાર્યજીએ (સપરિકર) - વેદ-ગીતા-બ્રહ્મસૂત્ર-એ પ્રસ્થાનત્રયીના વિષયોની સ્વાભાવિક રીતે સ્પષ્ટતા કરતા **શ્રીમદ્‌ભાગવતને ચતુર્થ-પ્રસ્થાન** રૂપે સ્વીકાર્યું છે. વેદ (શ્રુતિ) અને બ્રહ્મસૂત્ર એક કોટિમાં છે, ગીતા અને ભાગવત બીજી કોટિમાં છે. ગીતાના સંક્ષિપ્ત-સિદ્ધાન્તોની સ્પષ્ટતા શ્રીભાગવતમાં વિસ્તૃત-રીતે લીલાઓમાં વણાઈ ગયેલી છે. ગીતાનો વિસ્તાર શ્રીભાગવત છે. સોપવીત દ્વિજોનો જ અધિકાર શ્રુતિ-સૂત્રમાં છે. ગીતા-ભાગવતમાં સૌનો અધિકાર છે. ઔપનિષજ્-જ્ઞાન અને શ્રીભાગવતજ્ઞાન ત્રૈવર્ણિકો માટે જ છે, સ્ત્રીશૂદ્રો માટે તે સિવાયનું છે. એક જ વેદ કર્મકાંડ અને જ્ઞાનકાંડ રૂપ છે. તે બંને કાંડનો અંગાગિ-ભાવ-સંબંધ છે. કર્મ અને જ્ઞાનના સમન્વય-રૂપે વચમાં ઉપાસનાકાંડ છે. ઉપાસના-કાંડમાં ભગવાનની વિભૂતિ રૂપે દેવતાઓની ઉપાસનાઓ છે. પૂર્વકાંડમાં દેવતા-પૂજન કર્માંગભૂત છે, કર્મ બ્રહ્મ રૂપ છે દેવતાઓ મંત્ર-રૂપા છે. ઉપાસનામાં દેવતાઓની પ્રીતિ માટે તેમને ઉદ્દેશીને મન્ત્ર-જપ-પૂજનાદિ થાય છે. દેવતાઓ દ્વારા ભગવાન્ જ ફલદાન કરે છે. આ સમજથી માહાત્મ્યજ્ઞાન દ્વારા ભક્તિથી ભગવજ્-જ્ઞાન સંભવે છે. કેવલ ફલાપેક્ષાથી અન્યદેવતાની ઉપાસનાથી તો અન્યાશ્રય-દોષ થાય છે. તે આવકાર્ય નથી. વેદોક્ત કર્મમાર્ગમાં તો કોઈ દેવનું પ્રાધાન્ય હોતું નથી, કર્મની જ મુખ્યતા હોય છે. આ કર્મ કરતાં તેના અંગભૂત દેવતાનું પૂજન થાય છે, અંગીભૂત કર્મ તો ભગવદ્રૂપ છે. આમ, કર્મમાર્ગમાં અન્ય દેવતાનું પ્રાધાન્ય ન હોવાથી, કર્મોના અધિષ્ઠાતા ભગવાન્ જ પૂજાતા હોવાથી, કર્મમાર્ગ ત્યાજ્ય નથી, પરંતુ ગુણદોષનો વિચાર કર્યા વગર, કેવલ પોતાના સ્વામી-પ્રભુની શાસ્ત્રરૂપ આજ્ઞાના પાલન માટે, ફલાશા વગર, નિત્ય-નૈમિત્તિકિ-કર્મનું અનુષ્ઠાન કરવું. તેમાં પણ કર્મને ભગવદ્રુપ જાણીને, તેમાં પૂજાતા દેવતાને પુરુષોત્તમાંશ જાણીને, કર્મ કરવાં. આમ, કર્મમાર્ગમાં અનન્યતા-ભંગ થતો ન હોવાથી કર્મ કરવાનું બાધક થતું નથી. કામ્ય-પ્રાયશ્ચિત-કર્મો કરવાં આવશ્યક નથી. વેદાન્તમાં જેવું બ્રહ્મ કહેલું છે, તેવું જ સ્વીકારાય છે. વેદાન્તના શબ્દ-અર્થમાં કાંઈ વધારો-ઘટાડો-ફેરફાર ન થાય, છે તેવું "શુદ્ધ" જ સ્વીકાર્ય છે. તેમાં વેદના અલૌકિક "શબ્દ" જ મુખ્ય-પ્રમાણ છે. તે

શબ્દને સાનુકૂલ-અવિરોધી - બધાં જ પ્રમાણો સ્વીકાર્ય છે, - **પ્રત્યક્ષ, અનુમાન, ઉપમાન, અનુપલબ્ધિ, અર્થાપત્તિ, સંભવ અને ઐતિહ્ય !** પ્રાકૃત્ત-ધર્મ-રહિત અને અપાકૃત-ધર્મ-સહિતનું સર્વધર્મવાળું બ્રહ્મ છે. બધા વિરુદ્ધધર્મો બ્રહ્મમાં વિરોધ વગર શોભે છે. વેદાન્તમાં બ્રહ્મવિદ્‌ને પર-પ્રાપ્તિ (બ્રહ્મ સાથે અભિલષિત સર્વકામોપોભોગ) એ મુખ્ય (પુષ્ટિ) ફલ છે, બ્રહ્મવિદ્‌નું બ્રહ્મરૂપ થવું, તે તો ગૌણ (મર્યાદા) ફલ છે. વેદાન્ત રુક્ષ-શુષ્ક-સાધુ-મહાત્માઓ-વિદ્વાનો માટે જ નથી, તે તો જીવનના યથાર્થ ફલ (પૂર્ણાનન્દના અનુભવ) ને શોધતા પ્રત્યેક ત્રૈવર્ણિક માટે છે. પ્રસન્ન ઉન્નત-સફલ-કૃતાર્થ-જીવનલાભ તેનાથી સંભવે છે. બ્રહ્મસૂત્રમાં વેદવ્યાસજી સ્પષ્ટ રીતે કર્મ-જ્ઞાન-ભક્તિનો સમન્વય દર્શાવે છે, - **"સર્વાપેક્ષા ચ યજ્ઞાદિશ્રુતેરશ્વવત્"** (૩-૪-૨૫) - યજ્ઞાતિ શ્રુતિમાં કહેલાં હોવાથી કર્મ-જ્ઞાન-ભક્તિ-સર્વની અપેક્ષા પુરુષોત્તમ-જ્ઞાનની ઉત્પત્તિમાં છે, ઘોડે બેસીને ગામ પહોંચાય, પછી કામ તો પગ-હાથ-વગેરેથી થાય, કામ કરવામાં જેમ સર્વનો ઉપયોગ છે, તેમ મુમુક્ષુ - ભક્તને માટે યજ્ઞ (કર્મ) - જ્ઞાન - ભક્તિનો જીવનમાં સમન્વય છે. **"ચ"** - કારથી પુષ્ટિમાં અંગીકૃત - જીવને કોઈ આવી અપેક્ષા રહેતી નથી, તેમ અર્થ (સમુચ્ચય) છે. આત્યન્તિક ભક્તિ કરનારને તો ભક્તિ વિના કાંઈ જ અપેક્ષિત નથી.

(ञ) સામાન્ય સંસ્કૃત બોલચાલના થોડાં વાક્યો :

वाक्यानि = વાક્યો

१ त्वं पठ = તું ભણ.
२ त्वं लिख = તું લખ.
३ त्वं पिब = તું પી.
४ त्वं पत्रं पठ = તું પત્ર વાંચ.
५ त्वं पत्रं लिख = તું પત્ર લખ.
६ त्वं दुग्धं पिब = તું દૂધ પી.
७ त्वम् एकं पत्रं पठ = તું એક પત્ર વાંચ.
८ त्वम् एकं पत्रं लिख = તું એક પત્ર લખ.
९ त्वं मधुरं दुग्धं पिब = તું મીઠું દૂધ પી.
१० तत्र क्रीड = ત્યાં રમ.

११ त्वम् अत्र खेल = તું અહીં રમ.
१२ कार्यं कुरु = કામ કર.
१३ आलस्यं मा कुरु = આળસ ન કર.
१४ तत्र शीघ्रं गच्छ = ત્યાં જલ્દી જા.
१५ अत्र आगच्छ = અહીં આવ.
१६ प्रथमं व्यायामं कुरु = પહેલાં વ્યાયામ કર.
१७ पश्चात् भोजनं कुरु = પછી ભોજન કર.
१८ मोदकं खाद = લાડુ ખા.
१९ ओदनम् अपि खाद = ભાત પણ ખા.
२० उद्यानं गच्छ = બગીચામાં જા.
२१ गृहं सत्वरम् आगच्छ = ઘેર જલ્દી આવ.
२२ दुर्बलं रक्ष = દુર્બળની રક્ષા કર.
२३ इदानीं मा धाव = અત્યારે ન દોડ.
२४ सत्यं वद = સાચું બોલ.
२५ यानं तत्र नय = ગાડી ત્યાં લઈ જા.
२६ भोजनम् आनय = ભોજન લઈ આવ.
२७ त्वं नृत्य = તું નાચ.
२८ पुरस्तात् चल = આગળ ચાલ.
२९ तत्र तिष्ठ = ત્યાં થોભ.
३० उपरि पश्य = ઉપર જો.

संस्कृत-सूक्तयः
(સંસ્કૃતની સૂક્તિઓ)

१. यथा कर्म तथा फलम् । અર્થ :- જેવું કામ તેવું ફળ.

२. आशा दुःखस्य कारणम् । અર્થ :- આશા દુઃખનું કારણ છે.

३. दूरतः पर्वताः रम्याः । અર્થ :- દૂરથી ડુંગર રમણીય લાગે છે.

४. गतस्य शोकः न कर्तव्यः । અર્થ :- ગએલાનો શોક ન કરવો જોઈએ.

५. शीलं परं भूषणम् । અર્થ :- ચરિત્ર શ્રેષ્ઠ આભૂષણ છે.

६. अतितृष्णा विनाशाय । અર્થ :- વધારે લોભ વિનાશનું કારણ છે.

૭. कायः कस्य न वल्लभः ? અર્થ :- શરીર કોને પ્રિય નથી ?

૮. मूर्खस्य नास्ति औषधम् । અર્થ :- મૂર્ખની કાંઈ જ દવા નથી.

૯. बलीयसी केवलम् ईश्वरेच्छा । અર્થ :- ફક્ત ઈશ્વરની ઈચ્છા બળવાન છે.

૧૦. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । અર્થ :- મા અને માતૃભૂમિ સ્વર્ગથી પણ શ્રેષ્ઠ છે.

૧૧. बालिका परमेश्वरम् अभ्यर्चति । અર્થ :- છોકરી ઈશ્વરની પૂજા કરે છે.

૧૨. अत्र स्थित्वा त्वं किमर्थमेव आक्रोशसि । અર્થ :- તુ અહીં બેસીને શા માટે આવી રીતે રડે છે.

૧૩. बालाः किमर्थं संक्रन्दन्ति तत्र । અર્થ :- છોકરીઓ ત્યાં શા માટે રડી રહી છે ?

૧૪. छात्राः विद्यालयस्य क्रीडाङ्गणे संक्रीडन्ति । અર્થ :- વિદ્યાર્થીઓ વિદ્યાલયના ક્રીડાંગણમાં ખુબ રમી રહ્યાં છે.

૧૫. राजा अमात्यविषये विचिकित्सते । અર્થ :- રાજા મંત્રીના વિષયમાં સંદેહ કરે છે.

संस्कृत लोकोक्तियाँ

૧. चेतः शुद्धौ स्वस्थताधिगमः । અર્થ - મન પ્રસન્ન રહેવાથી સ્વાસ્થ્ય ઠીક રહે છે.

૨. चन्दनतरुर्वासयति कुठारं स्वनिपातकम् । અર્થ - સજ્જન પોતાના શત્રુનું પણ ભલું કરે છે.

૩. चिरन्तनोपद्रवी न विरतो दृश्यते । અર્થ - પુરાણો પાપી પાપ કરવાનું ચુકતો નથી.

૪. छिद्रेष्वनर्थाः बहुली भवन्ति । અર્થ - દુઃખ આવે ત્યારે સામટું આવે છે.

૫. छलं छलानुबन्धि स्यात् । અર્થ - એક પાપ માટે બીજું પાપ કરવું પડે છે.

૬. गर्दभः पूर्वदेशीयः रेभते पश्चिमैः स्वरैः । અર્થ - ગધેડો છે પૂર્વનો, પણ સૂર છે પશ્ચિમનો.

૭. अये कथमनभ्रावृष्टिः । અર્થ - વાદળ વિના વર્ષા કેવી ?

૮. अन्धेनैव नीयमाना यथान्धाः । અર્થ - આંધળો આંધળા ને દોરે.

૯. अप्रतिषिद्धमनुमतं भवति । અર્થ - વિરોધ ન કરવો તે સ્વીકારનું ચિહ્ન છે.
૧૦. अंगीकृतं सुकृतिनो न परित्यजन्ति । અર્થ - સજ્જનો સ્વીકારેલો કામનો ત્યાગ કરતા નથી.
૧૧. अतिदीर्घोऽपि कर्णिकारो न मुसली । અર્થ - આંગળી સોજીને કદી થાંભલો ન થાય.
૧૨. अल्पेन सिद्धे महति न यत्नमनुतिष्ठति । અર્થ - જો થોડી મહેનતથી કામ થાય તો વધુ મહેનત કોણ કરે ?
૧૩. अवयवशक्तेः समुदायशक्तिर्बलीयसी । અર્થ - અવયવોની શક્તિથી સમૂહશક્તિ ચઢિયાતી છે.
૧૪. अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने । અર્થ - ઘર માંડવાને હું અશક્તિમાન છું અને ઘર ભાંગવામાં હું તૈયાર છું.
૧૫. अर्थो हि लोकेषु बन्धुः । અર્થ - પૈસો બીજો ભાઈ.
૧૬. अग्निर्हिमस्य भेषजम् । અર્થ - ઠંડીનો ઉપચાર અગ્નિ છે.
૧૭. अयमपरो गण्डस्योपरि स्फोटः । અર્થ - પડ્યા પર પાટું.
૧૮. अजा सिंहप्रसादेन वने चरति निर्भयम् । અર્થ - બકરી સિંહની કૃપાથી પણ જંગલમાં નિર્ભયતાથી ચરી શકે છે.
૧૯. अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति । અર્થ - વિમાર્ગે ચાલતાનો સ્વજનો પણ ત્યાગ કરે.
૨૦. अम्बुनो बिन्दुरल्पोऽपि शुक्तौ मुक्ताफलं भवेत् । અર્થ - જલ બિંદુ એક પણ છીપમાં (વર્ષા કાળમાં) પડે તો મોતી બને છે.
૨૧. न क्वापि सरलेन पदं निधीयते । અર્થ - સીધી આંગળીથી ઘી નીકળતું નથી.
૨૨. न निश्चितार्थाद्विरमन्ति धीराः । અર્થ - ધીર માનવી પોતાના નિશ્ચયમાંથી ચલિત થતો નથી.
૨૩. नास्ति गतिश्रमो यानवताम् । અર્થ :- જેને ઘેર વાહન હોય છે તેને ચાલવાની તકલીફ નથી લેવી પડતી.
૨૪. नास्त्यर्थिनो गौरवम् । અર્થ :- ભિક્ષુકને મોટાપણું કદી મળતું નથી.
૨૫. निम्बफलानि काकैर्भुज्यन्ते । અર્થ :- કડવા લીમડાનાં ફળ કાગડો જ ખાય.

૨૬. न समुद्रतलमस्पृष्ट्वा नरो विन्दति मौक्तिकम् । અર્થ :- સમુદ્રના તળિયાનો સ્પર્શ કર્યા વગર મોતી નથી મળતાં.

૨૭. न चागतं सुखं त्यजेत् । અર્થ :- આવેલા સુખનો ત્યાગ ન કરો.

૨૮. न दुर्जनो जातु जहाति दुर्गुणम् । અર્થ :- દુર્જનો દુર્ગુણ કદી છોડતા નથી.

૨૯. गुणैर्विहीनाः बहु जल्पन्ति । અર્થ :- નગુણી માણસો ખૂબ બકબક કરે છે.

૩૦. गतानुगतिको लोकः । અર્થ :- લોકો એક બીજાનું અનુકરણ કરે છે.

૩૧. गते शोको न कतर्व्यः । અર્થ :- જે થઈ ગયું તે થઈ ગયું, હવે એનો શોક કરવો નકામો છે.

૩૨. गुणी गुणं वेत्ति न वेत्ति निर्गुणः ।અર્થ :- હીરાનો પારખુ ઝવેરી જ હોય.

૩૩. गतः कालो न पुनरुपैति । અર્થ :- ગયેલો સમય પાછો નથી આવતો.

૩૪. गतं दुःखं सुखञ्च तत् । અર્થ :- સુખ દુઃખ તો ચાલુ રહે છે.

૩૫. गर्वात् शीलं महत् । અર્થ :- ઘમંડ કરતાં નમ્રતા મોટી છે.

૩૬. घटे रिक्ते ध्वनिर्महान् । અર્થ :- ખાલી ચણો વાગે ઘણો.

૩૭. चकास्ति योग्येन हि योग्यसंगमः । અર્થ :- યોગ્ય જોડે યોગ્યનો સંબંધ જ શોભે છે.

૩૮. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च । અર્થ :- ચાર દિવસની ચાંદની પછી અંધારી રાત જ આવે છે.

૩૯. चिरादपि वरं शिक्षा । અર્થ :- ઘડપણમાં પણ ભણવું સારું છે.

૪૦. चक्रः कन्दत्यतैलकम् । અર્થ :- સુકું પૈડું ખૂબ અવાજ કરે છે.

સુભાષિતો

सुभाषितानि [कण्ठस्थीकरणार्थम्]

यस्मिन् देशे न सम्मानो न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चित् न तत्र दिवसं वसेत् ॥१॥

અર્થ :- જે દેશમાં સન્માન ન હોય, પ્રેમ ન હોય, સંબંધી ન હોય અને જ્યાં કોઈ વિદ્યા પ્રાપ્ત ન થાય ત્યાં એક દિવસેય ન રહેવું.

अश्वं नैव गजं नैव, व्याघ्रं नैव च नैव च ।

अजापुत्रं बलिं दद्यात्, देवो दुर्बलघातकः ॥२॥

અર્થ :- ઘોડાનું બલિ દેવાનું નથી, હાથીનું પણ બલિ દેવાનું નથી, વાઘનું તો કોઈ પણ વખત બલિ દેવાનું નથી; ફક્ત બકરાનું જ બલિ દેવાય છે, કારણ કે દેવ પણ નિર્બલના જ ઘાતક હોય છે.

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ॥३॥

અર્થ :- જે ઉદાર છે તેને માટે ધન તૃણ સમાન છે, જે વીર છે તેને માટે મૃત્યુ તુચ્છ છે, જે રાગહીન (વૈરાગી) છે તેને માટે સ્ત્રી તુચ્છ છે અને જે લોભહીન છે તેમને માટે સકળ વિશ્વ તૃણ સમાન છે.

जननी जन्मभूमिश्च जान्हवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥४॥

અર્થ :- માતા, માતૃભૂમિ, ગંગા, ભગવાન શ્રીકૃષ્ણ અને પિતા-આ પાંચ વસ્તુઓ સંસારમાં મુશ્કેલીથી મળે છે.

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्वत्र चन्दनं न वने वने ॥५॥

અર્થ :- માણેક આદિ રત્ન દરેક પર્વત ઉપર હોતાં નથી, દરેક હાથીના મસ્તકમાં મોતી હોતાં નથી, દરેક જંગલમાં ચંદન વૃક્ષ હોતાં નથી, આ જ રીતે સજ્જન પણ બધાં સ્થાનોમાં હોતા નથી.

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥६॥

અર્થ :- રાત્રે ચંદ્રમાં દીવાનું કામ કરે છે, સૂર્ય પ્રભાતમાં દીવાનું કામ કરે છે, ધર્મ ત્રણે લોકમાં દીવાનું કામ કરે છે અને સુપુત્ર પોતાના કુલમાં દીવાનું કામ કરે છે.

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥७॥

અર્થ :- જેની પાસે વિદ્યા નથી, તપ નથી, દાનવૃત્તિ નથી, જ્ઞાન નથી, સદાચાર નથી, કોઈ ગુણ નથી અને કોઈ ધર્મ નથી તે પૃથ્વી પર ભાર રૂપ પશુઓ જ છે, આ મૃત્યુલોકમાં મનુષ્યનું રૂપમાત્ર ધારણ કરીને

ફરે છે.

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ।।८।।

અર્થ :- જેની પાસે ધન છે તે મનુષ્ય કુલીન છે. જેની પાસે ધન છે તે જ પંડિત, જ્ઞાની અને ગુણજ્ઞ છે. તે જ વક્તા અને દેખાવડો છે. કારણ કે બધા ગુણો સોના (ધન)માં રહે છે.

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, परोपकाराय सतां विभूतयः ।।९।।

અર્થ :- વૃક્ષો પરોપકારને માટે ફળ આપે છે, નદીઓ પરોપકારને માટે વહે છે; ગાયો પરોપકારને માટે દૂધ આપે છે આવી જ રીતે સજ્જનોની સંપત્તિઓ પણ પરોપકારના કામમાં આવે છે.

वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम् ।
वृथा दानं समर्थस्य वृथा दीपो दीवाऽपि च ।।१०।।

અર્થ :- સમુદ્રમાં વૃષ્ટિ વ્યર્થ છે, જેનું પેટ ભરેલું છે તેને ભોજન વ્યર્થ છે. જે સંપત્તિવાળો છે તેને દાન દેવું વ્યર્થ છે અને દિવસે દીવો કરવો વ્યર્થ છે.

उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः ।।११।।

અર્થ :- કેવળ ઈચ્છાઓથી કામ પાર પાડતાં નથી, ઉદ્યમથી જ તે પાર પડે છે. સૂતેલા સિંહના મોઢામાં પશુઓ જાતે જ પેસતાં નથી.

उद्यमः साहसं धैर्यं, बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते, तत्र दैवं सहायकृत् ।।१२।।

અર્થ :- ઉદ્યમ; સાહસ, ધૈર્ય, બુદ્ધિ શક્તિ અને પરાક્રમ જ્યાં હોય ત્યાં જ દૈવ પણ મદદ કરે છે.

अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रम्, अमित्रस्य कुतः सुखम् ।।१३।।

અર્થ :- આળસુને વિદ્યા ક્યાંથી ? વિદ્યાવગરનાને ધન ક્યાંથી નિર્ધનને મિત્ર ક્યાંથી ? ને મિત્ર વગરનાને સુખ ક્યાંથી હોય ?

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव, देव ॥१४॥

અર્થ :- હે દેવ ! તું જ મારી મા, તું જ મારો પિતા, તું જ બન્ધું, તું જ મિત્ર, તું જ ધન અને તું જ સર્વસ્વ છે.

आचारः परमो धर्मः, आचारः परमं तपः ।
आचारः परमं ज्ञानम्, आचारात् किं न साध्यते ॥१५॥

અર્થ :- સદાચાર ઉત્તમ ધર્મ છે, સદાચાર શ્રેષ્ઠ તપ છે, સદાચાર ઉત્કૃષ્ટ જ્ઞાન છે, સદાચારથી શું નથી સિદ્ધ કરી શકાતું ?

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥१६॥

અર્થ :- વિદ્વત્તા અને રાજાપણું ક્યારેય સમાન નથી; કેમકે રાજા તો પોતાના દેશમાં સન્માન પામે છે; પરન્તુ વિદ્વાન તો બધે જ સન્માન પામે છે.

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥१७॥

અર્થ :- માણસને વિદ્યા નમ્રતા આપે છે, નમ્રતાથી તે યોગ્ય બને છે, યોગ્યતાથી ધન મેળવે છે, તેનાથી સુખ મળે છે.

सुखमापतितं सेव्यं दुःखमापतितं तथा ।
चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥१८॥

અર્થ :- આવેલાં સુખનું સેવન કરવું જોઈએ, એવી જ રીતે આવેલાં દુઃખનું પણ સેવન કરવું જોઈએ; કેમકે સુખ અને દુઃખ તો પૈડાંની માફક ફર્યા કરે છે.

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥१९॥

અર્થ :- આ મારું છે અથવા બીજાનું છે, એવા વિચારો નાના મનવાળાના હોય છે; પરંતુ જે ઉદારચરિત્રના છે તેમના માટે તો બધી પૃથ્વી જ પરિવાર છે.

सुन्दरोऽपि सुशीलोऽपि कुलीनोऽपि महाधनः ।
शोभते न विना विद्यां विद्या सर्वस्य भूषणम् ॥२०॥

અર્થ :- સુંદર હોવા છતાં પણ સુશીલ હોવા છતાં પણ, કુલીન હોવા છતાં પણ અને બહુ ધનવાન હોવા છતાં પણ કોઈ વિદ્યા વિના શોભતો નથી; કેમ કે વિદ્યા જ બધાનું ભૂષણ છે.

चिन्तनीया हि विपदामादौ एव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥२१॥

અર્થ :- વિપત્તિઓનો પ્રતિકાર પહેલાંથી જ માણસે વિચારી લેવો જોઈએ, જ્યારે ઘરમાં આગ લાગે ત્યારે કૂવો ખોદવો ઠીક નથી.

गौरवं लभ्यते दानान्न तु वित्तस्य संचयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ॥२२॥

અર્થ :- ધનના દાનથી ગૌરવ પ્રાપ્ત થાય છે, ન કે તેના સંચયથી (જેમ) વાદળોની સ્થિતિ ઉપર હોય છે; (કેમકે તે જળનું દાન કરે છે-સંગ્રહ નહિ) અને સમુદ્રની સ્થિતિ નીચે હોય છે; (કેમકે તે જળનો સંગ્રહ કરે છે-દાન નહિ.)

नास्ति लोभसमो व्याधिः नास्ति क्रोधसमो रिपुः ।
नास्ति दारिद्र्यवद् दुःखं नास्ति ज्ञानात् परं सुखम् ॥२३॥

અર્થ :- લોભ જેવી બિમારી નથી, ક્રોધ જેવો શત્રુ નથી, ગરીબી જેવું દુઃખ નથી અને જ્ઞાનથી શ્રેષ્ઠ સુખ નથી.

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते,
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैः मुनिवराः क्षपयन्ति कालं,
सन्तोष एव पुरुषस्य परं निधानम् ॥२४॥

અર્થ :- સાપ વાયુ પીને રહે છે છતાં તે દુર્બળ હોતા નથી. વનના હાથીઓ સુકાં ઘાસ ખાવા છતાંય બળવાન હોય છે. મુનિઓ કંદમૂળ ખાઈનેય સમય વિતાવે છે. (વાસ્તવમાં) માણસની ખરી સંપત્તિ સંતોષ જ છે.

॥ श्रीहरिः ॥

(४) अमरकोशः ।

अथ प्रथमं काण्डम् ।

परिभाषाप्रकरणम्

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुसाशनम् ॥ २ ॥

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्रं भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थे त्वन्ताथादि न पूर्वभाक् ॥ ५ ॥

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ ६ ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपवार्णः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥

आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥

बर्हिमुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

आदित्यविश्ववसवस्तुषिता भास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वाकिन्नराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ११ ॥

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥ १३ ॥

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥ १४ ॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥

ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १६ ॥

धाताऽब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्त्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥ १७ ॥

[नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः] ॥१८ ॥

विष्णुनारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १९ ॥

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ २० ॥

उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २१ ॥

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २२ ॥

विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।
[पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ॥ २३ ॥

जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः ।]
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २४ ॥

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥ २५ ॥

नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
सङ्कर्षणः सीरपाणिः कालिन्दी भेदनो बलः ॥ २६ ॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥ २७ ॥

शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २८ ॥

ब्रह्मसूर्ऋष्यकेतुः स्यादनिरुद्ध उषापतिः ।
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २९ ॥

इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
[भार्गवी लोकजननी क्षीरसागरकन्यका] ॥ ३० ॥

शङ्खो-लक्ष्मीपतेः- 'पाञ्चजन्य' श्चक्रं 'सुदर्शनम्' ।
'कौमोदकी' गदा, खड्गो 'नन्दकः 'कौस्तुभो' मणिः ॥३१॥

'चापः शार्ङ्ग' मुरारेस्तु 'श्रीवत्सो' लाञ्छनं स्मृतम् ।
[अश्वाश्च शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ ३२ ॥

[सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः] ।
गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥ ३३ ॥

नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।
शंभुरीशः पशुपतिः शिवः शूली महेश्वरः ॥ ३४ ॥

ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ।
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ॥ ३५ ॥

मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ।
उग्रः कपर्दीश्रीकण्ठः शितिकण्ठःकपालभृत् ॥ ३६ ॥

वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ॥ ३७ ॥

हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥ ३८ ॥

व्योमकेशोभवो भीमः स्थाणू रुद्र उमापतिः ।
[अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः] ॥ ३९ ॥

कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः ।
प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥ ४० ॥

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।
उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ४१ ॥

शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥ ४२ ॥

(आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।)
विनायको विघ्नराजद्वैमातुरगणाधिपाः ॥ ४३ ॥

अप्येकदन्तहेरम्ब-लम्बोदर-गजाननः ।
कार्तिकेयो महासेनः शरजन्मा षडाननः ॥ ४४ ॥

पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ॥ ४५ ॥

षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।
शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः ॥ ४६ ॥

[कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका]
इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ॥ ४७ ॥

वृद्धश्रवाः शुनासीरः पुरहूतः पुरंदरः ।
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ॥ ४८ ॥

सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ।
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥ ४९ ॥

जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥ ५० ॥

आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया ।
पुलोमजा शचीन्द्राणी नगरी त्वमरावती ॥ ५१ ॥

हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ।
स्यात्प्रासादो बैजयन्तो जयन्तःपाकशासनिः ॥ ५२ ॥

ऐरावतोऽभ्रमातङ्गैरावणऽभ्रमुवल्लभाः ।
ह्रादिनी बज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ॥ ५३ ॥

शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ।
व्योमयानं विमानोऽस्त्रीनारदाद्याः सुरर्षयः ॥ ५४ ॥

स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ।
मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ॥ ५५ ॥

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ।
पञ्चैते देवतरवो मन्दारः पारिजातकः ॥ ५६ ॥

संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।
सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ॥ ५७ ॥

नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।
स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ॥ ५८ ॥

हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसः ।
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥ ५९ ॥

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ।
बर्हिः शुष्मा कृष्णवर्त्माशोचिष्केश उषर्बुधः ॥ ६० ॥

आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥ ६१ ॥

हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ।
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥ ६२ ॥

शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ।
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ॥ ६३ ॥

त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ।
[उल्का स्यान्निर्गतज्वाला भूतिर्भसितभस्मनी ॥ ६४ ॥

क्षारो रक्षा व दावस्तु दवो वनहुताशनः]
धर्मराजः पितृपतिः समवर्ती परेतराट् ॥ ६५ ॥

कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ।
कालो दण्डधरः श्राद्धदेवोवैवस्वतोऽन्तकः ॥ ६६ ॥

राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ।

रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ॥ ६७ ॥

यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ।
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ॥ ६८ ॥

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।
पृषदश्वो गन्धवाहो गन्धवाहानिलाशुगाः ॥ ६९ ॥

समीर-मारुत-मरुज्जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥ ७० ॥

प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः ।
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥ ७१ ॥

शरीरस्था इमे रंहस्तरसी तु रयः स्यदः ।
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ७२ ॥

सत्वरं चपलं तूर्ण मविलम्बितमाशु च ।
सतता नारताश्रान्तसन्ततविरतानिशम् ॥ ७३ ॥

नित्याऽनवरताजस्त्रमप्यथातिशयो भरः ।
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ७४ ॥

तीव्रैकान्तनितान्तानि गाढबाढदृढानि च ।
क्लीवे शीघ्रद्यसत्त्वेस्यात्त्रिष्वेषां सत्त्वगामि यत् ॥ ७५ ॥

कुबेरत्र्यम्बकसखो यज्ञराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ७६ ॥

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ ७७ ॥

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकुँवरः ।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् ॥ ७८ ॥

स्थात्किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः ।
निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः ॥ ७९ ॥

इति स्वर्गवर्गः ।

अथ व्योमवर्गः २

द्यौदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तिरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ ८० ॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।
विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ॥ ८१ ॥

[तारापथोऽन्तिरिक्षं च मेघाध्वा च महाबिलम्] ।

इति व्योमवर्गः ।

अथ दिग्वर्गः ३

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ॥ ८२ ॥
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ।
उत्तरा दिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भवे ॥ ८३ ॥

[अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ।
प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु] ॥ ८४ ॥

इन्द्रो बह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ ८५ ॥

[रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ।
बुधो वृहस्पतिश्चेति दिशां चैव तथा ग्रहाः] ॥ ८६ ॥

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ ८७ ॥

करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ।
ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥ ८८ ॥

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ।
अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ॥ ८९ ॥

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।

धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ॥ ९० ॥

घन-जीमूत-मुदिरं जलमुग् धूमयोनयः ।
कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ॥ ९१ ॥

स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ।
शम्पाशतह्रादिन्यैरावत्यः क्षणप्रभा ॥ ९२ ॥

तडित्सौदामनी विद्युच्चञ्चला चपला अपि ।
स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः ॥ ९३ ॥

इन्द्रायुधं शक्रधनुस्तदेव ऋजुरोहितम् ।
वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥ ९४ ॥

धारासंपात आसारः शीकरोऽम्बुकणाः स्मृताः ।
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ॥ ९५ ॥

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।
अपिधानतिरोधानपिधानाच्छादनानि च ॥९६ ॥

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
बिधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥ ९७ ॥

अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥ ९८ ॥

कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु ।
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके ॥ ९९ ॥

चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ।
कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ॥ १०० ॥

सुषमा परमाशोभा शोभो कान्तिर्द्युतिश्छविः ।
अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥ १०१ ॥

प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ।

शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः ॥ १०२ ॥

तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ।
ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसंभवः ॥ १०३ ॥

मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ।
नक्षत्रमृक्षं भं तारा तारकाऽप्युडुः वा स्त्रियाम् ॥ १०४ ॥

दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी ।
राधा विशाखा पुष्ये तु सिद्ध्यतिष्यौ श्रविष्ठया ॥ १०५ ॥

सभा धनिष्ठा स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियः ।
मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ॥ १०६ ॥

इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ।
बृहस्पतिः सुराचार्योगीष्पतिर्धिषणो गुरुः ॥ १०७ ॥

जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ।
शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ॥ १०८ ॥

अङ्गारकः कुजो भौमो लोहिताङ्को महीसुतः ।
रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ ॥ १०९ ॥

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ।
सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ॥ ११० ॥

राशीनामुदयो लग्नं ते तु मेषवृषादयः ।
सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ॥ १११ ॥

भास्कराहस्करब्रध्नप्रभाकरविभाकराः ।
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ॥ ११२ ॥

विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ।
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥ ११३ ॥

विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ।
भानुर्हंसः सहस्त्रांशुस्तपनः सविता रविः ॥ ११४ ॥

[पद्माक्षस्तेजसां राशिश्छायानाथस्तमिस्रहा ।
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥ ११५ ॥

प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ।
इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः] ॥ ११६ ॥

माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः ।
सूरसूतोऽरुणोऽनूरः काश्यपिर्गरुडाग्रजः ॥ ११७ ॥

परिवेशस्तु परिधि रुपसूर्यकमण्डले ।
किरणोऽस्त्रमयूरखांशुगमस्तिघृणिरश्मयः ॥ ११८ ॥

भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ।
स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ॥ ११९ ॥

रोचिः शोचिरुमे क्लीवे प्रकाशो द्योत आतपः ।
कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ॥ १२० ॥

तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ।

इति दिग्वर्गः ।

अथ कालवर्ग

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ॥ १२१ ॥

प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ।
घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ॥ १२२ ॥

प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि ।
[व्युष्टं विभातं द्वे क्लीवे पुंसि गोसर्ग ईष्यते] ॥ १२३ ॥

प्रभातं च दिनान्ते तु सायं संध्या पितृप्रसूः ।
प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथ शर्बरी ॥ १२४ ॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ १२५ ॥

तमिस्रा तामसी रात्रिर्ज्योत्स्नी चन्द्रिकयाऽन्विता ।
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ १२६ ॥

गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम् ।
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ॥ १२७ ॥

स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ॥ १२८ ॥

कलाहीने सानुमतिः पूर्णे राका निशाकरे ।
अमावस्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥ १२९ ॥

सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ।
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ १३० ॥

सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ।
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ॥ १३१ ॥

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ॥ १३२ ॥

ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च ।
पक्षौ पूर्वापरौशुक्लकृष्णौ मासस्तु तावुभौ ॥ १३३ ॥

द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥ १३४ ॥

समरात्रिंदिवे काले विषुवद्विषुवं च तत् ।
[पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ॥ १३५ ॥

नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे] ।
मार्गशीर्षे सहा मार्ग आग्रहायणिश्च सः ॥ १३६ ॥

पौषे तैषसहस्यौ द्वौ तपा माघेऽथ फाल्गुने ।
स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ॥ १३७ ॥

वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयम् ।
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥ १३८ ॥

स्युनभस्यः प्रौष्ठपदभाद्रभाद्रपदाः समाः ।
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु कार्तिके ॥ १३९ ॥

बाहुलोर्जौ कार्तिकिकौ हेमन्तः शिशिरोऽस्त्रियाम् ।
वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ॥ १४० ॥

निदाघ उष्णोपगम उष्ण उष्मागमस्तपः ।
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् ॥ १४१ ॥

षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।
संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ॥ १४२ ॥

मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ।
दैवे युगसहस्रे द्वे ब्राह्मौ कल्पौ तु तौ नृणाम् ॥ १४३ ॥

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ १४४ ॥

अस्त्री पङ्कं पुमान्पाप्मा पापं किल्विषकल्मषम् ।
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥ १४५ ॥

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।
मुत्प्रीतिः प्रमदो हर्षः प्रमोदाऽऽमोदसंमदाः ॥ १४६ ॥

स्यादानन्दथुरानन्दः शर्मशातसुखानि च ।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ १४७ ॥

भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ १४८ ॥

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमूत्यमूः शुभावहो विधिः ॥ १४९ ॥

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।
हेतुर्ना कारणं बीजं निदानं त्वादिकारणम् ॥ १५० ॥

क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ।
विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः ॥ १५१ ॥

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ १५२ ॥

जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ।
चित्त तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ १५३ ॥

इति कालवर्गः ।

अथ धीवर्गः ५

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १५४ ॥

धीर्धारणावती मेधा संकल्पः कर्म मानसम् ।
[अवधानं समाधानं प्रणिधानं तथैव च] ॥ १५५ ॥

चित्ताभोगो मनस्कारश्चर्या संख्या विचारणा ।
[विमर्शो भावना चैव वासना च निगद्यते] ॥ १५६ ॥

अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥ १५७ ॥

मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिभ्रमः ॥ १५८ ॥

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ १५९ ॥

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानशिल्पशास्त्रयोः ।

मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ १६० ॥

मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ।
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ १६१ ॥

गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ॥ १६२ ॥

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ।
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥ १६३ ॥

विमर्दोत्थे परिमलो गन्धे जमननोहरे ।
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् ॥ १६४ ॥

समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥ १६५ ॥

पूतिगन्धिस्तु दुर्गन्धो विस्त्रं स्यादाभगन्धि यत् ।
शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डुराः ॥ १६६ ॥

अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥ १६७ ॥

कृष्णे नीलासितश्यामकालश्याममेचकाः ।
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ॥ १६८ ॥

लोहितो रोहितो रक्तः शोणः कोकनदच्छ्बिः ।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥ १६९ ॥

श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्गशिङ्कौ कद्रुपिङ्गलौ ॥ १७० ॥

चित्रं किर्मीरकल्माषशक्लैताश्च कर्बुरे ।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥ १७१ ॥

इति धीवर्गः ।

अथ शब्दादिवर्गः ६

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १७२ ॥

अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ १७३ ॥

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ १७४ ॥

शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ ।
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ १७५ ॥

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ १७६ ॥

प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ।
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥ १७७ ॥

समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।
वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ १७८ ॥

आख्याह्वे अभिधानं च नामधेयं च नाम च ।
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ १७९ ॥

विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।
उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ १८० ॥

प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥ १८१ ॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ।
यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ १८२ ॥

आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १८३ ॥

अवर्णाक्षेप निर्वाद परीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १८४ ॥

पारुष्यातवदिः स्याद्भर्सनं त्वपकरगीः ।
यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ १८५ ॥

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥ १८६ ॥

अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ॥ १८७ ॥

सुप्रलापः सुवचनमपलापस्तु निह्नवः ।
[चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा ॥ १८८ ॥

अस्त्री चाटुचटु श्लाघा प्रेम्णा मिथ्याविकत्थनम्]
संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ॥ १८९ ॥

रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ।
अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम् ॥ १९० ॥

निष्ठुरं परुषं ग्राम्यश्लीलं सूनृतं प्रिये ।
सत्येऽथ सकुलक्लिष्टे परस्परपराहते ॥ १९१ ॥

लुप्तवर्णपदम् अस्तं निरस्तं त्वरितोदितम् ।
अम्बूकृतं सनिष्ठीवमवद्धं स्यादनर्थकम् ॥ १९२ ॥

अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।
[सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ॥ १९३ ॥

श्राव्यं हृद्यं मनोहारि पिस्पष्टं प्रकटोदिम्]
अथ म्लिष्टमविष्पष्टं वितथं त्वनृत वचः ॥ १९४ ॥

सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

शब्दे निनादनिनदध्वनिध्वनारवस्वनाः ॥ १९५ ॥

स्वाननिघोषनिर्ह्रादनादनिस्वाननिःस्वनाः ।
आरवारावसंरावविरावा अथ मर्मरः ॥ १९६ ॥

स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ।
निक्वाणो निक्वणः क्वाणः क्वर्णः क्वणनमित्यपि ॥१९७॥

वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ।
कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ॥ १९८ ॥

स्त्री प्रतिश्रुत्प्रतिध्वाने गीतं गानमिमे समे ।

इति शब्दादिवर्गः ।

अथ नाट्यवर्गः ७

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ २०० ॥

काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ॥ २०१ ॥

[नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते] ॥ २०२ ॥

समन्वितलयस्त्वेकतालो वीणां तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ २०३ ॥

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं धनम् ॥ २०४ ॥

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ॥ २०५ ॥

स्याद्यशः पेटहो ढक्का भेर्यामानक दुन्दुभी ।

आनकः पटहोऽस्त्री स्यात्कोणो वीणादिवादनम् ॥ २०६ ॥

वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥ २०७ ॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ॥ २०८ ॥

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।
तालः कालक्रियामाननं लयः साम्यमथास्त्रियम् ॥ २०९ ॥

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम् ।
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ २१० ॥

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तके ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ॥ २११ ॥

भगिनीपतिरावुत्तो भावो विद्वानथाबुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ॥ २१२ ॥

राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ॥ २१३ ॥

अब्रह्मण्यमवध्योक्तौ राजशालस्तु राष्ट्रियः ।
अम्बा माताऽथ वाला स्याद्वासूरार्यस्तु मारिषः ॥ २१४ ॥

अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ।
हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ॥ २१५ ॥

अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्विके ॥ २१६ ॥

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ २१७ ॥

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।

कृपा दयाऽनुकम्पा स्यादस्क्रोशोऽप्यथो हसः ।
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ॥ २१८ ॥

विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ।
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥ २१९ ॥

भयंकरं प्रतिभयं रोद्रं तूग्रममी त्रिषु ।
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ॥ २२० ॥

विकारो मानसो भावोऽनुभावो भावबोधकः ।
गर्वोऽभिमानोऽहङ्कारोमानश्चित्तसमुन्नतिः ॥ २२१ ॥

[दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः] ।
अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२२ ॥

रीढावमानना-वज्ञावहेलनमसूर्क्षणम् ।
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यतः ॥

क्षान्तिस्तितिक्षाऽभिध्या तु परस्य विषये स्पृहा ।
अक्षान्तिरीर्ष्याऽसूया तु दोषारोपो गुणेष्वपि ॥ २२३ ॥

वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।
पश्चात्तापोऽनुताश्च विप्रतीसार इत्यपि ॥ २२५ ॥

कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ।
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ॥ २२६ ॥

प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम् ।
इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ॥ २२७ ॥

कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ।
उपाधिर्ना धर्मचिन्ता पुंसाधिर्मानसी व्यथा ॥ २२८ ॥

स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ।
उत्साहोऽध्यवसायः स्यात्सवीर्यमतिशक्तिभाक् ॥ २२९ ॥

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ॥ २३० ॥

कौतुहलं कौतुकं च कुतुकं च कुतूहलम् ।
स्त्रीणां विलासविव्वोक विभ्रमा ललितं तथा ॥ २३१ ॥

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।
द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ॥ २३२ ॥

व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ।
घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ॥ २३३ ॥

अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ।
स्यादाच्छुरितकं हासः सोत्प्रासः समनाक्स्मितम् ॥ २३४ ॥

मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ।
क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ॥ २३५ ॥

विप्रलम्भो विसंवादो रिङ्गणं स्खलनं समे ।
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ २३६ ॥

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।
अदृष्टिः स्यादसौम्येऽक्ष्णि संसिद्धिप्रकृती त्विमे ॥ २३७ ॥

स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ।
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ २३८ ॥

इति नाट्यवर्गः ।

अथ पातालभोगिवर्गः ८

अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽथ कुहरं सुषिरं विवरं विलम् ॥ २३९ ॥

छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे शुषिरं त्रिषु ॥ २४० ॥

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्त्रं तिमिरं तमः ।
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ॥ २४१ ॥

विष्वक् संतमसं नागाः काद्रवेयास्तदीश्वरः ।
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥ २४२ ॥

तिलित्मः स्यादजगरे शयुर्वाहस इत्युभौ ।
अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ॥ २४३ ॥

मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजंगमः ॥ २४४ ॥

आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ २४५ ॥

दर्वीकरो दीर्घपृष्ठो दन्तशूको विलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ २४६ ॥

[लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ॥ २४७ ॥

अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका]
त्रिष्वाहेयं विषास्थ्यादि स्फाटायां तु फणा द्वयोः ॥ २४८ ॥

समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ।
पुंसि क्लीबे च काकोलकालकूटहलाहलाः ॥ २४९ ॥

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ।
दारदो वत्सनाभश्च विषभेदो अमी नव ॥ २५० ॥

विषवैद्यो जांगुलिके व्यालग्राह्यहितुण्डिकः ।

इति पातलभोगिवर्गः ।

अथ नरकवर्गः

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ॥ २५१ ॥

तद्भेदास्तपनावीचिमहारौरवरौरवाः ।
संहारः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः ॥ २५२ ॥

प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ।
विष्टिराजूः कारणा तु यातना तीव्रवेदना ॥ २५३ ॥

पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ।
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ॥ २५४ ॥

इति नरकवर्गः ।

अथ वारिवर्गः

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥ २५५ ॥

रत्नाकरो जलनिधिर्यादःपतिरपां पतिः ।
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथाऽपरे ॥ २५६ ॥

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ २५७ ॥

कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ २५८ ॥

मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।
भङ्गस्तरङ्ग उर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ २५९ ॥

महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ।
पृषन्ति विन्दुपृषताःपुमांसो विप्रुषः स्त्रियाम् ॥ २६० ॥

चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ २६१ ॥
पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥ २६२ ॥
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ।
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥ २६३ ॥
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ॥ २६४ ॥
उडुपं तु प्लवः कोलः स्त्रोतोऽम्बुसरणं स्वतः ।
आतरस्तरपण्यं स्याद्द्रोणी काष्ठाम्बुवाहिनी ॥ २६५ ॥
सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः ।
नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥ २६६ ॥
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ।
अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ॥ २६७ ॥
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ।
त्रिष्वागाधात्प्रसन्नोऽच्छं कलुषोऽनच्छ् आविलः ॥ २६८ ॥
निम्नं गंभीरं गम्भीरमुत्तानं तद्विपर्यये ।
अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ॥ २६९ ॥
आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ॥ २७० ॥
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकुली चाथ गडकः शकुलार्भकः ॥ २७१ ॥
सहस्त्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ।
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ॥ २७२ ॥
क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ २७३ ॥

तिमिङ्गलादयश्चाथ यादांसि जलजन्तवः ।
तद्भेदाः शिशुमारोदशङ्कवो मकरादयः ॥ २७४ ॥

स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।
ग्राहोऽवाहारो नक्रस्तु कुम्भीरोऽथ महीलता ॥ २७५ ॥

गण्डूपदः किञ्चुलको निहोका गोधिका समे ।
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥ २७६ ॥

मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्कम्बुरस्त्रियौ ।
क्षुद्रशङ्खाः शङ्खनखाः शम्बूका जलशुक्तयः ॥ २७७ ॥

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।
शिली गण्डूपदीभेका वर्षाभ्वी कमठी डुलिः ॥ २७८ ॥

मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका ।
जलाशयो जलाधारस्तत्रागाधजलो ह्रदः ॥ २७९ ॥

आहावस्तु निपानं स्यादुपकूपजलाशये ।
पुंस्येवाऽन्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २८० ॥

नेमिस्त्रिकाऽस्य वीनाहो मुखबन्धनमस्य यत् ।
पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ॥ २८१ ॥

पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः ।
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ॥ २८२ ॥

खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ।
स्यादालवालमावालमावापोऽथ नदी सरित् ॥ २८३ ॥

तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्त्रोतस्वती द्वीपवती स्त्रवन्ती निम्नगापगा ॥ २८४ ॥

[कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती] ।

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ २८५ ॥
भागीरथी त्रिपथगा त्रिस्त्रोता भीष्मसूरपि ।
कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥ २८६ ॥
रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ।
करतोया सदानीरा बाहुदा सैतवाहिनी ॥ २८७ ॥
शतद्रुतु शुतुद्रिः स्याद्विपाशा तु विपाट् स्त्रियाम् ।
शोणो हिरण्यवाहः स्यात्कुल्याऽल्या कृत्रिमा सरित् ॥ २८८ ॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी सरितोऽन्याश्च सम्भेदः सिन्धुसंगमः ॥ २८९ ॥
द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे दाविकसारवौ ॥ २९० ॥
सौगन्धिकं तु कह्लारं हल्लकं रक्तशन्ध्यकम् ।
स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ॥ २९१ ॥
इन्दीवरं च नीले ऽस्मिन्सिते कुमुदकैरवे ।
शालूकमेषां कन्दः स्याद्वारिपर्णी तु कुम्भिका ॥ २९२ ॥
जलनीली तु शेवालं शैवलोऽथ कुमुद्वती ।
कुमुदिन्यां नलिन्यां तु बिसिनी पद्मिनीमुखाः ॥ २९३ ॥
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्त्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ २९४ ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
विसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ २९५ ॥
पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं नालो नालमथास्त्रियाम् ॥ २९६ ॥
मृणालं विसमब्जादिकदम्बे खण्डमस्त्रियाम् ।
करहाटः शिफाकन्दः किंजल्कः केसरोऽस्त्रियाम् ॥

संवर्तिका नवदलं बीजकोशो वराटकः ॥ २९७ ॥

इति वारिवर्गः ।

वर्ग संग्रहः ।

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगि नरकं वारि चैषां च संगतम् ॥ २९८ ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ २९९ ॥

इत्यमरसिंहविरचितेऽमरकोशे प्रथमकाण्डम् ॥

समाप्तम्

॥ श्रीहरिः ॥

(५) तर्कसंग्रहः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥ १ ॥

(१) उद्देशप्रकरणम् ।

पदार्थाः कति, कानि च तेषां नामानि ?–

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया-ऽभावाः सप्त पदार्थाः ।

पदार्थ सात हैं-द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय और अभाव ।

द्रव्याणि कति, कानि च तानि?–

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

उक्त द्रव्यादि सातों पदार्थों में - पृथिवी, जल, तेज, वायु, आकाश, काल, दिशा, आत्मा और मन ये नव ही द्रव्य हैं ।

कति गुणाः, के च ते ?–

रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-पर-त्वाऽ-परत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्मा-ऽधर्म-संस्काराश्चतुर्विंशतिर्गुणाः ।

'गुण' चौबीस प्रकार के होते है - रूप, रस, गन्ध, स्पर्श, संख्या, परिमाण, पृथक्त्व, संयोग-विभाग, परत्व, अपरत्व, गुरुत्व, द्रवत्व, स्नेह, शब्द, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म और संस्कार ।

कियन्ति कर्माणि, कानि च तनि ?–

उत्क्षेपणा-ऽपक्षेपणाऽऽ-कुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि ।

'कर्म' पाँच प्रकार के होते हैं -उत्क्षेपण (ऊपर की और फेंकना), अपक्षेपण (नीचे की और फेंकना), आकुञ्चन (एकत्र करना), प्रसारण (फैलाना) और गमन (चलना) ।

सामान्यं कतिविधम् ?–

परमपरं चेति द्विविधं सामान्यम् ।

सामान्य दो तरह के हैं - पर सामान्य और अपर सामान्य । अधिक देशमें जो

रहता है वह 'पर सामान्य' कहलाता है। जैसे-द्रव्यत्वकी अपेक्षा सत्ता। थोड़े देशमें जो रहता है वह 'अपर सामान्य' कहलाता है। जैसे-सत्ता की अपेक्षा द्रव्यत्व।

कियन्तो विशेषाः ?

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।

'विशेष' केवल नित्यद्रव्यों में रहता है और वह अनन्त है।

(पृथिवी, जल, तेज और वायु के परमाणु तथा आकाश, काल, दिशा, आत्मा और मन ये सब नित्य द्रव्य है)।

समवायः कतिविधः ?–

समवायस्त्वेक एव।

'समवाय' (नित्य सम्बन्ध) एक ही है।

अभावः कतिविध ?–

अभावश्चतुर्विधः-प्रागभावःप्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति।

'अभाव' चार प्रकारके है – प्रागभाव, पध्वसाभाव, अत्यन्ताभाव और अन्योन्याभाव।

(२) द्रव्यलक्षणप्रकरणम्।

पृथिव्याः किं लक्षणं, कति च भेदाः ?–

तत्र गन्धवती पृथिवी। सा द्विविधा-नित्याऽनित्या च। नित्या-परमाणुरूपा। अनित्या-कार्यरूपा। पुनस्त्रिविधा-शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।

पृथिवी आदि नव द्रव्यों में गन्धवाले द्रव्यका नाम 'पृथिवी' है (पृथिवीमें समवाय सम्बन्धसे गन्ध रहता है)। वह पृथिवी दो तरह की है – नित्य और अन्त्यि। नित्य पृथिवी वह है-जो परमाणु रूप है। और अनित्य पृथिवी वह है जो घट-पट आदि कार्य रूप है। पुनः वह कार्यरूप अनित्य पृथिवी भी तीन प्रकार की है- शरीर, इन्द्रिय और विषय इस भेदसे। उदाहरण जैसे-हम लोगोंका शरीर, पार्थिव शरीर है। गन्धको ग्रहण करनेवााल घ्राणेन्द्रिय-पार्थिव इन्द्रिय है, जो नासिकाके अग्रभाग पर विराजमान है। मृत्तिका, पत्थर, घट-पट आदि सभी पदार्थ पार्थिव-विषय हैं।

kirtanbhai Sinhavlokan 416 page / 18

जलस्य किं लक्षणं, कति च भेदाः ?–

शीतस्पर्शवत्य आपः । ता द्विविधाः-नित्या अनित्याश्च । नित्याः-परमाणुरूपाः । अनित्याः-कार्यरूपाः । पुनस्त्रिविधाः-शरीरेन्दरियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः-सरित्समुद्रादिः ।

'जल' वही कहलीती है-जिसका स्पर्श शीतल (ठण्डा) हो । वह जल दो प्रकारका है - नित्य और अनित्य । परमाणुरूप जल नित्य है और कार्यरूप जल अनित्य है । पुनः वह कार्यरूप जल शरीर, इन्द्रिय और विषयके भेदसे तीन प्रकारका है । वरुणलोकमें निवास करने वालेका शरीर जलका है । जीभ के अग्रभाग पर रहकर मधुर आदि रसको ग्रहण करनेवाली इन्द्रिय 'रसना' है और वही जलीय इन्द्रिय है। नदी, तालाब, समुद्र, कूप आदि जलीय विषय हैं।

तेजसः लिं लक्षणं, कति च भेदाः ?–

उष्णस्पर्शवत्तेजः । तच्च द्विविधम्-नित्यमनित्यं च । नित्यं-परमाणुरूपम् । अनित्यं-कार्यरूपम् । पुनस्त्रिविधं-शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुःकृष्णताराग्रवर्ति । विषयश्चतुर्विधो-भौमदिव्योदर्या-करजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणाम-हेतुरुदर्यम् । आकरजं सुवर्णादि ।

'तेज' वही कहलाता है-जिसमें उष्ण (गरम) स्पर्श हो। तेज भी दो तरहका होता है - नित्य और अनित्य। परमाणुरूप तेज नित्य है और कार्य (वह्नि आदि) रूप तेज अनित्य है। पुनः कार्यरूप अनित्य तेज शरीर, इन्द्रिय और विषय के भेद से तीन प्रकार का है । तैजस शरीर आदित्य (सूर्य) लोकमें है । रूपका प्रत्यक्ष (ज्ञान) करानेवाली चक्षु-ईन्द्रिय जो कि नेत्रके अन्दर काली पुतली (कृष्ण तारा) के अग्रभाग में रहती है वही तैजस इन्द्रिय है। तैजस विषय चार प्रकारके है-भौम, दिव्य, उदर्य और आकरज ।

अग्नि आदि 'भौम' तेज है, क्योंकि वह भूमि से उत्पन्न होता है। जल से प्रादुर्भूत होने वाली बिजली 'दिव्य' तेज है । खाई हुई चीजों को पचाने वाली पेटकी अग्नि 'उदर्य' तेज है। खानों से उत्पन्न सुवर्ण, रजत आदि 'आकरज' तेज है।

वायोः किं लक्षणं, कति च भेदाः ?–

रूपरहितस्पर्शवान् वायुः । स द्विविधः-नित्योऽनित्यश्च । नित्यः-परमाणुरूपः । अनित्यः-कार्यरूपः । पुनस्त्रिविधः-शरीरेन्द्रियविषयभेदात् । शरीरं

वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात्प्राणापानादिसञ्ज्ञां लभते।

वायु वही कहलाता है-जो रूपरहित ही और स्पर्शवान् हो। वह वायु दो तरहका है-नित्य और अनित्य। नित्यवायु परमाणुस्वरूप और अनित्य वायु कार्यस्वरूप है। पुनः कार्यरूप अनित्य वायु भी तीन प्रकारका है-शरीर, इन्द्रिय और विषय इस भेदसे। वायवीय शरीर वायुलोकमें है। वायवीय इन्द्रिय त्वगिन्द्रिय है, जो समस्त शरीरमें वर्तमान है और जिससे उष्ण, शीतल आदि स्पर्शका प्रत्यक्ष होता है। वृक्ष आदि को हिलाने वाला वायु 'विषय' है। शरीरके अन्दर संचार कराने वाला वायु 'प्राण' है और वह एक ही है, किन्तु हृदय उदर आदि स्थानोंके भेदसे पाँच प्रकारका कहलाता है, जैसे-प्राण-वायु, अपान-वायु, उदान-वायु, ध्यान-वायु और समान-वायु।

आकाशस्य किं लक्षणं, कतिविधं च तत्?—

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।

'आकाश' वह है, जिसमें समवायसम्बन्धसे शब्दस्वरूप गुण विद्यमान हो। वह आकाश एक है, व्यापक और नित्य है।

कालस्य किं लक्षणं, कति च भेदाः?—

अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च।

अतीत (भूत), भविष्यत्, वर्तमान के व्यवहार का कारण जो द्रव्य है वही 'काल' कहलाता है। यह काल भी एक है, सर्वव्यापक है, और नित्य है।

दिशः किं लक्षणं, कतिविधा च सा?—

प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च।

'दिशा' वह है जो-पूर्व, पश्चिम, दक्षिण और उत्तर के व्यवहार का कारण (द्रव्य) हो। वह दिशा भी-एक है, नित्य है और सर्वव्यापक है।

आत्मनः किं लक्षणं, कतिविधश्च सः?—

ज्ञानाधिकरणमात्मा। स द्विविधः-जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

जिस द्रव्यमें समवायसम्बन्ध से ज्ञान रहता हो वही 'आत्मा' है (ज्ञानका

अधिकरण आत्मा है, क्योंकि आत्मा में ज्ञान समवायसम्बन्ध से रहता है) वह आत्मा दो तरहकी है - जीवात्मा और परमात्मा। परमात्मा - ईश्वर है, सर्वज्ञ है और एक ही है। जीवात्मा प्रत्येक शरीरमें भिन्न-भिन्न है, व्यापक है और नित्य है।

मनसः किं लक्षणं, कतिविधं च तत् ?–

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च ।

'मन' वही कहलाता है, जिस (इन्द्रिय) से सभी प्रकार के सुख-दुःख की उपलब्धि (ज्ञान) होती हो। मन हर एक जीवात्मा के साथ भिन्न-भिन्न है। तस्मात् वह अनन्त है, परमाणुरूप है और नित्य है।

(३) गुणलक्षणप्रकरणम् ।

रूपस्य किं लक्षणं, कतिविधं च तत् ?–

चक्षुर्मात्रग्राह्योगुणो रूपम् । तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्र-भेदात्सप्तविधम् । पृथिवी-जल-तेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।

'रूप' वही कहलाता है, जिस (गुण) का आँखों से प्रत्यय होता हो। वह रूप सात प्रकार के है-शुक्ल, नील, पीत, रक्त, हरित, कपिश और चित्र इस भेद से। वह रूप पृथिवी, जल और तेज में रहता है। पृथिवी शुक्ल में आदि सातों प्रकार का रूप रहता है। जल में अभास्वरशुक्ल रूप है और तेज में भास्वरशुक्ल रूप है।

(विना चमकवाला श्वेत रूप 'अमास्वरशुक्ल' रूप और चमकीला तथा प्रकाशक सफेद रूप 'भास्वरशुक्ल' रूप कहलाता है।

रसस्य किं लक्षणं, कतिविधश्च सः ?–

रसनाग्राह्योगुणोरसः । स च मधुरा-ऽम्ल-लवण-कटु-कषाय-तिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।

'रस' वह कहलाता है, जिस (गुण) का रसनेन्द्रिय (जीभ) से प्रत्यक्ष हो। वह रस छः प्रकार का है-मधुर, अम्ल, लवण, कटु, कषाय और तिक्त इस भेद से। वह रस पृथिवी और जलमें रहता है। तत्र (पृथिवी और जल के मध्यमें) पृथिवी में छह प्रकार का रस है और जलमें केवल मधुर रस ही है। [जल में अम्लादि रस की प्रतीति उपाधि भेद से हुआ करती है]

गन्धस्य किं लक्षणं, तद्भेदश्च कः ?–

घ्राणग्राह्योगुणोगन्धः । स द्विविधः-सुरभिरसुरभिश्च । पृथिवीमात्रवृत्तिः ।

'गन्ध' वह कहलाता है, जिस (गुण) का घ्राणेन्द्रिय (नाक) से प्रत्यक्ष हो । सुगन्ध और दुर्गन्ध के भेद से वह गन्ध दो तरह का है और पृथिवी में ही रहता है (जल और वायु में भी पृथिवी के गन्ध की ही प्रतीति होती है ।।

स्पर्शस्य किं लक्षणं, के च भेदाः ?–

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः-शीतोष्णानुष्णाशीतभेदत् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः ।

'स्पर्श' वही कहलाता है, जिस (गुण) का केवल त्वगिन्द्रिय (त्वचा) से प्रत्यक्ष होता हो । वह स्पर्श तीन प्रकार का है-शीत (ठंडा), उष्ण (गर्म) और अनुष्णाशीत (न अधिक ठण्डा न अधिक गर्म), पृथिवी, जल, तेज और वायु इन चारों में स्पर्श रहता है । जल में शीतस्पर्श, तेज में उष्णस्पर्श, पृथिवी और वायु में अनुष्णाशीतस्पर्श है ।

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?–

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्राऽपाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

पृथिवी में रूप, रस, गन्ध और स्पर्श ये चार प्रकार के गुण पाकज (तेज के संयोग से उत्पन्न होने वाले) है तथा अनित्य है, और अन्यत्र (जल, तेज, वायु में) अर्थात् जल में रहने वाले रूप-रस-स्पर्श, तेज में रहने वाले रूप-स्पर्श, वायु में रहने वाला स्पर्श अपाकज है तथा नित्य और अनित्य दोनों है । नित्यगत (जल आदि के परमाणु में रहने वाले) रूप, रस, स्पर्श, नित्य है और अनित्यगत (घट-पटादि कार्य में रहने वाले) अनित्य हैं ।

सङ्ख्यायाः किं लक्षणम्, कुत्र च सा वर्तते ?–

एकत्वादिव्यवहारहेतुः संख्या । सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता (१) । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्राऽनित्यमेव ।

'संख्या' वही कहलाती है, जो एक, दो तीन, चार आदि व्यवहार का कारण हो । वह संख्या पृथिवी आदि नव द्रव्यों में रहती है और एक से परार्ध पर्यन्त होती है । एकत्व संख्या दो प्रकार की होती है - नित्य और अनित्य, नित्यगत (पृथिवी, जल,

तेज और वायु के परमाणु तथा आकाश, काल, दिशा, आत्मा और मन इन नित्य पदार्थों में रहने वाला) एकत्व नित्य है और अनित्यगत (घट-घट आदि पदार्थों में रहने वाला) एकत्व अनित्य है। परन्तु द्वित्वादि संख्या तो सर्वत्र अनित्य ही है।

परिमाणस्य किं लक्षणं, के च तस्य भेदाः ?–

मानव्यवहारासाधारणकारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम्-अणु, महत्, दीर्घं, ह्रस्वं, चेति ।

'परिमाण' वह है, जो-एक हाथ, दो हाथ, एक सेर, दो सेर इत्यादि नापने और तौलने के व्यवहार का प्रधान कारण हो। वह परिमाण नव द्रव्यों में रहता है और चार प्रकार का है-अणु (अत्यन्त छोटा), महत् (बड़ा), दीर्घ (लम्बा) और ह्रस्व (नाटा) इस भेद से।

पृथक्त्वस्य किं लक्षणम् ?–

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

यह घट, पट से भिन्न है इत्यादि व्यवहार का प्रधान कारण 'पृथक्त्व' है। पृथक्त्व भी उक्त नवों द्रव्यों में रहता है।

संयोगस्य किं लक्षणम् ?–

संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

'ये दोनों पदार्थ सम्मिलित हैं' इत्यादि व्यवहार का असाधारण कारण 'संयोग' है। यह संयोग भी उक्त नवों द्रव्यों में रहता है।

विभागस्य किं लक्षणम् ?–

संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

[परस्पर संयोग (मिले हुए) पदार्थों के विभाग (अलग-अलग) होने से संयोग नष्ट हो जाता है, इसलिये] संयोग को नाश करने वाला गुण विभाग है। यह विभाग भी उक्त सभी नव द्रव्यों में रहता है।

परत्वाऽपरत्वयोः किं लक्षणं, के च भेदाः ?–

पराऽपरव्यवहाराऽसाधारणकारणे परत्वाऽपरत्वे । पृथिव्यादिचतुष्टय-मनोवृत्तिनी । ते च द्विविधे-दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतम-परत्वम् ।

यह पर (दूर) है और यह अपर (नजदीक) है इस व्यवहार का असाधारण कारण 'परत्व' और 'अपरत्व' है। ये (परत्व-अपरत्व) पृथिवी, जल, तेज, वायु और मनमें रहते हैं। ये भी दो तरह के हैं-(१) दिक्कृत परत्व और दिक्कृत अपरत्व। एवं (२) कालकृत परत्व और कालकृत अपरत्व। दूरस्थ घट-पटादि पदार्थों में दिक्कृत परत्व है, और समीपस्थ पदार्थों में दिक्कृत अपरत्व है। ज्येष्ठ (बड़े) में कालकृत-परत्व है और कनिष्ठ (छोटे) में कालकृत-अपरत्व है।

गुरुत्वस्य किं लक्षणम् ?–

